



**Tracking:**

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 04/03/2016 | Typing Started on | H K Srinivasa Rao |
| 2 | 24/03/2016 | Typing Ended on | H K Srinivasa Rao |
| 3 | 27/03/2016 | Editing by | H K Srinivasa Rao, M S Venugopal & Sri Ranganath Gangoor |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Vadiraja Theertharu. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email : srkarc@gmail.com*

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಜ್ಞಾನ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಗ್ರಂಥ ಋಣ- ಸ್ತೋತ್ರಮಣಿಮಾಲಾ, ಗುರುಸಾರ್ವಭೌಮ ಶ್ರೀರಾಘವೇಂದ್ರ ಪ್ರತಿಷ್ಠಾನಮ್ – ಧಾರವಾಡ

TABLEOFCONTENTS


॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥ ....2

ಕೃತಜ್ಞತೆಗಳು ....2

सदाचारस्मृतिः॥2॥ ....9

सङ्कल्पपद्धतिः॥3॥ ....10

मुख्यप्राणाष्टकम्॥4॥ ....11

विभीषणहनुमत्संवादरूपवायुस्तुतिः॥5॥ ....13

मध्वमुनिप्रतापाष्टकम्॥6॥ ....16

श्री श्रीशगुणदर्पणस्तोत्रम्॥7॥ ....17

लक्ष्म्यार्यावृत्तम्॥8॥ ....19

दुर्गास्तव॥9॥ ....20

श्रीरामपञ्चकम्॥10॥ ....22

श्रीरामकवचम्॥11॥ ....23

श्रीरामदशकम्॥12॥ ....25

रौप्यपीठकृष्णस्तुतिः॥13॥ ....26

श्रीकृष्णस्तुतिः॥14॥ ....28

श्रीकृष्णस्तुतिः॥15॥ ....31

अष्टमहिषीयुक्तकृष्णस्तोत्रम्॥16॥ ....32

आपादस्तोत्रम्॥17॥ ....33

उक्तिप्रत्युक्तिस्तोत्रम्॥18॥ ....34

श्रीकृष्णरामावतारचरितरत्नसङ्ग्रहः॥19॥ ....35

अवतारत्रयस्तोत्रम्॥20॥ ....38

पाषण्डखण्डनं व्यासस्तोत्रम्॥21॥ ..... 39

व्यासास्तुतिः (व्यासाष्टकम्) ॥22॥ ..... 42

व्यासवर्णनम्॥23॥ ..... 44

हयास्यदशकम्॥24॥ ..... 44

हयवदनाष्टकम्॥25॥ ..... 45

हयग्रीवपञ्चकम्॥26॥ ..... 46

हयग्रीवध्यानप्रकरणम् ॥ 27॥ ..... 47

हयग्रीवस्तुतिः॥28॥ ..... 51

हयग्रीवसम्पदास्तोत्रम्॥29॥ ..... 53

हयग्रीवस्तोत्रम्॥30॥ ..... 54

श्रीहयग्रीवस्तोत्रम्॥31॥ ..... 55

प्रार्थनादशकस्तोत्रम्॥32॥ ..... 56

श्रीवराहहयवदनस्तोत्रम्॥33॥ ..... 58

श्रीनृसिंहवराहस्तोत्रम्॥34॥ ..... 59

परमस्तुतिः॥35॥ ..... 60

श्रीत्रिविक्रमस्तोत्रम्॥36॥ ..... 62

हर्यष्टकम्॥37॥ ..... 64

विष्णुस्तुतिः॥38॥ ..... 65

नरहर्यष्टकम्॥39॥ ..... 66

श्रीमद्वेङ्कटेशमङ्गलाष्टकम्॥40॥ ..... 67

दशावतारस्तोत्रम् ॥41॥ ..... 69

दशावतारस्तुति॥42॥ ....70

चतुर्विंशतिमूर्तिभेदस्तोत्रम्॥43॥ ....77

ऋणमोचनस्तोत्रम्॥44॥ ....78

धीशुद्धिस्तोत्रम्॥45॥ ....79

चिन्ताखण्डनस्तोत्रम्॥46॥ ....80

अभयसंस्तवः॥47॥ ....82

अक्षपञ्चकम्॥48॥ ....83

नैवेद्यप्रकारः॥49॥ ....84

सप्तरात्रोत्सवप्रकारः॥50॥ ....85

स्वप्नपद्यम्॥51॥ ....87

सहस्रारस्तुतिः॥52॥ ....87

चक्रस्तुतिः॥53॥ ....89

अधिकरणनामावलिः॥54॥ ....96

संस्कृत (ब्रह्म)सूत्रार्थः॥55॥ रागः सारङ्गनाटि, अट्टताळ....113

एकादशीनिर्णय॥56॥ ....115

हितोपदेशः॥57॥ ....120

कुरुस्तुति (लकारविभक्त्येकतास्तुतिः)॥58॥ ....121

हरिभक्ताष्टकम्॥59॥ ....123

श्रीमद्भागवतानुक्रमणिका॥60॥ ....124

प्रथमस्कन्धः ....124

द्वितीयस्कन्धः....125

तृतीयस्कन्धः ........ 125

चतुर्थस्कन्धः ........ 126

पञ्चमस्कन्धः ........ 127

षष्ठस्कन्धः ........ 128

सप्तमस्कन्धः ........ 129

अष्टमस्कन्धः ........ 130

नवमस्कन्धः ........ 131

दशम स्कन्धः (पूर्वार्धः) ........ 132

दशमस्कन्धः (उत्तरार्धः) ........ 133

एकादशःस्कन्धः ........ 135

द्वादशस्कन्धः ........ 136

नवग्रहस्तोत्रम्॥61॥ ........ 137

पवनपञ्चरत्नमालिका॥62॥ ........ 137

श्रीलक्ष्मीगद्यम्॥63॥ ........ 138

हयग्रीवदण्डकम्॥64॥ ........ 139

गङ्गास्तोत्रम्॥65॥ ........ 142

श्री कृष्णस्तोत्रम्॥66॥ ........ 143

श्रीमद्वादिराजपूज्यचरणविरचित – ग्रन्थाद्यन्तश्लोकाः ........ 144

1.महाभारतलक्षालङ्कार ........ 144

2.महाभारततात्पर्यनिर्णयभावप्रकाशिका। ........ 146

3.श्रीमन्न्यायसुधागुर्वर्थदीपिका ........ 147

4. तत्त्वप्रकाशिकागुर्वर्थदीपिका....148
5. तलवकारोपनिषद् भाष्यटिप्पणी....148
6. तैत्तिरीयोपनिषद् भाष्यटिप्पणी (अपूर्णा)-....149
7. आथर्वणोपनिषद् भाष्यटिप्पणी....149
8.माण्डूकोपनिषद् भाष्यटिप्पणी....149
9. ईशावास्योपनिषद् भाष्यटिप्पणी....150
10. षट्प्रश्नोपनिषद् भाष्यटीकाटिप्पणि....150
11. युक्तिमल्लिका....151
12. न्यायरत्नावलिः....154
13. उपन्यासरत्नमाला....154
14. श्रुतितत्वप्रकाशिका....155
15. भूगोलनिर्णयः....155
16. पाषण्डमतखण्डनम्....156
17. हरिभक्तिलता....157
18.कल्पलता....158
19. विवरणव्रणम्....159
20. रुग्मिणीशविजयः –....160
21. सरसभारतीविलास....162
22. तीर्थप्रबन्ध....163
23. स्वाप्नवृन्दावनाख्यानम्....164
24. तप्तचक्रभूषणम्....165

25. श्री हरिवायुस्तुति पुर(न)श्चरणम् .................... 165

श्रीभूतराज स्तोत्रम् .................... 166

श्रीभूतराज स्तोत्रम् .................... 168

श्रीमदणुवृन्दावनाख्यानम् .................... 169

वादिराज प्रार्थना .................... 170

सत्यधर्मतीर्थ विरचित श्रीवादिराजस्तोत्र .................... 171

वादिराजगुरुवरचरितामृतम् .................... 172

प्रथमबिन्दुः .................... 172

द्वितीय बिन्दुः .................... 176

तृतीय बिन्दुः .................... 181

चतुर्थः बिन्दुः .................... 188

पञ्चमबिन्धुः .................... 196

षष्ठ बिन्दुः .................... 201

सप्तमबिन्दुः .................... 208

अष्टमबिन्दुः .................... 212

नवमः बिन्दुः .................... 223

## रमेश स्तुतिः॥1॥

ॐ प्रातः स्मरामि वरकुण्डलशोभिगण्डं शीतांशुमण्डलमुखं सितवारिजाक्षम्।
आताम्रकम्रमुदिताधरबिम्बजृम्भिध्यातृप्रहर्शकरहासरसं रमेशम्॥1॥

प्रातर्भजामि शुभकौस्तुभकम्बुकण्ठं स्फीतात्मवक्षसि विराजितभूरिहारम्।
भीतस्वभक्तभयभञ्जनपाणिपद्मं शातोदरार्पितजगद्भरमब्जनाभम्॥2॥

प्रातर्नमामि शुभकिङ्किणिमेखलाङ्गं पीताम्बरं करिकरोरुमुदारजानुम्।
ख्याताङ्घ्रियुग्मरुचिरञ्जितकञ्जजातवातादिदेववरमौळिमणिं मुकुन्दम्॥3॥

वादिराजयतिप्रोक्तं श्लोकत्रयमिदं शुभम्।
प्रातकाले पठन् मर्त्यः पापेभ्य प्रविमुच्यते॥4॥

## सदाचारस्मृतिः॥2॥

ॐ॥ बुध्वा ब्राह्मे मुहूर्ते स्मृतहरिरथ सङ्कीर्त्य तं नैरृताशाम्

गत्वा त्यक्त्वा पुरीषं स्मृतिविहितमृदा जीर्णशौचः प्रशोध्य।
दन्तान्काष्ठेन कृत्वाऽऽचमनमथ सकृन्मग्न उत्थाय तिथ्या-

द्युक्त्वा मृत्स्नां त्रिभागां दिनकरमनुनाऽऽमन्त्र्य पूर्वेण लिम्पेत्॥1॥

देहं कक्षाळिके चोदितमनुरपरेणांसजानुस्वपृष्ठं

नत्वा कृष्णं गुरूंश्चस्मृतहरिरखिलं तीर्थमावाह्य तोये।
मग्नस्त्रिर्द्वादशाष्टाक्षरहरिमनुभिर्वायुपस्पृश्य चाप्यं

सूक्तं जप्त्वाऽथ लिम्पेन्मृदमुदितमृतं चेतिसूक्तं जपंस्त्रिः॥2॥

मग्नः पुंसूक्तमन्त्रैः शिवशिखरजलेनाभिषिच्याथ तीर्थं

पीत्वा सन्तर्प्य देवाद्यथ धृतवसनो वायुपस्पृश्य पुण्ड्रम्।
चक्रादीन्धारयित्वा श्रुतिविहितपथैः पूर्वसन्ध्यामुपास्य

स्मृत्वाऽर्कस्थं मुकुन्दं जपमथ विरचय्योदितेऽग्नौ जुहोति॥3॥

स्नात्वा मध्याह्नकाले श्रुतिपथविदुपास्याथ सन्ध्यां गुरूक्तान्

मन्त्रान्जप्त्वा प्रतर्प्याच्युतमथ विहितब्रह्मयज्ञोऽर्चयित्वा।

कृत्वोक्तं वैश्वदेवं स्वजनपरिवृतस्तत्प्रसादान्नभोजी

विद्यागोष्ठीप्रहृष्टः प्रतिदिवसमुपासीत सायं च सन्ध्याम्॥4॥

ध्यात्वा ब्राह्मे मुहूर्ते हृदि नृहरिमभिष्टूय शास्त्रोक्तरीत्या

स्नात्वा चक्रोर्ध्वपुण्ड्राङ्कितततनुरिनबिम्बस्थनारायणार्घ्यम्।

दत्वा जप्त्वाऽथ हुत्वा स्वगुरुमनुजपब्रह्मयज्ञाच्युतार्चाः

कृत्वा हुत्वाऽथ भुक्त्वा कथितहरिकथोऽन्त्यामुपासीत सन्ध्याम्॥5॥

कर्मादौ कर्ममध्ये तदुपरि च हरिं प्रेरकं संस्मरन्तः

तस्मिंस्तान्यर्पयन्तः श्रुतिपथविपरीतक्रिया वर्जयन्तः।

एवं ये वादिराजाभिदयतिरचितं सङ्ग्रहं चिन्तयन्तः

कुर्युः कर्माणि तेषां वितरति सकलाभीष्टमिष्टो मुकुन्दः॥6॥

## सङ्कल्पपद्धतिः॥3॥

ॐ॥ विष्ण्वादेशे (विष्णोर्देशे) वर्तमानवेधसश्चरमार्धके।

आयुषः कल्पके चैव सिताङ्गस्य किटेस्तथा॥1॥

मनोश्च सूर्यपुत्रस्य सन्धौ पादे कलेस्तथा।

आद्ये वर्षे महापुण्ये भरतस्य महीपतेः॥2॥

जम्बुद्वीपे वत्सरे च वर्तमाने तथाऽयने।

ऋतौ मासे च पक्षे च तिथौ वारे च भे तथा॥3॥

| |
|---|
| करणादियुते पुण्ये कालेऽस्मिन्प्रीतये हरेः।<br>देवर्षिपितृतृप्त्यर्थं पापानां च निवृत्तये॥4॥ |
| अस्मिन्जलाशये विष्णोः पादपद्मं विचिन्तयन्।<br>गङ्गां स्मरन्नहं स्नानं करिष्ये स्मृतिचोदितम्॥5॥ |
| अघौघविध्वंसकरस्य विष्णोस्तोषाय तेन प्रहितोऽहमस्मिन्।<br>जले स्मरन्देवनदीं करोमि स्नानं सगोविन्दपदाभिधानम्॥6॥ |
| **मुख्यप्राणाष्टकम्॥4॥** |
| भक्तिं श्रीरमणस्य पादयुगले प्रीत्या प्रदेहीश म- |
| च्चित्तं तत्पदपद्मचिन्तनरतं नित्यं विधेह्यच्युतम्।<br>त्वत्तातं मयि सुप्रसन्नमधुना विज्ञाप्य कुर्वञ्जसा |
| स्वामिन्प्राणगणाधिनाथ दयया दासं हि मां पालय॥1॥ |
| त्वय्युत्तिष्ठति यत्कलेवरमभूत्पातैकपात्रं सुरा- |
| स्त्रातुं नै व हि शेकुरादिपुरुषोऽप्यासीदुपेक्षारतः।<br>श्वासाख्यं मनुमस्य यत्तव वशं ब्रूतेऽविगीता श्रुतिः |
| स त्वं प्राणगणाधिनाथ दयया दासं हि मां पालय॥2॥ |
| येनाऽऽत्मीयजनावनाय बलिना नीतः पुरोच्चाचल- |
| स्तीर्णः पूर्णपयोनिधिः खलहृता दृष्टा च सीताकृतिः।<br>तत्ते किं कथनीयमस्ति जगति व्यक्तस्य सत्पालने |
| स्वामिन् रामपदाब्जभृङ्ग तदव श्रीमन्हनूमन्नमः॥3॥ |
| सेवाभिः परितुष्टधीः कविजनैर्गेयाभिराद्यः पुमान् |

ब्रह्माणं किल भाविनं समतनोत्सन्तं भवन्तं प्रभुः।

साम्राज्ये सति विस्मृतिर्निजजने निन्द्या हि यत्त्वादृशां

स्वामिन् रामपदाब्जभृङ्ग तदव श्रीमन्हनूमन्नमः॥4॥

कामी येन हि कीचको विनिहतः क्रोधी च दुश्शासनः

स्तब्धो लुब्धसुयोधनश्च मणिमान्मुग्धो मदान्धो बकः।

कृष्णेर्ष्याभिरतश्च मागधपतिः षड्वैरिवर्गात्सदा

स त्वं भीम गुणाभिराम दयया दासं हि मामुद्धर॥5॥

दाहाद्येन विमोचितो निजजनस्स त्वं भवाग्नेरव

स्वीयाध्वप्रतिबन्धकश्च निहतः किर्मीरनामा रणे।

प्रोद्यन्मध्वमताध्वगस्य सदय प्रत्यर्थिनस्सादय

स्वामिन्सोमकुलाग्रगण्य भवतः पोतं हि मां न त्यज॥6॥

विद्वत्सिन्धुम(गृ)होदय द्विजपथप्रज्ञप्तिबीजोदय

प्रत्यर्थ्यम्बुजमुद्रण प्रियजनप्रत्यूहघर्मार्दन।

हृल्लग्नामलकृष्णसस्मितदयावीक्षासुधाधिष्ठ्य मां

श्रीमन्मध्वमुनीन्द्रचन्द्र कुमुदस्थानीयमुद्बोदय॥7॥

यद्वादाख्यकराः सतां सुखकराः दुर्वादिगर्वज्वराः

सद्विद्याम्बुधिपोषको यदुदयोऽविद्याम्बुधेः शोषकः।

यः शर्वेण शिरोधृतोऽपि विशदं चक्रे मुरारेः पदं

सोऽव्याद्द्भुतमध्वतारकपतिर्हार्दान्धिकारच्युतिः॥8॥

पद्यानामिदमष्टकं प्रविलसन्मध्वाकृतिस्पष्टकं

तद्दासप्रियवादिराजयतिना तद्दत्तवग्भूतिना।
हृद्यं यः पठतीरितं सुचरितं सः स्याद्दिशामष्टके
माद्यन्मायिमतङ्गभङ्गकरणे सिंहप्रबर्हप्रभः॥9॥

## विभीषणहनुमत्संवादरूपवायुस्तुतिः॥5॥

ॐ॥ कस्मादस्मद्वनस्याङ्घ्रिपचयमुदयत्पुच्छवानच्छिनस्त्वं
रक्षो वृक्षोग्रहस्तः सुबहु किमवधीः किंबलस्त्वं बताद्य।
सिन्धुं चान्धूकरोषि प्रविशसि पृतनां निर्भयो द्विड्घटानां
चिन्तासन्तापकारी दशवदनपुरश्रीहरः को हरे त्वम्॥1॥

वायोरायोधनाग्रेसरसुभटशिरश्चित्तरत्नोपमस्य
प्रायो नायोध्यमस्य प्रियतमसुकुमारोऽहमारोहयोग्यः।
श्रीशार्ङ्गेशाङ्कधाम्नः कमलजवसतेश्चाहुरार्या हनूमा-
नित्याख्यां नात्ययोऽस्मत्कुलजमुनिषु वो रंहसा वांऽहसा वा॥2॥

पारावारान्तरोद्यद्युमणिगणसमा भाति यद्धामसीमा
धीरो नारायणोऽयं रघुकुलमनघं कर्तुमुर्व्यां विहर्तुम्।
भूमा भूमावुदेत्याखिलकविविनुतो रामनामास्ति धीमान्
सोऽयं श्रीमारुतस्य प्रियतमतनयं दासवृत्त्याऽनुशास्ति॥3॥

रामारामां दिदृक्षोः करचरणचलद्वाललीलोरुघातैः
जातः क्ष्माजातपातो न तु कृतिरियमल्पातिदर्पस्य मेऽलम्।
वेगादागच्छतो मे जवभवपवनस्योदयोऽप्येनमासी-
द्धन्ताहं तादृशो नासुरज मम बलं राघवोऽमोघवीर्यः॥4॥

रामाख्यामानितस्य प्रथितहरधनुर्भङ्गदोत्तुङ्गबाहोः
श्रुत्यन्तात्यन्तगीतागणितगुणगणस्येष्टसर्वेष्टदातुः।
सोऽहं मोहान्धकारक्षपणदिनमणेर्दीनवानीकिनीनां
मृत्योर्भृत्योऽस्मि तेन प्रहित इह खलानीतसीतार्तिशान्त्यै॥5॥

पर्यग्गिर्यग्र्यग्रगण्यं रविरथतुरगस्याग्रतो वाऽग्रयायी
विद्यां प्रद्योतनादध्यगमदुरुजवस्तन्मुखस्योन्मुखो यः।
रामाङ्घ्रिप्रेमशक्त्या त्रिभुवनजननस्थानसंस्थानशक्ते-
र्लङ्का शङ्कास्पदा किं निगमनुतचरित्रस्य तस्याऽऽशुगस्य॥6॥

अण्डोद्दण्डोदशोषेऽप्यतिकुशलतमः क्वेदमम्भोधिगम्भो-
लोकालोकाप्तमूर्तेर्जलनिधितरणं किं महन्निर्ममस्य।
विश्वस्य श्वासयन्तुर्मम किमु खलविध्वंसने संशयः स्या-
द्देवाश्वै वोचुरुक्थं मम पितरमतश्वासमो दास एषः॥7॥

धर्मं सम्मानयन्तं रघुपतिरवति प्रत्यहं शत्रुभावं
तस्मिन्योऽस्मिन्प्रदेशे रचयति तमिमं हन्ति तस्यानुगस्य।
नित्यं कृत्यंतदेव ह्यधकरदशकण्ठोपकण्ठस्तदैत्या-
नित्थं हत्वाऽऽत्मभर्तुः प्रियकृदभवमुद्दामशौर्योर्व्यवार्यः॥8॥

द्रक्ष्यस्यक्षय्यवीर्योऽप्यरिभटपटुभिस्तैरबद्धैर्हि बद्धः
पुच्छस्वच्छाग्निनाऽहं कुनयतनयदत्तेन वित्तं समस्तम्।
धक्ष्याम्यध्यक्षमेषां भवनवनमपि प्राज्ञ ते धाम धीमन्
त्यक्त्वा त्यक्तोग्रदैत्यप्रकृतिकृतविकारस्य धर्मानुगस्य॥9॥

मुञ्च त्वं चाग्रजस्य प्रबलतमहरिद्वेषतो दोषभाजः
सेनामेनां विहीनां मनसि सुमनसां नायकं दायकं ते।
भाग्यस्याग्र्यस्य नित्यं स्मर दितिजमतं धिक्कुरु न्यक्कुरुष्व
स्वीयस्याऽऽयासदात्रीं धियममलधिया धारयामुं दयालुम्॥

सेतुं यातुं कपीनामुरुतरजलधौ पुण्यहेतुं प्रहातुं
पापान्यापत्कराणि प्रथितसुयशसे शर्म दातुं च गातुः।
वत्स्यत्यत्स्यत्यथापि स्वकरधृतधनुर्मुक्तशाणोग्रबाण-
ज्वालाजालः स दैत्याख्यवनमवनकृद्राघवः श्लाघनीयः॥11॥

भेत्ता मत्तासुरेन्द्रप्रतिभयशिरसां कुम्भकर्णोग्रकर्ण-
च्छेता हर्ता च तस्य प्रियतमधरणीभारहारी स हारी।
सीतामेतां समेत्य स्वचरणशरणान्देवभूदेवपूर्वान्
पृथ्वीं चेत्थं प्रतोष्य प्रविशति च निजां शश्वयोध्यामयोऽद्याम्॥

तृष्णा कृष्णावतारेऽप्यघशमनतदङ्घ्रिजसेवोत्सवे स्या-
द्भीमो भूत्वा तदाऽहं बकमदहरणो हन्मि किर्मीरदैत्यम्।
सत्त्वोद्रिक्तं जरायाः सुतमथ गदयोन्मृद्य सद्धैर्यवीर्यः
शौर्योन्मत्तं च दुर्योधनमनु सबलं नाशयाम्याशयाऽन्धम्॥13

ईशादेशेन सोऽहं पुनरपि धरणीं प्राप्य दुश्शास्त्रशस्त्रं
मध्वाख्योऽद्धा प्रदूष्य प्रगुणमथ करिष्यामि सूत्रस्य भाष्यम्।
कृत्वा कृत्वाऽवतारान्सुरनिकरगुरुर्मुख्यवायुर्निजायुः
सार्थीकर्तुं मुकुन्दं परिचरति सदाऽरीन्हरन्व्याहरंश्च॥14॥

विद्यां विद्यापतेर्यः पठति हनुमतः सोऽपि विद्यां समृद्धा-

मभ्येत्यभ्युन्नतिं च प्रतिदिनमुरुभक्तिं स्वयोग्यं च भाग्यम्।

विद्वन्मध्ये प्रसिद्धिं बुधनुतकवितां वादिराजर्षिराजः

सद्यो यद्योगिवर्यो व्यतनुत तदियं सर्वकार्याणि कुर्यात्॥15

## मध्वमुनिप्रतापाष्टकम्॥6॥

ॐ॥ क्वचित्सुरान्शास्ति सुराङ्गनाः क्वचित् क्वचिच्च गन्धर्वपतीनृषीन् क्वचित्।

क्वचित्पितॄन् क्वापि नृपान्नरान्क्वचिच्छुभानयं मध्वमुनिः प्रतापवान्॥1॥

क्वचित्प्रभुं स्तौति समीक्षते क्वचित् क्वचित्स्मरन्नृत्यति गायति क्वचित्।

क्वचित्तमाराधयतीश्वरं क्वचिन्नमत्ययं मध्वमुनिः प्रतापवान्॥2॥

क्वचिद्धरेर्जीवजडातिभिन्नतां क्वचित्प्रभोः सर्वगुणैश्च पूर्णताम्।

क्वचिच्च तस्याखिलदोषशून्यतां वदत्ययं मध्वमुनिः प्रतापवान्॥3॥

क्वचिच्च विष्णोरुरुचित्ररूपतां क्वचिच्च मुक्ताखिलजीवयन्तृताम्।

क्वचिच्च तस्याव्ययचिन्मयाकृतिं व्यनक्त्ययं मध्वमुनिः प्रतापवान्॥4॥

क्वचित्स्मृतीः क्वापि पुराणसंहिताः प्रवक्ति सूत्रं क्वचिदागमोक्तिभिः।

क्वचिच्च धर्मं चरति क्वचिच्च तं ब्रवीत्ययं मध्वमुनिः प्रतापवान्॥5॥

क्वचिच्च चार्वाककणादगौतमप्रभाकराद्वैतितथागतादिकैः।

कृतं मतं युक्तिशतैर्विखण्डयन् विभात्ययं मध्वमुनिः प्रतापवान्॥6

परान्पराभावयति क्वचित्क्वचिनिजान्कथायां कुशलीकरोत्ययम्।

क्वचिद्बुधान्वैष्णवमार्गमागतान् पुनात्ययं मध्वमुनिः प्रतापवान्

क्वचित्समस्तागमनिर्णयोदिताः कृतीः कृती व्याकुरुते सभान्तरे।
प्रहृष्टरोमा नृहरौ क्वचिन्मनो युनक्त्ययं मध्वमुनिः प्रतापवान्॥8

इदं प्रतापाष्टकमच्युतप्रियश्रुतिप्रतीतामलमध्वयोगिनः।
यतिस्तदीयोऽकृत वादिराज उदारधीस्तस्य कृपाफलाप्तये॥9॥

## श्री श्रीशगुणदर्पणस्तोत्रम्॥7॥

ॐ॥ या सुगन्धास्यनासादिनवद्वाराखिलेन या।
दुराधर्षं सर्वसस्योदयार्थं या करीषिणी॥1॥

या नित्यपुष्टा सर्वाङ्गैः सौन्दर्यादिगुणैरपि।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥2॥

मातर्लक्ष्मि नमस्तुभ्यं माधवप्रियमानिनि।
युवां विश्वस्य पितरावितरेतरयोगिनौ॥3॥

समना किल मातस्त्वममुना ततयोगिनी।
मम नाथेन देवश्च विमनाश्च न स त्वयि॥4॥

त्वं वेदमानिनी वेदवेद्यः किल स ते प्रियः।
त्वं मूलप्रकृतिर्देवी स चादिपुरुषः किल॥5॥

यस्त्वामुरसि धत्तेऽम्ब कौस्तुभद्युतिभासिते।
स त्वां नैवाच्युतः सर्वस्यात्यये सत्यपि त्यजेत्॥6॥

देवि त्वं ललनारत्नं देवोऽसौ पुरुषोत्तमः।
युवां युवानौ सततं युवयोर्न वयोऽधिकः॥7॥

त्वं पद्मिनी पद्मवक्त्रा पद्माक्षी पद्मविष्टरा।
पद्मद्वयधरा पद्मकोशोद्यस्तनशोभना॥8॥

पद्महस्ता पद्मपादा पद्मनाभमनः प्रिया।
पद्मोद्भवस्य जननी पद्मा च वरवर्णिनी॥9॥

अम्बां पीताम्बरश्रोणीं लम्बालकलसन्मुखीम्।
बिम्बाधरोष्ठीं कस्तूरिजम्बालतिलकां भजे॥10॥

रत्नोद्दीप्तसुमाङ्गल्यसूत्रावृतशिरोधराम्।
कुण्डलप्रभयोद्दण्डगण्डमण्डलमण्डिताम्॥11॥

कुचकञ्चुकसञ्चारिहारनिष्कमनोहराम्।
काञ्चिकिङ्किणिमञ्जीरकङ्कणाद्यैरलङ्कृताम्॥12॥

सुवर्णमण्टपे रत्नचित्रसिंहासनोत्तमे।
नमामि हरिणा साकमिन्दिरां कृतमन्दिराम्॥13॥

ब्रह्माद्या विबुधश्रेष्ठा ब्रह्माण्याद्याः सुराङ्गनाः।
यां पूजयन्ते सेवन्ते सा मां पातु रमा सदा॥14॥

सर्वालङ्कारभरितौ सर्वज्ञौ सर्वसद्गुणौ।
शर्वादिसर्वभक्तौघसर्वसर्वस्वदायकौ॥15॥

सुमुखौ सुन्दरतरौ सुनासौ सुखचित्तनू।
सुराराधितपादाब्जौ रमानारायणौ स्तुमः॥16॥

चतुष्कपर्दा यादेवी चतुरास्यादिभिः स्तुता।
चतुर्वेदोदितगुणा चतुर्मूर्तेर्हरेः प्रिया॥17॥

घृतप्रतीकां तां नित्यं घृतपूर्णान्नदायिनीम्।

यथेष्टवित्तदात्रीं च नतोऽस्म्यभयदां श्रियम्॥18॥

वादिराजेन रचितं श्रीश्रीशगुणदर्पणम्।

इमं स्तवं पठन्मर्त्यः श्रीमान्स्यान्नात्र संशयः॥19॥

## लक्ष्म्यार्यावृत्तम्॥8॥

ॐ॥ आर्यावृत्तविचित्रा नार्यास्सा जगति सौभगत्वकरी।

वाय्वा (र्या)काशाद्यखिला भूर्यावद्धार्यते तया देव्या॥1॥

उन्मीलय मन्नयने त्वं म(मा)न्ये लक्ष्मिलोकमाताऽसि।

चिन्मयसुभगावयवे कर्मकरः स्यामहं च तव कमितुः॥2॥

मन्मथजननि मनोज्ञेऽहंममतारहितयोगिकुलमहिते।

दृञ्मलमुन्मूलय मे सम्यक् श्रीकृष्णमूर्तिमीक्षेऽहम्॥3॥

कल्मषखण्डनशीले रम्यकपोले सरोजमुखि सुतनो।

अम्लानपद्महस्ते निर्मलमच्चक्षुरीक्षतां कृष्णम्॥4॥

पूर्वं त्रिगुणमयी या सर्वं कार्यं करोति या पश्चात्।

चार्वम्बुजाक्षवीक्षादक्षं मेऽक्षीह सा रमा कुर्यात्॥5॥

वश्यं यस्याः सकलं दृश्यं यस्याः समस्तमपि विश्वम्।

नश्यत्सु या न नश्येत्क्लिश्यत्सु च या कदापि न क्लिश्येत्॥6॥

ज्ञप्तेः करणानि षट् पञ्च कृतेर्हेतुभूतकरणानि।

बुध्येयुर्यत्कृपया सिद्ध्येद्वै तत्फलं च यत्कृपया॥7॥

सा श्रीराश्रितरक्षादीक्षा दुष्कर्मशिक्षणे च पटुः।

अश्वास्यं हि दिदृक्षोर्मेऽक्ष्णोस्तद्वीक्षणोत्सवं दद्यात्॥8॥

सङ्गीतसाङ्गवेदा मङ्गलदेवी मनोज्ञसर्वाङ्गी।

भङ्गादिदोषरहिता तं गुणराशिं ममेक्षयेत्स्वपतिम्॥9॥

शक्तिः संवित्स्फूर्तिर्मतिः प्रवृत्तिश्च यद्वशे नित्यम्।

शक्ता त्वमेव सुजनोद्धर्त्री तन्मे प्रदर्शय स्वपतिम्॥10॥

कुण्डलरत्नतिलकसन्नासामणिकण्ठसूत्रहारधरा।

अङ्गदकङ्कणकाञ्चीकञ्चुकपीतवसनरशनाभा॥11॥

सद्रत्नखचितकिङ्किणिमुद्राग्रेवेयनूपुरादिरुचा।

भद्रोद्यदिन्दुवदना पद्मा मे मध्ववरदमीक्षयतु॥12॥

या देवी निजरमणस्याङ्कगता पश्यति स्म तं सततम्।

तस्याः स्तुतिमिति कृतवान्कृष्णदृगर्थी स वादिराजयतिः॥13॥

## दुर्गास्तव॥9॥

ॐ॥ सन्नद्धसिंहस्कन्धस्थां स्वर्णवर्णां मनोरमाम्।

पूर्णेन्दुवदनां दुर्गां वर्णयामि गुणार्णवाम्॥1॥

किरीटहारग्रैवेयनूपुराङ्गदकङ्कणैः।

रत्नकाञ्च्या रत्नचित्रकुचकञ्चुकतेजसा॥2॥

विराजमाना रुचिराम्बरा किङ्किणिमण्डिता।

रत्नमेखलया रत्नवासोपरि विभूषिता॥3॥

| |
|---|
| वीरश्शृङ्खलया शोभिचारुपादसरोरुहा।<br>रत्नचित्राङ्गुलीमुद्रारत्नकुण्डलमण्डिता॥4॥ |
| विचित्रचूडामणिना रत्नोद्यत्तिलकेन च।<br>अनर्घ्यनासामणिना शोभिताऽऽस्यसरोरुहा॥5॥ |
| भुजकीर्त्या रत्नचित्रकण्ठसूत्रेण चाङ्किता।<br>पद्माक्षिणी सुबिम्बोष्ठी पद्मगर्भादिभिः स्तुता॥6॥ |
| कबरीभारविन्यस्तपुष्पस्तबकविस्तरा।<br>कर्णनीलोत्पलरुचा लसद्भ्रूमण्डलत्विषा॥7॥ |
| कुन्तलानां च सन्तत्या शोभमाना शुभप्रदा।<br>तनुमध्या विशालोरःस्थला पृथुनितम्बिनी॥8॥ |
| चारुदीर्घभुजा कम्बुग्रीवा जङ्घायुगप्रभा।<br>असिचर्मगदाशूलधनुर्बाणाङ्कुशादिना॥9॥ |
| वराभयाभ्यां चक्रेण शङ्खेन च लसत्करा।<br>दंष्ट्राग्रभीषणास्योत्थहुङ्कारार्दितदानवा॥10॥ |
| भयङ्करी सुरारीणां सुराणामभयङ्करी।<br>मुकुन्दकिङ्करी विष्णुभक्तानां मौक्तशङ्करी॥14॥ |
| सुरस्त्रीकिङ्करीभिश्च वृता क्षेमङ्करी च नः।<br>आदौ मुखोद्गीर्णनानाऽऽम्नाया सर्गकरी पुनः॥15॥ |
| निसर्गमुक्ता भक्तानां त्रिवर्गफलदायिनी।<br>निसु(शु)म्भसु(शु)म्भसंहर्त्री महिषासुरमर्दिनी॥16॥ |

तामसानां तमः प्राप्त्यै मिथ्याज्ञानप्रवर्तिका।
तमोभिमानिनी पायाद्दुर्गा स्वर्गापवर्गदा॥17॥

इमं दुर्गास्तवं पुण्यं वादिराजयतीरितम्।
पठन्विजयते शत्रून्मृत्युं दुर्गाणि चोत्तरेत्॥18॥

## श्रीरामपञ्चकम्॥10॥

प्रातः स्मरामि रघुनाथपदारविन्दं मन्दस्मितं मधुरभाषविशालफालम्।
कर्णावलम्बिचलकुण्डललोलगण्डं कर्णान्तदीर्घनयनं नयनाभिरामम्॥

प्रातर्भजामि रघुनाथपदारविन्दं रक्षोगणाय भयदं वरदं द्विजेभ्यः।
यद्राज्यसंसदि विभज्य महेशचापं सीताकरग्रहणमण्डलमाप सध्यः॥2॥

प्रातर्नमामि रघुनाथपदारविन्दं वज्राङ्कुशादिशुभरेखध्वजावहं मे।
योगीन्द्रमानसमधुव्रतसेव्यमानं शापापहं सपदि गौतमधर्म्यपत्न्याः॥3॥

प्रातः श्रये श्रुतिनुतां रघुनाथकीर्तिं नीलाम्बुदोत्पलसितेतररत्ननीलाम्।
आमुक्तमौलिकविभूषणभूषणाढ्यां ध्येयां समस्तमुनिभिर्जनमृत्युहन्त्रीम्॥4॥

प्रातर्वदामि वचसा रघुनाथनाम वाग्दोषहारि सकलं शमलं निहन्ति।
यत्पार्वती स्वपतिना सह भोक्तृकामा प्रीत्या सहस्रहरिनामसमं जजाप॥5॥

यः श्लोकपञ्चकमिदं नियतं पठेद्यः प्रातः प्रभातसमये पुरुषः प्रबुद्धः।
श्रीरामकिङ्करजनेषु स एव मुख्यो भूत्वा प्रयाति हरिलोकमनन्यलभ्यम्॥6॥

वादिराजयतिप्रोक्तं पञ्चकं जानकीपतेः।
श्रवणात् सर्वपापघ्नं पठनान्मुक्तिदायकम्॥7॥

## श्रीरामकवचम्॥11॥

| |
|---|
| कपिकटकधुरीणः कार्मुकन्यस्तबाणः क्षपितदितिजसैन्यःक्षत्रियेष्वग्रगण्यः।<br>जलधिरचितसेतुर्जानकीतोषहेतुः पथि पथि गुणसान्द्रः पातु मां रामचन्द्रः॥1॥ |
| श्रीमत्किरीटविभ्राजिशिरा रामः शिरोऽवतु।<br>कुटिलालकसंशोभिललाटान्तः सुरार्थितः॥2॥ |
| माणिक्यमौक्तिकोद्भासितिलकः सूर्यवंशजः।<br>ललाटं पातु सुभ्रूर्मे कौलस्यानन्दनो भ्रुवौ॥3॥ |
| धनुर्विद्यापारदृश्वा नेत्रे पात्वब्जलोचनः।<br>लसन्नासापुटो नासां विश्वामित्रवृतोऽवतु॥4॥ |
| बिम्बोष्ठोऽव्यान्मदीयौष्ठौ शम्भुकार्मुकभञ्जनः।<br>कुन्दकोशलसद्धन्तो दन्तान्मे जानकीपतिः॥5॥ |
| मनोज्ञरसनो जिह्वां पातु लोकमयान्तकृत्।<br>वाचं व्याख्याविदग्धोऽव्यात्त्यक्तसाम्राज्यसम्भ्रमः॥6॥ |
| आस्यं चन्द्रोपमास्योऽव्याद्रामचन्द्रो वनेचरः।<br>कम्बुग्रीवोऽवतु ग्रीवां खरदूषणसैन्यजित्॥7॥ |
| चारुदीर्घकरः पाणी मारीचमृगलुब्धकः।<br>कङ्कणाङ्गदमुद्राढ्योऽङ्गुलीस्त्यक्तप्रियाकृतिः॥8॥ |
| पातु पीनांसयुग्मोऽसौ हनूमन्नयनोत्सवः।<br>हारकौस्तुभभूत्कण्ठमूलं सुग्रीवसख्यकृत्॥9॥ |

उरः पातु महोरस्कःतालात्मासुरखण्डनः।
मध्यं कृशलसन्मध्यः पातु वाल्यङ्गभेदनः॥10॥

दर्भशायी विभुः पातु वलीस्त्रिवलिपल्लवः।
तनूदरः पातु कुक्षिं कृतसेतुर्महार्णवे॥11॥

निम्ननाभिः प्रभुः पातु नाभिं कपिचमूपतिः।
पीताम्बरः स्फुरत्काञ्चीद्योतमानकटिद्वयः॥12॥

लङ्काप्राकारनिर्भेदी रामः पातु कटिं मम।
उरू करिकरोरुर्मे चारुबाणधनुर्धरः॥13॥

जृम्भिरावणसैन्याब्धिकुम्भसम्भवकोटिधूः।
जानुनी वृत्तविलसज्जानुयुग्मो ममावतु॥14॥

कुम्भकर्णादिनिर्भङ्गदम्भोलिसमसायकः।
जङ्घे तुङ्गेभदन्ताभजङ्घायुग्मोऽवतु प्रभुः॥15॥

दशाननशिरोरण्यपरश्वधपराक्रमः।
मुक्ताङ्कुरसमश्रीमद्गुल्फो गुल्फौ ममावतु॥16॥

ससम्भ्रमसुरश्रेणीशिरोजुष्टाङ्घ्रिपल्लवः।
पादौ रक्षतु मे नित्यं विभीषणपदप्रदः॥17॥

नखान् पातु नखश्रेणीशशिद्योतितदिङ्मुखः।
अग्निज्वालोदितस्वीयसीतोवीतच्छिदाकृतिः॥18॥

रक्तपादतलादित्यः पातु पादतले मम।
प्राप्तायोध्यापुरैश्वर्यः प्राच्यां पातु मनोरमः॥19॥

| |
|---|
| धर्मप्रवर्तकः पायादवाच्यां नीरदद्युतिः।<br>पातु प्रतीच्यां यज्वीन्द्रो हनूमत्पारमेष्ठ्यदः॥20॥ |
| उदीच्यामुद्गतायोगविदेहतनयाप्रियः।<br>अधोऽधःकृतपापौघः पातु रामोऽखिलाग्रणीः॥21॥ |
| ऊर्ध्वमुन्नीतसञ्जीवनानासङ्गसुखप्रदः।<br>य इदं रघुनाथस्य कवचं बिभृयान्नरः॥22॥ |
| यतिना वादिराजेन रचितं निर्मलं दृढम्।<br>स्प्रष्टं तं नैव रक्षांसि पापानि रिपवोऽपि वा॥23॥ |
| विपदो व्याधयो वाऽपि शक्नुवन्ति शरोपमाः।<br>अरिं जित्वा तु संसारं यस्यात्यन्तेऽपुनर्भवम्॥24॥ |

## श्रीरामदशकम्॥12॥

| |
|---|
| ॐ॥ हे राम जलदश्याम स्वामिन्निर्दोषपूरुष।<br>भीम तामसयोनीनां मा मा मुञ्च तवानुगान्॥1॥ |
| उपकृत्यै सज्जनानामपकृत्यै तथाऽसताम्।<br>नमतामंहसो हत्यै भूत्यै सर्वदिवौकसाम्॥2॥ |
| भीत्यै खरादिदैत्यानां प्रीत्यै च वनवासिनाम्।<br>स्वस्यापि महिमोन्नत्यै नीत्यै चारण्यचारिणौ॥3॥ |
| ब्रह्मरुद्रादिभिर्देवैरर्चितौ श्रुतिचर्चितौ।<br>ज्ञानानन्दमयौ ध्यातृप्रियौ सर्वगुणाश्रयौ॥4॥ |

ध्वजवज्राङ्कुशाम्भोजराजितौ राजपूजितौ।
रक्तपद्मोपमौ ध्वस्तश्रमौ विद्रावितभ्रमौ॥5॥

नारीकृतशिलौ रम्यतळौ दिव्याङ्गुलीदलौ।
वृत्तमौक्तिकसङ्काशनखौ त्रिजगतीसुखौ॥6॥

विचित्रभूषणोपेतौ भीषणौ त्यक्तदूषणौ।
लक्ष्मीधराकराम्भोजसेवितौ सिद्धभावितौ॥7॥

अनन्तवैदिकपदास्पदौ स्वजनसम्पदौ।
अजाण्डभञ्जनौ धूताञ्जनौ भुवनरञ्जनौ॥8॥

क्ष्माभारहारिणौ मुक्तिकारिणौ भववैरिणौ।
पार्थदत्तधनौ युक्त्याऽपार्थीकृतसुयोधनौ॥9॥

ते वनौत्सुक्यतो भूमिपावनौ प्रणतावनौ।
सीताभिरामौ श्रीरामचरणौ शरणं मम॥10॥

इमानि दश पद्यानि श्रमापहृतये सताम्।
यतिना वादिराजेन कृतिना रचितानि वै॥11॥

## रौप्यपीठकृष्णस्तुतिः॥13॥

पालयाच्युत पालयाजित पालयाकमलालय।
लीलयाधृत भूधराम्बुरुहोदर स्वजनोदर॥ध्रु॥

मध्वमानसपद्मभानुसमं स्मर प्रति संस्मर

स्निग्धनिर्मलशीतकान्तिलसन्मुखं करुणोन्मुखम्।
हृद्यकम्बुसमानकन्धरमक्षयं दुरितक्षयं

| |
|---|
| स्निग्धसंस्तुतरौप्यपीठकृतालयं हरिमालयम्॥ 1 ॥ पा.. |
| अङ्गदादिसुशोभिपाणियुगेन सङ्क्षुभितैनसं |
| तुङ्गमाल्यमणीन्द्रहारसरोरसं खलनीरसम्।<br>मङ्गलप्रदमन्थदामविराजितं भजताजितं |
| तं गृणे वररौप्यपीठकृतालयं हरिमालयम्॥ 2॥ पा.. |
| पीनरम्यतनूदरं भज हे मनः शुभ हे मनः |
| स्वानुभावनिदर्शनाय दिशन्तमर्थिसुशन्तमम्।<br>आनतोऽस्मि निजार्जुनप्रियसाधकं खलबाधकं |
| हीनतोज्झितरौप्यपीठकृतालयं हरिमालयं ॥3॥ पा.. |
| हेमकिङ्किणिमालिकारशनाञ्चितं तमवञ्चितं |
| रक्तकाञ्चनचित्रवस्त्रकटिं घनप्रभया घनम्।<br>कम्रनागकरोपमोरुमनामयं शुभधीमयं |
| नौम्यहं वररौप्यपीठकृतालयं हरिमालयम्॥ 4॥ पा.. |
| वृत्तजानुमनोज्ञजङ्घममोहदं परमोहदं |
| रत्नकल्पनखत्विषा हृतहृत्तमस्तुतिमुत्तमम्।<br>प्रत्यहं रचितार्चनं रमया स्वयाऽऽगतयास्वयं |
| चित्त चिन्तय रौप्यपीठकृतालयं हरिमालयं॥ 5॥ पा.. |
| चारुपादसरोजयुग्मरुचाऽमरोच्चयचामरो- |
| दारमूर्धजभारमण्डलरञ्जकं कलिभञ्जकम्।<br>वीरतोचितभूषणं वरनूपुरं स्वतनूपुरं |

धारयाऽऽत्मनि रौप्यपीठकृतालयं हरिमालयम्॥6॥ पा..

शुष्कवादिमनोऽतिदूरतरागमोत्सवदागमं

सत्कवीन्द्रवचोविलासमहोदयं महितोदयम्।

लक्षयामि यतीश्वरैः कृतपूजनं गुणभाजनं

धिक्कृतोपमरौप्यपीठकृतालयं हरिमालयम्॥7॥ पा..

नारदप्रियमाविशाम्बुरुहेक्षणं निजलक्षणं

तारकोपमचारुदीपचयान्तरे गतचिन्त रे।

धीर मानस पूर्णचन्द्रसमानमच्युतमानम

द्वारकोपमरौप्यपीठकृतालयं हरिमालयम्॥8॥ पा..

रौप्यपीठकृतालयस्य हरेः प्रियं दुरिताप्रियं

तत्पदार्चकवादिराजयतीरितं गुणपूरितम्।

गोप्यमष्टकमेतदुच्चमुदे ममास्त्विह निर्मम

प्राप्यसौख्यफलाय तत्र सुकोमलं हृतधीमलम्॥9॥

पालयाच्युत पालयाजित पालयाकमलालय।

लीलयाधृतभूधराम्बुरुहोदर स्वजनोदर॥

## श्रीकृष्णस्तुतिः॥14॥

ॐ हितं न जानाम्यहितं न जाने नाकर्तुमीशो न च कर्तुमीशः।

यथा नटान्नाटकदारुयन्त्रं तथा हरेः प्रेरणयैव वर्ते॥1॥

यद्भूत्तद्धरेर्यच्च नाभूतच्च हरेः परात्।

जीवो विष्टिगृहीतोऽस्मात्किं भवेत्किं च नो भवेत्॥2॥

| |
|---|
| कर्मणो यदि तत्कर्म स्वानिष्टं कुरुते कुतः।<br>अनाद्यनिष्टकर्माणि करोत्यन्यवशो ध्रुवम्॥3॥ |
| नित्यो जीवोऽस्वतन्त्रश्चेदनित्यं कर्म जन्मनि।<br>स्थितौ लये परापेक्षमन्याधीनं कथं न तत्॥4॥ |
| यत इत्येकवचनादेको दाधार चेत्यलम्।<br>स्पष्टश्रुतेर्न कर्माणि कर्मद्वारा न चेतनाः॥5॥ |
| अनन्ताः सर्वजगतां कर्तारो लाघवादपि।<br>लोकेऽदृष्टद्वारकर्तृमात्रात्क्वापि क्रियाजनेः॥6॥ |
| कृतिपूर्वककर्तैव कर्ताऽन्यस्तूपचारतः।<br>अन्यथा कन्यकायाः स्याद्भर्ताऽपि पितृवत्पिता॥7॥ |
| अतो नामुख्यकत्रैव महाकार्यमिदं भवेत्।<br>किं स्त्रीपुंसोर्विनाऽपि स्यात्पुत्रः पुत्रेष्टिमात्रतः॥8॥ |
| न चेदुपादानमपि तद्वत्स्यादौपचारिकम्।<br>दृष्टानुसारतस्तच्चेत्कर्ताऽपि स्यात्तथैव हि॥9॥ |
| अदृष्टमपि बीजाद्यं कल्प्यं फलबलाद्यथा।<br>तथाऽदृष्टोऽपि कर्ताऽस्य कल्प्यः कोऽप्युरुशक्तिमान्॥10॥ |
| न च कालादिकं तस्य प्रेरकं जडवस्तुनः।<br>स्वतः प्रवृत्त्ययोगेन प्रेर्यत्वात्कर्तृतोऽन्यतः॥11॥ |
| नापि तत्प्रेरको ब्रह्मा नेशो नेन्द्रोऽपरे कुतः।<br>अब्ध्यर्चनेन तत्तीर्थजुष्या तद्दत्तभूत्वतः॥12॥ |

| |
|---|
| किञ्च सृज्यं वशे स्रष्टुर्हार्यं हर्तुर्वशे परम्।<br>पातुर्वशे स्थितं सर्वमतो विष्णोर्वशेऽखिलम्॥13॥ |
| न पिताऽधिपतिर्नृणां न हर्ता यामकोऽपि वा।<br>किन्तु रक्षक एवातो विष्णुरेव जगत्पतिः॥14॥ |
| दशदिक्पतिभावेन देवा ब्रह्मेशपूर्वकाः।<br>खण्डाधिपतयो विष्णुस्तदभावाज्जगत्पतिः॥15॥ |
| अस्य देवस्येति वेदे यथा विष्णोर्वशे हरः।<br>स्पष्टं श्रुतस्तथा वेदे न क्वापीशवशे हरिः॥16॥ |
| श्रौतो लब्धपदः सोमो नेशो वेदविदां मते।<br>विश्वाधिकत्वगीः सावकाशेन्द्रादिश्रुताविव॥17॥ |
| सोऽरोदीदिति वेदे हि रोदनाद्रुद्रतोदिता।<br>न ते महित्वमिति तु विष्णोरसमतोदिता॥18॥ |
| या ह्युच्छेषणभागो वै रुद्र इत्याह वेदवाक्।<br>जुषेथां यज्ञमित्याद्या सा विष्णुं वक्त्यतस्स राट्॥19॥ |
| प्रलये वटपत्रेऽप्सु शेते नारायणः किल ।<br>तदा क्वान्ये सुरास्तस्मात्सर्वेशो विष्णुरेव हि॥20॥ |
| किञ्च गीतोपनिषदि सर्वं द्विपुरुषाख्यया।<br>सङ्गृहीतं हरिस्त्वेकः पुरुषोत्तम ईरितः॥21॥ |
| रामः प्रभू रामभृत्या देवाः सर्वेऽपि वानराः।<br>कृष्णः प्रभुः कृष्णभृत्या देवा धर्मात्मजादयः॥22॥ |

अर्हत्तमो ह्यग्रपूजामर्हत्यन्यो न संसदि।
यथैवेह तथाऽमुत्र तद्विष्णुरखिलप्रभुः॥23॥

तस्मात्सर्वेश्वरो विष्णुः सर्वं सर्वत्र सर्वदा।
प्रवर्तयति सर्वत्र सर्वशक्तिः सनातनः॥24॥

यद्भूतं भूतमेतस्माद्भवच्च भवति प्रभोः।
भाव्यं भविष्यतीह्यस्य कृपया नान्यतः क्वचित्॥25॥

अतः सर्वेष्टलाभाय सर्वानिष्टनिवृत्तये।
तमर्ज्यमर्चय स्तुत्यं स्तुहि नम्यं नमाच्युतम्॥26॥

वादिराजयतिप्रोक्तमेवं कृष्णस्तवं नवम्।
पठन् सर्वेष्टमाप्नोति सर्वानिष्टनिवृत्तिमान्॥27॥

## श्रीकृष्णस्तुतिः॥15॥

ॐ। यदि दिशसि नयनपटुतां तर्हि भवच्चरणकमलसेवायै।
आयास्यामि दयालो कृष्ण न चेत्पूजयामि कथमन्धः॥1॥

सम्भावितस्य पुंसो मरणादतिरिच्यते किलाकीर्तिः।
इति गीतासु हि गीतं भवता भवतापतिमिररवे॥2॥

नानापराधशतकं हीने यद्यस्ति कृष्ण मयि मत्ते।
दीनानामुद्धर्त्रा क्षन्तव्यं तत्क्षमावता भवता॥3॥

कुन्तलसन्ततिलसितं चूडात्रयशोभिमौलिभागमहम्।
शतपत्रपत्रनेत्रं शशिवदनं प्रतिदिनं दिदृक्षामि॥4॥

कुण्डलमण्डितगण्डं कम्बुग्रीवं मनोरमोरस्कम्।
दण्डं दाम च दधतं पाण्डवसखमर्च्यमर्चयामि कदा॥5॥

रम्यतमोदरजघनं कम्रोरुं वृत्तजानयुगजङ्घम्।
रक्ताब्जसदृशपादं हस्ताभ्यां त्वाऽर्चयामि सदय कदा॥6॥

दोषादिदूरं शुभगुणराशिं दासीकृताखिलानिमिषम्।
भूषणभूषितगात्रं नेत्राभ्यां चित्रचरित वीक्षे त्वाम्॥7॥

मध्वप्रतिष्ठितं त्वां विध्वस्ताशेषकुजनकुलम्।
मूर्ध्ना प्रणम्य याचे तद्विरचय यद्धितं ममाद्य हरे॥8॥

स्तुतिमिति पुण्यकथन ते प्रथितकृते वादिराजयतिरकृत।
सततं पठतां हि सतामतिविशदां देहि कृष्ण विततमतिम्॥9॥

## अष्टमहिषीयुक्तकृष्णस्तोत्रम्॥16॥

ॐ॥ हृद्गुहाश्रितपक्षीन्द्रवल्गुवाक्यैः कृतस्तुते।
तद्गरुत्कन्धरारूढ रुक्मिणीश नमोऽस्तु ते॥1॥

अत्युन्नत्याऽखिलैः स्तुत्य श्रुत्यन्तात्यन्तकीर्तित।
सत्ययोहित सत्यात्मन् सत्यभामापते नमः॥2॥

जाम्बवत्याः कम्बुकण्ठालम्बिजृम्भिकराम्बुज।
शम्भुत्र्यम्बकसम्भाव्य साम्बतात नमोस्तु ते॥3॥

नीलाय विलसद्भूषाजालायोज्ज्वलमालिने।
लोलालकोद्यत्फालाय कालिन्दीपतये नमः॥4॥

जैत्रचित्रचरित्राय शत्रवानीकमृत्यवे।

मित्रप्रकाशाय नमो मित्रविन्दाप्रियाय ते॥5॥

बालानेत्रोत्सवानन्तलीलालावण्यमूर्तये।

नीलाकान्ताय ते भक्तावालायाऽस्तु नमो नमः॥6॥

भद्राय स्वजनाविद्यानिद्राविद्रावणाय वै।

रुद्राणीभद्रमूलाय भद्राकान्ताय ते नमः॥7॥

रक्षिताखिलविश्वाय शिक्षिताखिलरक्षसे।

लक्षणापतये नित्यं भिक्षुश्लाघ्याय ते नमः॥8॥

षोडशस्त्रीसहस्त्रेशं षोडशातीतमच्युतम्।

ईडेत वादिराजोक्तप्रौढस्तोत्रेण सन्ततम्॥9॥

## आपादस्तोत्रम्॥17॥

ॐ॥ मध्वाद्दतं रजतपीठकृताधिवासं हृद्यं मुदेऽस्तु मुरमर्दनपादपद्मम्।

सद्योऽभिजातसुसरोजनवावभासस्पर्धिप्रभाविभवदीपितदिक्प्रदेशम्॥1॥

उद्यन्नखेन्दुरुदयं हृदि नस्तनोतु मध्वागमोत्सवमहाङ्कुरपोषहेतुः।

पद्मोपरिस्फुरितमौक्तिकचारुभावप्रद्वेष्यघौघतिमिरप्रशमाय विष्णोः॥2॥

जङ्घायुगं जनयतु श्रियमन्वहं मे तुङ्गेन्दिराकरसरोरुहरङ्गसङ्गि।

सञ्जातपल्लवितचारुलतापरीतस्तम्भोपमानपरमन्दिरमच्युतस्य॥3॥

ऊरुद्वयं सततमुच्चपदं ददातु श्रीरूप्यपीठनिलयस्य हरेहरीड्यम्।

वृत्तावलम्बिकरिपोतमृदुप्रपुष्टहस्तद्वयप्रतिममप्रतिमस्य तस्य॥4॥

पीनं हरेरुदरमादरतस्स्मरामि ज्ञानात्मकस्य नवनीतजगन्निकेतम्।
आनन्दतीर्थनयनाभिधमीनमान्यश्रीनिम्ननाभिसरसीरुचिरं चिरं तत्॥5॥

वक्षस्थलं विशदहारविराजि विष्णोर्लक्ष्मीविशालगृहमस्तु ममान्तरङ्गे।
नक्षत्रराजिसुविराजिनिशेशबिम्बलक्ष्याम्बरोपममपारगुणाम्बुराशेः॥6॥

रत्नौघचञ्चुफणपञ्चकभोगिभोगंस्वस्पर्धि जेतुमिव दण्डसुपाशधारि।
सत्कङ्कणाङ्गदसुशोभशुभाङ्गुलीयं हस्तद्वयं मम तनोत्वभयं मुरारेः॥7॥

वक्रालकं वरनसोज्ज्वलकुण्डलाभ्यां युक्तं त्रिरेखिगलमुन्नतमौलिबन्धम्।
वक्त्रं विभोर्मधुपमौक्तिकमत्स्यसङ्घशैवालशालिकमलद्युति मेऽक्षिण भूयात्॥8॥

अम्लानपद्मदलमात्मरुचाऽनुकुर्वदाम्नायकोविदबुधेष्टकृतप्रचारम्।
रम्यं विलोचनयुगं श्रितमीक्षतां मां सन्मध्वपूजितपदाब्जयुगस्यतस्य॥9॥

मुग्धाननेन नयनेन करेण नाभिच्छिद्रेण पादयुगलेन धृताब्जसाम्यम्।
पद्मालयोज्झति कदाऽपि न देवमेनं मध्वप्रियं त्विति किमत्र गिरां विचारैः॥10॥

आपादमा च मकुटान्मुरवैरिणोऽत्र स्तोत्रं तदेतदनवद्यमवद्यजैत्रम्।
गोपालवाजिमुखकिङ्करवादिराजप्रोक्तं पठन् भवति तत्सदयाक्षिलक्ष्म्॥11॥

## उक्तिप्रत्युक्तिस्तोत्रम्॥18॥

ॐ अङ्गुल्या कः कवाटं प्रहरति कुटिले माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणिधरः किं द्विजिह्वः फणीन्द्रः।
नाहं घोराहिमर्दी खगपतिरसि किं नो हरिः किं कपीन्द्र-
स्त्वित्येवं गोपकन्याप्रतिवचनजडः पातु मां पद्मनाभः॥1॥

कृष्ण त्वं क्व गतोऽसि चाद्य मृगयासक्तो वनान्तं गतो
गन्धोऽन्यो वनपुष्पजः श्रमजलं धर्मक्षतं कण्टकैः।
अस्त्वेवं मृगया तु केनचिदहो दष्टोऽधरो दृश्यते
शङ्कापूरणमत्र कारणमिदं कुर्यां प्रभाणानि ते॥2॥

अम्भस्ते शयनीयमेतदुदधेर्लीनोपधानं फणी
त्वत्तेजः परमाणुरेष दहनो भृत्यास्समस्तास्सुराः।
कुक्षिन्यस्तसमस्तभारजगतः किं स्यात्तुलारोपणे
व्यर्थं वाच्यमिदं स्त्रियोपहसितः स्मेरो हरिः पातु नः॥3॥

## श्रीकृष्णरामावतारचरितरत्नसङ्ग्रहः॥19॥

ॐ॥ क्षीराम्बुधौ फणिपतेर्मृदुभोगशय्या-
शायी रमाकरसरोरुहलालिताङ्घ्रिः।
आनन्दमूर्तिरखिलामरमौलिरस्मान्
नानावतारजितदैत्यजनः स पायात्॥1॥

ब्रह्मेशशक्रमुखदेववरार्थितो यः
श्रीदेवकीतनयतामधिगम्य गोष्ठे।
प्राक्पूतनाशकटवातविनाशकारी
भूत्वा बभञ्ज शिशुरर्जुनपादपौ द्वौ॥2॥

| |
|---|
| तत्रोत्थितौ स्वशरणावनुगृह्य गोपी-<br>गेहेषु दुग्धनवनीतदधीनि भुक्त्वा।<br>वृन्दावनं प्रतिगतोऽथ निहत्य वत्स-<br>दैत्यं बकं च निजकाळियशिक्षकोऽभूत्॥3॥ |
| दत्वाऽभयं च पुनरत्र निशि प्रवृद्धं<br>पीत्वा दवाग्निमथ गोकुलमुग्रवृष्टेः।<br>गोवर्धनोच्चगिरिमेककरेण बिभ्र-<br>द्वालोऽभिरक्ष्य विमदेन्द्रकृतार्हणोऽभूत्॥4॥ |
| रासोत्सवे व्रजवधूभिरथो विहृत्य<br>स्वानन्दमूर्तिरवधीन्निशि शङ्खचूडम्।<br>पश्चादरिष्टमथ केशिवधं विधाय<br>साकं बलेन मधुरां नगरीं जगाम॥5॥ |
| कुब्जासुदामवरदो रजकं निहत्य<br>छित्वा धनुः स निहतेभवरोऽथ मल्लान्।<br>कंसं च संसदि विमृद्य मुदं स्वपित्रो-<br>र्दत्वा जरासुतबलं बहुशो जघान॥6॥ |
| द्वारवतीं पुरमथो विरचय्य तस्यां<br>बन्धूंन्विधाय यवनं मुचुकुन्ददृष्ट्या।<br>दग्ध्वाऽथ भीष्मकसुतादिनिजाष्टपत्नी-<br>हस्तं प्रगृह्य मुरजिन्नरकं ममर्द॥7॥ |

कन्यासहस्रवरतां प्रतिपद्य देवान्
निर्जित्य कल्पतरुमात्मपुरं निनाय।
प्रद्युम्नमुख्यतनयान्सुबहून्स सृष्ट्वा
कृष्णोऽथ पौण्ड्रकमुखासुरमर्दनोऽभूत्॥8॥

संसाध्य धर्मतनयस्य स राजसूयं
हत्वाऽथ तत्र शिशुपालमथाग्रपूजाम्।
जग्राह तीर्णवनवासमहाम्बुराशेः
पार्थस्य सारथिरभूत्कुरुभूमियुद्धे॥9॥

दुर्योधनं सह बलेन विनाश्य पार्थान्
कृत्वा क्रमेण चतुरन्तधराधिनाथान्।
निष्कण्टकैर्निजजनैः सहितः सपुत्र-
पौत्रः शशास जगतीं जगदेकनाथः॥10॥

हत्वा पूतनिकां विभज्य शकटं वातं निहत्यार्जुनौ
छित्वा वत्सबकौविनाश्य फणिजित्पीतानलः पर्वतम्।
धृत्वा गोपवधूः प्रतोष्य जनकार्तिघ्नो वृषं केशिनं
जित्वज्वीं प्रणतां विधाय धनुरुच्छिद्येभमल्लानहन्॥11॥

कंसारिर्जितमागधो यवनजित्स्वीयाष्टपत्नीपतिः
हत्वोग्रं नरकं वधूततिवृतो जित्वाऽमरान्स्वस्तरुम्।
लब्ध्वा पौण्ड्रककाशिराजशिशुपालघ्नः कुरुणां बलं
दग्ध्वा सारथिरर्जुनस्य जगतीं कृष्णः शशास प्रभुः॥12॥

कृष्णः पूतनिकारिरस्तशकटो वातान्तकः पादप-
च्छेत्ता वत्सबकाहिजिद्धृतगिरिर्गोपीष्टदोऽरिष्टहृत्।
केशिघ्नो हतमल्लकंसयवनक्ष्माजारिराप्ताबला-
साहस्रोऽर्जुनसारथिः कुरुबलं हत्वा ररक्ष क्षितिम्॥13॥

कौसल्यासुत ताटकामथ मखत्रातर्मुनिस्त्रीहित
छित्रेष्वासन जानकीवृत वनावासन् खराद्यन्तक।
मारीचघ्न हनूमदीश रविजार्तिच्छेद बद्धाम्बुधे
सेनाभ्रातृसमेत रावणरिपो सीतेष्ट रामाव माम्॥14॥

सङ्गृह्य पद्ममयसूत्रवरेण कृष्णरामावतारचरिताभिधरत्नराशिम्।
तद्भक्तभूसुरकृतेऽकृत वादिराजभिक्षुः पठत्कविकदम्बककण्ठभूषाम्॥15॥

## अवतारत्रयस्तोत्रम्॥20॥

ॐ॥ मध्वहृत्कमलस्थितं वरदायकं करुणाकरं
लक्ष्मणाग्रजमक्षयं दुरितक्षयं कमलेक्षणम्।
रावणान्तकमव्ययं वरजानकीरमणं विभुं
अञ्जनासुतपाणिकञ्जनिषेवितं प्रणामाम्यहम्।
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्त्र नमोस्तुते॥1॥

देवकीतनयं निजार्जुनसारथिं गरुढध्वजं
पूतनाशकटासुरादिखलान्तकं पुरुषोत्तमम्।
दुष्टकंसनिमर्दनं वररुग्मिणीपतिमच्युतं
भीमसेनकराम्बुजेन सुसेवितं प्रणमाम्यहम्।
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्र नमोऽस्तु ते॥2॥

ज्ञानमुक्तिसुभक्तिदं वरबादरायणमव्ययं
कोटिभास्करभासमानकिरीटकुण्डलमण्डितम्।
वाक्सुदर्शनतः कलेः शिराघातकं रमया युतं
मध्वसत्करकञ्जपूजितमक्षयं प्रणमाम्यहम्।
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्र नमोऽस्तु ते॥3॥

## पाषण्डखण्डनं व्यासस्तोत्रम्॥21॥

ॐ॥ भीष्मेण काम्यकवने धर्मराजं नृपं प्रति।
सत्यं सत्यमिति श्लोकौ भुजावुद्धृत्य पीवरौ॥1॥

उक्तः किल सभामध्ये कथेयमखिला स्फुटम्।
शेषधर्माश्चर्यपर्वद्वितीयाध्यायमध्यगा॥2॥

अतस्तस्य भुजावेव छेद्यौ यद्यस्ति पौरुषम्।
व्यासस्तु तां कथां ग्रन्थे निबबन्धपरं सुधीः॥3॥

किं यमः पापिनं हन्यात्किं वा पापस्य साक्षिणः।
हृता सीता रावणेनेत्युक्ते न हि जटायुषः॥4॥

शिरश्चिच्छेद भगवान्नामो राजीवलोचनः।
किन्तु भार्यापहर्तारं जघान युधि रावणम्॥5॥

इदं निदर्शनं पश्यमाऽविवेके मनः कृथाः।
उद्धृत्य शेषधर्मस्थवाक्यान्यपि च कानिचित्॥6॥

मन्दानामुपकाराय दर्शयिष्यामि तत्त्वतः।

**युधिष्ठिर उवाच -**

पितामह महाप्राज्ञ सर्वशास्त्रविशारद॥7॥

कृष्णो धर्मे च मे भक्तिर्यथा स्याद्धि तथा वद।

**भीष्म उवाच–**

शृणु पाण्डव वक्ष्यामि हरिभक्तिं सुदुर्लभाम्॥8॥

श्रोतॄणां सर्वपापघ्नीं वदतां च युधिष्ठिर।
सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते॥9॥

वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम्।
सत्यं वच्मि हितं वच्मि सारं वच्मि पुनः पुनः॥10॥

असारे दग्धसंसारे सारं यद्विष्णुपूजनम्।
उद्धृत्य स्वभुजौ भीष्मः शशंस किल संसदि ॥11॥

एवं च व्यासदेवस्य कोऽपराधो विचारय।
अतो मध्वमुनेर्वाक्ये भारतज्ञशिरोमणेः॥12॥

| |
|---|
| उद्धृतं बाहुयुगलं यथा भवति वै तथा।<br>भीष्माचार्यकृतस्योग्रशपथस्य समीरितम्॥13॥ |
| यत्र तद्वै व्यासवचः श्रृणुतेत्येव योजना।<br>तत्तत्कृत्यानुवक्ता च शास्त्राचार्योऽखिलस्य च॥14॥ |
| अशेषनिगमोद्धर्ता हर्ता दुस्समयस्य च।<br>मनस्सङ्कल्पमात्रेण कुरुपाण्डवसेनयोः॥15॥ |
| कर्ता सत्यवतीपुत्रोविहर्ता मुनिमण्डले।<br>राजसूयस्य चाचार्यः सर्पयागस्य च प्रभुः॥16॥ |
| कस्तस्य भुजयोश्चेत्ता किं वा तच्छेदकारणम्।<br>भ्रममूला ततस्सर्वा कथाऽऽसीद्व्यासवैरिणाम्॥17॥ |
| रजकद्रोहतो भिक्षोः शूलारोपणवाक्यवत्।<br>भ्रामकं तस्य शास्त्रं च यत्रेत्थं समुदीरितम्॥18॥ |
| नारीसङ्गममत्तोऽसौ यस्मान्मामवमन्यते।<br>योनिलिङ्गस्वरूपं हि तस्मादस्य भविष्यति॥19॥ |
| इति पाद्मपुराणोक्तभृगुशापस्य साहसम्।<br>पश्यन्तु पञ्च शीर्षाणि भुजानां तु चतुष्टयम्॥20॥ |
| द्वौ पादावुदरं वक्षः कटी चोरू च दूर्जटेः।<br>विच्छिद्य तत्क्षणादेव पेतुः किल महीतले॥21॥ |
| शिश्नमात्रं तूर्वरितं तच्च योन्यां निवेशितम्।<br>अत्र प्रमाणं शैवानां कण्ठेकण्ठेऽवलम्बिनी॥22॥ |

लिङ्गमालैव या नित्यं करे वामे प्रपूज्यते।

अतः पाद्मोदितकथा शैवानामपि सम्मता॥23॥

हस्तद्वयवती रम्यजटामण्डलमण्डिता।

पद्मपादा श्यामवर्णा लसत्कृष्णाजिनोज्ज्वला॥24॥

मन्दस्मिता चन्द्रमुखी बिम्बोष्ठी पङ्कजेक्षणा।

कुन्दकुङ्मलदन्ताभा सान्द्रकुन्तलसङ्कुला॥25॥

कन्दर्पकोटिसदृशी सौन्दर्याम्बुधिमन्दिरा।

वन्दारुणामभयदा वन्द्यमाना सुरैर्नरैः॥26॥

अद्यापि पूज्यते व्यासप्रतिमा ज्ञानदायिनी।

चित्रकैर्लिख्यते भित्तौ मन्त्रशास्त्रेषु वर्ण्यते॥27॥

अहो व्यासभुजच्छेदमाशासानस्य दुर्मतेः।

स्वदैवसर्वगात्राणां छेदः खेदकरोऽभवत्॥28॥

तद्वृद्धिमिच्छतो मूलच्छेदोऽभूत्तव दुर्जन।

यद्व्यासाय द्रुह्यतस्ते शिवद्रोहोऽभवद्ध्रुवः॥29॥

विवादपरिहाराय कथेयं ग्रथिताऽखिला।

यतिना वादिराजेन व्यासकैङ्कर्यकामिना॥30॥

## व्यासास्तुतिः (व्यासाष्टकम्) ॥22॥

ॐ॥ श्रीशं विचित्रकवितारसपूरिताशं श्रीशङ्करोरगखगेन्द्रहृदब्जवासम्।

आशङ्कमानजनतृप्तिकरोक्तिहासं व्यासं नतोऽस्मि हरितोपलसन्निकाशम्॥1॥

| |
|---|
| वेदान्तसूत्रपवनोद्धृतपञ्चवेदामोदांशतोषितसुरर्षिनरादिभेदाम्।<br>बोधाम्बुजातलसितां सरसीमगाधां श्रीदां श्रितोऽस्मि शुकतातपदामखेदाम्॥2॥ |
| द्वैपायनो जयति यन्निजशक्तिदीपः पापाभिवर्धितकुवादितमिस्रतापः।<br>पापाख्यदुर्भगदशाकृततीव्रकोपः पापाद्भुतौषधिरगे श्वसनांशरूपः॥ |
| इन्द्रादिदैवतहृदाख्यचकोरचन्द्रामन्दांशुकल्पशुभजल्पितपुष्पवृन्दः।<br>वृन्दारकाङ्घ्रिपलतागुणरत्नसान्द्रोमन्दाय मे फलतु कृष्णतरुः फलं द्राक्॥4॥ |
| माता हितेव परिरक्षति येन गीता गीताग्र्यभारतपुराणकृताऽविगीता।<br>वातांशमध्ववरदः सगिरो ममैताः ख्याताः पराशरसुतो विदधातु धाता॥5॥ |
| पारं भवाख्यजलधेर्भुवनैकसारं स्वैरं कृतोरुविधवेदपथः प्रचारम्।<br>आरञ्जितामरजनं सुखचिच्छरीरं धीरं स्मरामि हृदि सत्यवतीकुमारम्॥6॥ |
| भावाश्रितं यमनुसृत्यभजन्ति देवाः सेवारताश्च मुनयः कवयो नृदेवाः।<br>यो वासुदेववपुरस्यमहानुभावांच्छ्रीबादरायणहरेर्न गृणीत को वा॥7॥ |
| ज्ञानं प्रदेहि भवदागमवार्ध्यधीनं श्रीनन्दसूनुपदभक्तिनदीनिदानम्।<br>आनन्दतीर्थवरदोच्चमहाध्वनीनं दीनं बदर्यधिपते कुरु माममानम्॥8॥ |
| वासिष्ठवंशतिलकस्य हरेर्मनोज्ञं दोषौघखण्डनविशारदमष्टकं ये।<br>दासाः पठन्त्यनुदिनं भुवि वादिराजधीसम्भवं परिभवो न दिशासु तेषाम्॥9॥ |

## व्यासवर्णनम्॥23॥

व्यासायाप्रतिमेतिहासरचनोल्लासाय दुर्वादिनां
त्रासायासकराय सत्सु कृतविश्वासाय दोषद्विषे।
भासा यामुनरम्यतोयसदृशायाऽऽसायमासेविने
दासायाभयदाय मध्वगुरुहृद्वासाय तुभ्यं नमः॥1॥

व्यासाय भवनाशाय श्रीशाय गुणराशये।
हृद्याय शुद्धविद्याय मध्वाय च नमोनमः॥2॥

## हयास्यदशकम्॥24॥

ॐ॥ त्रियुगेष्ट्युगेषु स्यान्मा कलौ जन्म भूद्धरे।
मा पापी स्यां क्रियाहीनो मा मूढो मा च नारकी॥1॥

यथाऽसह्यं स्वस्य दुःखं तथाऽन्यस्यापि तत्समम्।
इति प्रायेण भूतेषु को न जानात्यथापि हि॥2॥

मदान्धाः केऽपि पापान्धाः स्वभावान्धाश्च केचन।
न पश्यन्ति परक्लेशं परत्र क्लेशमात्मनाम्॥3॥

हा कष्टं देव लक्ष्मीश लोकाः पापानि कुर्वते।
पर्वतेऽपि वसत्राथ कुर्वेऽर्चां तव केवलम्॥4॥

आसहस्राब्दमाकल्पमाकोट्यब्दमथापि वा।
नपरघ्न कथं नाथ नरकाग्नौ पचेम हि॥5॥

अनन्तजन्मपापानि मनोऽन्तस्स्थस्त्वमच्युत।
जानासि नाथ तत्कष्टं ज्ञानासिस्ते छिनत्तु मे॥6॥

रत्या रज्वा मनश्चोरं बध्नीहि चरणे तव।
मरणेऽपि भवत्पादशरणः स्यामहं प्रभो॥7॥

भवत्प्रसादसामर्थ्यादहमेतादृशोऽच्युत।
हयग्रीव दयासिन्धो ज्ञानरूप हिरण्मय॥8॥

त्वामेवेक्षे परोक्षे त्वां सेवे ध्यायामि कीर्तये।
त्वामर्चये त्वां नमस्ये त्वां याचेऽन्ते परां गतिम्॥9॥

सहस्रनामन्नामैकं प्रयच्छानन्तरूप ते।
स्मरणायैकरूपं मे त्रिधामन्नेकधाम ते॥10॥

स्मरता वादिराजेन स्मरतातमियं कृता।
दशश्लोकी पठन्नेतामनन्तश्लोक्यहो भवेत्॥11॥

## हयवदनाष्टकम्॥25॥

ॐ॥ दासस्य मे शिरसि हस्तसहस्रपत्रं श्रीशार्पयेश वरदेश्वर वाजिवक्त्र।
व्यासादिमूर्तिशतशोभित मे प्रसीद पाशं विखण्डय भवाभिधमम्बुजाक्ष॥1॥

दासस्य मे शिरसि पादलत्सरोजं श्रीशार्पयाऽऽशु निजभूषणभूषणं ते।
आशां विनाशय भवत्स्मरणप्रतीपान् दोषांश्च दूरय भवाव्यय मेऽन्तरङ्गे॥2॥

संसारदावशिखया परितप्यमानः संसेवकस्तव तुरङ्गमतुङ्गवक्त्र।
संशुद्धमध्वहृदयाब्जगराजहंस कं साधयामि शरणं वरदं विना त्वाम्॥3॥

पञ्चात्मकश्रुतिनिगूहकदानवेन्द्र पञ्चत्वदायक रमाश्रितपादपद्म।
सिञ्च त्वदङ्गपरिपावितपापभेदचुच्छङ्घ्रिपद्मपरिलम्बिसुधाप्रवाहैः॥4॥

नाहं वृणोमि तव पाददिनेशसेवां मोहान्धकारनिकरक्षयदां विनाऽन्यत्।
व्यूहं सतां समवलम्ब्य भवच्चरित्र व्याहारतृप्तकरणं कुरु किं बहूक्त्या॥5॥

किं बन्धनैः कथय बन्धुजनैर्मुरारे  किं भारभूतकटकादिविभूषणैर्वा।
अम्भस्सु मग्नकरणस्य भवाम्बुराशेः किं भङ्गशीलधनभूभवनाद्युपायैः॥6॥

उत्फुल्लपद्मदलनेत्र तुरङ्गवक्त्ररत्नौघचित्रतिलकारुणमञ्जुलोष्ठ।
विस्तीर्णवक्षसि विराजितभूरिहार वृत्तातिदीर्घकरकञ्जकृताखिलार्थ॥7॥

लक्ष्मीनिवास तनुकोमलमञ्जुमध्य लक्ष्यत्रिवल्युदरनाभिसरस्सरोज।
रत्नाग्र्यमेखल रणच्चरणाब्जभूष भृत्यं विलोकय दयार्द्रदृशाऽन्वहं माम्॥8

इत्यष्टकेन हयकन्धरमिन्दिरेशं रक्तात्मपादतलरञ्जितदिक्प्रदेशम्।
तत्पादपद्मकृतमानसवादिराज प्रोक्तेन योऽर्चयति तस्य भवेत्प्रियोऽसौ॥9॥

## हयग्रीवपञ्चकम्॥26॥

ल(र)साशय रसाशया परिसरन्तमक्षैर्हयैः
कुमेधसि कुमेधसि स्थिरतया निबद्धं सदा।
ख(त्व) रस्वनखरस्वनैः परपुमर्थनोत्थैर्मितं
मनोरथमनोरथप्रतिनिधिं बिभर्मि प्रभो॥1॥

महं बहु महं बहु प्रकटमेव कृत्वा रहः
समेत्यहि समेत्य हि त्विडुदरं पिबाम्यच्युत।
नरप्रिय नरप्रियं विरचयामि नूनं प्रभो
न ते स्थिरनते स्थिरप्रियमहो कदाऽप्याचरम्॥2॥

नमस्तव नमस्तवप्रियपुरघ्न दीनस्य मे

मनोहर मनोहराच्युतपदाम्बुजे स्थापय।

हृषीकप हृषीकपालक मुकुन्द तैस्सन्नतैः

सहाखिलसहाखिलावप न मुञ्च मामाश्रितम्॥3॥

मतां स्तुतिमतां स्तुतिं तुरगवक्त्र तुभ्यं नमो

दिशान्तर दिशान्तरस्फुरितचारुमूर्तेस्तव।

सुदामवसुदामवत्परिसरद्धियो मेऽन्वहं

पदाम्बुज पदाम्बुजाभ्युदयपूतलोकत्रय॥4॥

विषोपमविषोपमैर्विषयराशिभिर्वञ्चितं

सदासुरसदासुरप्रियजिघृक्षयान्धायितम्।

भवज्जनभवज्जनान्तरकृतार्तिमूलघ्न मां

हयानन हयाननार्दन न मुञ्च भक्तं तव॥5॥

हयास्यनुत्तिपञ्चकं भवजवेदनावञ्चकं

विरक्तिमतिसाधकं विमलवृत्तिसंशोधकम्।

दशप्रमतिसन्नतिस्तुतिरतेन कर्मन्दिना

मुकुन्दमननार्थिना व्यरचि वादिराजेन हि॥6॥

## हयग्रीवध्यानप्रकरणम् ॥ 27॥

ॐ। सदा तव ध्येयतया हृदब्जे स्थितमच्युतम्।

चिद्रूपभद्रावयवं चित्रभूषणभूषितम्॥1॥

| |
|---|
| सश्रीकं सपरीवारं सर्वज्ञं सर्वसाक्षिणम्।<br>आवाह्य प्रतिमामध्ये ध्यायस्व नृतुरङ्गमम्॥2॥ |
| करस्थमुद्राशङ्खाक्षपुस्तकं रम्यहस्तकम्।<br>चन्द्राभं चन्द्रबिम्बस्थं चन्दनोक्षितवक्षसम्॥3॥ |
| चारुप्रसन्नवदनं चलत्कुन्तलसन्ततिम्।<br>सुकर्णगण्डभ्रूयुग्मं सुनासोष्ठं शुचिस्मितम्॥4॥ |
| सुधारसार्द्रसर्वाङ्गं शोकमोचनलोचनम्।<br>श्रीवत्सकौस्तुभधरं श्रितभक्तधुरन्धरम्॥5॥ |
| वनमालावैजयन्तीकन्धरं लोकसुन्दरम्।<br>कृशमध्यं विशालोरः स्थलं पीनचतुर्भुजम्॥6॥ |
| दुष्टानिष्टदशिष्टेष्टपुष्टबाहुचतुष्टयम्।<br>वृत्तदीर्घचतुर्हस्तैः श्रुत्यर्थचतुरर्थदम्॥7॥ |
| कराख्याम्भोजसम्भूतदलोपमशुभाङ्गुलिम्।<br>अश्वग्रीवं दृश्यपार्श्वं लक्ष्यकक्ष्यस्तनद्वयम्॥8॥ |
| मनोज्ञपृष्ठप्रभया तृणीकृतशशिद्युतिम्।<br>तनूदरं निम्ननाभिं मनोहरवलित्रयम्॥9॥ |
| लसद्रोमलताभासा वशीकृतरमादृशम्।<br>बृहत्कटितटद्वन्द्वमप्रतिद्वन्द्वमव्ययम्॥10॥ |
| वर्तुलोरुं वृत्तजानुजङ्घाङ्गुलिनखावलिम्।<br>अतिरक्ताङ्घ्रियुगलतनुकोमलपल्लवम्॥11॥ |

| |
|---|
| ध्वजवज्रपताकाब्जाङ्कुशरेखाभिरञ्जितम्।<br>रक्तास्याब्जं रक्तपद्मसमश्रीमत्पदद्वयम्॥12॥ |
| चतुर्हस्तारुणतलं चतुर्वेदप्रवर्तकम्।<br>चतूरूपश्रिया जुष्टं चतुर्वर्णाश्रमप्रियम्॥13॥ |
| चतुर्मूर्तिधरं चित्रं चतुर्युगनियामकम्।<br>चतुर्विधानां मुक्तानां चतुर्विधसुखप्रदम्॥14॥ |
| चतुरास्यगुरुं धीरं चतुरं श्रीहयाननम्।<br>करुणार्द्रकटाक्षाभ्यां कलिकल्मषखण्डनम्॥15॥ |
| खलौघदण्डनं शान्तं कमनीयतमं स्मर।<br>चित्ररत्नोच्चमुकुटं रत्नग्रैवेयरञ्जितम्॥16॥ |
| रत्नोद्यत्तिलकं रत्नकुण्डलद्वयमण्डितम्।<br>सद्रत्नभुजकीर्तिभ्यां हृद्यां सद्वयमद्वयम्॥17॥ |
| रत्नहारसरैर्युक्तं रत्नयज्ञोपवीतिनम्।<br>रत्नोज्ज्वलोत्तरीयं च रत्नमध्यविभूषितम्॥18॥ |
| रमणीयं रत्नकाञ्च्या रत्नकिङ्किणिराजितम्।<br>रत्नोद्यत्कटिसूत्रेण बद्धविद्युत्प्रभाम्बरम्॥19॥ |
| रत्नाङ्गुलीयकं रत्नकङ्कणाङ्गदभास्वरम्।<br>विचित्ररत्नोल्लसितवीरतोचितभूषणम्॥20॥ |
| नवरत्नमयोत्तुङ्गरणत्कनकनूपुरम्।<br>स्फुरद्रत्नचयोद्भासिक्वणत्पौरुटकिङ्किणिम्॥21॥ |

| |
|---|
| रत्नमुद्राङ्गुलीयैश्च दीप्तपादद्वयाङ्गुलिम्।<br>तुलसीकुन्दमन्दारकुसुमैश्च सदाऽर्चितम्॥22॥ |
| रत्नमण्डपमध्यस्थं रत्नपद्मोपरि स्थितम्।<br>रत्नोल्लसत्फणश्रेण्या छत्रायितफणीश्वरम्॥23॥ |
| चित्ररत्नमयच्छत्रचामराद्यैश्च सत्कृतम्।<br>सप्तावरणदेवैश्च सहितं ते हितं स्मर॥24॥ |
| चतुर्दिक्षु चतुर्द्वारगतैश्चण्डजयादिभिः।<br>द्वाःस्थैश्चक्रगदाहस्तैर्जुष्टमिष्टकरं स्मर॥25॥ |
| मध्वहृत्पद्ममध्यस्थं हृद्यदं बुद्धिशुद्धिदम्।<br>सद्यो विजयदं सिद्धसाध्याराध्यपदं स्मर॥26॥ |
| तत्वानां मातृकाणां च वर्णानां चैव देवताः।<br>शास्त्रोक्तवर्त्मना विष्णोरङ्गेष्वर्पय सादरम्॥27॥ |
| पञ्चाङ्गं वा षडङ्गं वा न्यासं कृत्व पुनर्हरेः।<br>संस्मृत्य चरणौ मन्त्राञ्जप प्रणवपूर्वकान्॥28॥ |
| पञ्चामृतैः शुद्धजलैः कलशस्थोदकैरपि।<br>मन्त्रपूतैः स्नापयित्वा सपीठावरणाम्बरम्॥29॥ |
| अर्घ्याद्यैरुपचारैश्चतोषयित्वा जनार्दनम्।<br>तुलसीमञ्जरीभिश्च पुष्पैश्च विविधैरपि॥30॥ |
| आराध्य धूपदीपौ च दत्वा स्तुत्वा पुनर्हरिम्।<br>सरसैः फलपक्वैश्च भक्ष्यभोज्यरसायनैः॥31॥ |

| |
|---|
| ससितैर्घृतसिक्तैश्च पायसैर्विविधैरपि।<br>दध्योदनेन चित्रान्नैस्तर्पयाऽवरणान्वितम्॥32॥ |
| दयार्द्रहृदयं भक्तवत्सलं पुरुषोत्तमम्।<br>पुनर्गण्डूषाचमनमुखवस्त्रादिकं दिश॥33॥ |
| कर्पूरखण्डसहितं ताम्बूलं च निवेदय।<br>पुनर्धूपेन दीपेन चित्रैरारार्तिकैरपि॥34॥ |
| मन्त्रपुष्पैः स्तवैर्गीतैर्नृत्यवादित्रपूर्वकैः।<br>अर्चयित्वा नमस्कृत्य कुरु चान्ते प्रदक्षिणम्॥35॥ |
| श्रिया च धरया चैव स्वरूपावरणैरपि।<br>अनन्तब्रह्मवाय्वीशवीशैः शक्रादिकैः सुरैः॥35॥ |
| कृताञ्जलिपुटैर्नित्यं परिवारतया स्थितैः।<br>पीठदेवैश्च सहितमेवं कालत्रयोऽर्चय॥36॥ |
| भक्तियुक्तिस्फूर्तिशक्तिकीर्त्यनार्तिधृतिस्मृतिः।<br>विरक्तिभक्तिमुक्तीश्च सुखव्यक्तीश्च याचय॥37॥ |
| कर्तारं चैव धर्तारं प्रवक्तारं हयाननम्।<br>ध्यातुं गातुं श्रमं चेतुं वादिराजोऽकृत स्तवम्॥39॥ |

## हयग्रीवस्तुतिः॥28॥

| |
|---|
| लसदास्य हयग्रीव लसदोष्ठद्वयारुण।<br>लसद्दन्तावलीशोभ हयग्रीव लसत्स्मित॥1॥ |

लस्त्फाल हयग्रीव लसत्कुन्तलमस्तक।
लसत्कर्ण हयग्रीव लसन्नयनपङ्कज॥2॥

लसद्दीक्ष हयग्रीव सलभ्रूमण्डलद्वय।
लसद्ग्रीव हयग्रीव लसद्धस्त लसद्भुज॥3॥

लसत्पार्श्व लसत्पृष्ठ कक्षांसयुग सुन्दर।
हयग्रीव लसद्वक्षः स्थनमध्य वलित्रय॥4॥

हयग्रीव लसत्कुक्षे लसद्रोमलताञ्चित।
हयग्रीव लसन्नाभे लसत्कटियुगान्तर॥5॥

लसदूरो हयग्रीव लसज्जानुयुगप्रभ।
हयग्रीव लसज्जङ्घायुग्म पादाम्बुजद्वय॥6॥

हयग्रीव लसत्पादतलरेखारुणद्युते।
लसन्नखाङ्गुलीशोभ हयग्रीवातिसुन्दर॥7॥

लसत्किरीटकेयूरकङ्कणाङ्गदकुण्डल।
हयग्रीवलसद्रत्नहारकौस्तुभमण्डन॥8॥

हयग्रीव लसन्मध्य लसच्चन्दनचर्चित।
लसद्रत्नमयाकल्प श्रीवत्सकृतभूषण॥9॥

हयग्रीव लसत्काञ्चीरत्नकिङ्किणिमेखल।
हयग्रीव लसद्वस्त्र मणिनूपुरमण्डित॥10॥

हयग्रीवेन्दुबिम्बस्थ लसच्छङ्खाक्षपुस्तक।
लसन्मुद्र हयग्रीव लसदिन्दुसमद्युते॥11॥

| |
|---|
| हयग्रीव रमाहस्तरत्नकुम्भसृतामृत।<br>हयग्रीव समानश्रीचतूरूपोपसेवित॥12॥ |
| हयग्रीव सुरश्रेष्ठ हयग्रीव सुरप्रिय।<br>हयग्रीव सुराराध्य जय शिष्ट जयेष्टद॥13॥ |
| हयग्रीव महावीर्य हयग्रीव महाबल।<br>हयग्रीव महाधैर्य जय दुष्टविनष्टिद॥14॥ |
| भयं मृत्युं क्षयं व्यर्थव्ययं नानामयं च मे।<br>हरे संहर दैत्यारे हरे नरहरे यथा॥15॥ |
| भक्तिं शक्तिं विरक्तिं च भुक्तिं मुक्तिं च यत्किद्।<br>हरे मे देहि दैत्यारे हरे नरहरे यथा॥16॥ |
| सदा सर्वेष्टलाभाय सर्वानिष्टनिवृत्तये।<br>हयग्रीवस्तुतिः पाठ्या वादिराजयतीरिता॥17॥ |
| चिन्तामणिर्हयग्रीवो वशे यस्यनिषेवितः।<br>सोऽपि सर्वार्थदो नृणां किमुतासौ हयाननः॥18॥ |

## हयग्रीवसम्पदास्तोत्रम्॥29॥

| |
|---|
| ॐ॥ हयग्रीव हयग्रीव हयग्रीवेति वादिनम्।<br>नरं मुञ्चन्ति पापानि दरिद्रमिव योषितः॥1॥ |
| हयग्रीव हयग्रीव हयग्रीवेति यो वदेत्।<br>तस्य निस्सरते वाणी जह्नुकन्याप्रवाहवत्॥2॥ |

हयग्रीव हयग्रीव हयग्रीवेति यो ध्वनिः।
विशोभते स वैकुण्ठकवाटोद्घाटनक्षमः॥3॥

श्लोकत्रयमिदं पुण्यं हयग्रीवपदाङ्कितम्।
वादिराजयतिप्रोक्तं पठतां सम्पदां पदम्॥4॥

## हयग्रीवस्तोत्रम्॥30॥

हयग्रीव दयासिन्धो बन्धो सज्जनसन्ततेः।
त्रयीग्रीव नमश्चान्द्रसान्द्रकान्तिसमांशुमन्॥1॥

स्वामिन्सघृण काप्यम्बा किं बालकममुञ्चत।
पालय श्रीपते तस्मादस्मान्सेवकसेवकान्॥2॥

ईश तेऽनीश जीव त्वं तत्त्वं वक्ति न युक्तिमान्।
अश्वो भूत्वाऽपि यो मर्त्योऽमर्त्यो वाऽश्वो जगत्त्रये॥3॥

हयास्य पश्यभृत्यं ते हन्तेमे भूतराक्षसाः।
जिघांसन्त्यात्तवक्रस्त्वं सत्वं विस्तार्य रक्ष माम्॥4॥

यमोऽपि ते भटस्त्वं च पञ्चरूपो भवान्प्रभुः।
आज्ञापयतु राजाऽसौ दासाग्र्यं मयि मोचयेत्॥5॥

अनन्तगुणसम्पूर्ण धूर्न काऽप्यत्र मे प्रिया।
तव पादाब्जसेवैव जैवबन्धविमोचिनी॥6॥

सुरम्य सुखचिद्रूप धूपादीपार्चनादिकम्।
तव प्रियं सदाकुर्यां पुर्यां वा पर्वतेऽपि वा॥7॥

विद्यां देहि विवेकं च शं च सर्वत्र देहि मे।

श्रद्धां देहि तथा पाहि मा हिनस्ति यथा परः॥8॥

ससुरासुरग्धर्वपूर्वसर्वजगत्पते।

शरणं भव वाणीशवीशभोगीशसेवित॥9॥

हयानन हर क्लेशं लेशं दर्शय नः प्रभो।

भवन्मुखाम्बुजे नृत्यच्छ्रुत्यन्ताख्यवधूहृदाम्॥10॥

वादिराजाख्ययतिना सादरं रचितां स्तुतिम्।

श्रीधराङ्घ्रियुगे भक्तिं साधयन् सर्वदा पठेत्॥11॥

## श्रीहयग्रीवस्तोत्रम्॥31॥

ॐ॥ न शस्त्री मे भृत्यो न च कपटचाटूक्तिकुमनु-

र्न वित्तैर्भैषज्यं न च पदरयो नापि खगराट्॥1॥

तथाप्येषा दोषानलसपिशुनोन्मुक्तभुजगी

हयग्रीवश्रीमच्चरशरणं मां स्पृशति किम्॥2॥

न षड्शास्त्राभिज्ञाना न च निगमयुक्ता न कवयो

न मन्त्रानुष्ठानव्रतचरणचित्ता अपि वयम्।

न तद्यत्नोपेतास्तदपि चतुरा एव नितरां

वदमो यद्दिष्ट्या हयवदन तुभ्यं नम इति॥3॥

न वित्तैरुन्मत्ता न च कुहकदुर्मन्त्रबलिनो

न वा मिश्रैर्मिश्रा न च कुजनसाचिव्यसहिताः।

न दुःशास्त्रं शस्त्रं विरसमुपजीव्योद्धतधियो

हयग्रीवं देवं वयमिममुपास्यैव कृतिनः॥3॥

न वित्तेषूत्कण्ठां न च कुविषयास्वादनविधौ

न वा माठापत्ये न च नृपतिसम्प्रीतिकरणे।

न नारीसम्भोगो प्रदिश दिश कारुण्यजलधे

तव श्रीमत्पादाम्बुरुहभजने वाजिवदन॥4॥

लसन्मध्वस्याध्वा विकसिततदीयोक्तिसरसी-

रुहामोदान्मोदस्तदुरुमकरन्दे परिचयः।

हयग्रीवो देवो हरिचरणभक्तिश्च सुदृढा

भवेऽस्मिन्मेऽन्यस्मिन्नपि भवतु भूयश्च भवतात्॥5॥

वादिराजयतिप्रोक्तं साध्विदं पद्यपञ्चकम्।

आदरेण गले धार्यं माधवप्रीतिकामुकैः॥6॥

## प्रार्थनादशकस्तोत्रम्॥32॥

रमारमण मध्वादिदेशिक श्रीहृदब्जग।

हयग्रीव कृपालो मे प्रार्थनां श्रुणु सादरम्॥1॥

अयोग्यविषये स्वामिन् सर्वथा न मनो भवेत्।

चाञ्चल्यं मूलतश्छिन्धि दुराशां हर दूरतः॥2॥

दुर्बुद्धिं च न मे देहि दुःशास्त्रवर्तने रतिम्।

हापयस्व च दुर्मानं दुर्गुणं मोचय प्रभो॥3॥

दुःसङ्गं दुष्क्रियां छिन्धि हर लोकाटनात्पदौ।

न नियोजय चक्षूंषि परदारादिदर्शने॥4॥

| |
|---|
| दुष्प्रतिग्रहदुस्पर्शे करौ मा चोदय ध्रुवम्।<br>अगम्यगमने गुह्यं घ्राणमाघ्राणनेऽसताम्॥5॥ |
| अपकर्षतु जिह्वां मे लोकवार्तादुरन्नतः।<br>दुर्वार्ता दुष्टशब्देभ्यो निवर्तय हरे श्रुती॥6॥ |
| भवदिच्छानुगं चेतो योग्यसद्विषयं भवेत्।<br>यदृच्छालाभसन्तृप्तं निश्चाञ्चल्यं भवेत्त्वयि॥7॥ |
| सज्ज्ञानं सर्वदा देहि सच्चास्त्रावर्तने रतिम्।<br>सत्सङ्गं सत्क्रियां चैव पादौ त्वत्क्षेत्रसर्पणे॥8॥ |
| श्रीमध्वशास्त्रश्रवणे नियुंक्ष्व श्रवणे सदा।<br>हयास्य चक्षुषी चेमे दर्शने सन्नियोजय॥9॥ |
| करौ त्वदर्चने नित्यं सुखतीर्थस्य लेखने।<br>त्वदालापे त्वदुच्छिष्टभोजने कुरु जिह्विकाम्॥10॥ |
| घ्राणं भवति निर्माल्याघ्राणने नमने शिरः।<br>देहि मे तु ज्ञानभक्तिपशुपुत्रधनादिकम्॥11॥ |
| प्रार्थनादशकं चैतत् त्रिकाले य पठेन्नरः।<br>तस्याभीष्टं हयास्योऽसौ दत्वा रक्षति सर्वदा॥12॥ |

# श्रीवराहहयवदनस्तोत्रम्॥33॥

विदारितनिशाचरौ विशदवेदविद्याकरौ
प्रपन्नजनतावनौ प्रशिथिलीकृताश्वाननौ।
मनोरमतमाकृती मदनमानिताधःकृती
वराहतुरगाननौ वनजलोचनौ नौम्यहम्॥1॥

वराभयदरारिभिर्वलयवल्गुहस्तद्युभिः
प्रबोधशुभपुस्तकप्रगुणशङ्खमाल्यैर्युतौ।
हरिन्मणिमणिद्युति हरवितायमानस्तुती
वराहतुरगाननौ वनजलोचनौ नौम्यहम्॥2॥

मनोज्ञपदसारसौ महितजानुमध्योरसौ
त्रिरेखशुभकन्धरौ त्रिजगदादृतश्रीकरौ।
विभूषणगुणाश्रयौ विमलहारमालाश्रयौ
वराहतुरगाननौ वनजलोचनौ नौम्यहम्॥3॥

रसामृतरसाङ्कितौ रसिकभक्तवर्गाश्रितौ
प्रसादभरितेक्षणौ प्रमथमण्डलीशिक्षणौ।
विरुद्धधुरसङ्गरौ महितशक्तितोऽभङ्गुरौ
वराहतुरगाननौ वनजलोचनौ नौम्यहम्॥4॥

सुखानुभवविग्रहौ सुजनसङ्घरक्षाग्रहौ
विनोदजितदानवौ विलसदाकृती श्रीनवौ।
भवाब्धिभयभञ्जनौ निजपदं सदा ध्यायिनां
वराहतुरगाननौ वनजलोचनौ नौम्यहम्॥5॥

वराहतुरगास्ययोर्वरनुतिं निजैर्वश्ययोः
कृपानिलयनेत्रयोः कृपणभक्तहृन्मित्रयोः।
यतिः शमलशान्तये यमिविवृग्यहृद्वान्तये
व्यधत्त विलसत्पदां विमलवादिराजाभिधः॥6॥

## श्रीनृसिंहवराहस्तोत्रम्॥34॥

प्रह्लादाह्लादहेतुं सकलगुणगणं सच्चिदानन्दमात्रं
सैहासह्योगमूर्तिं सदभयमरिशङ्खौ रमां बिभ्रतं च।
अंहस्संहारदक्षं विधिभवविहगेन्द्रेन्द्रचन्द्रादिवन्द्यं
रक्षोवक्षोविदारोल्लसदमलदृशं नौमि लक्ष्मीनृसिंहम्॥1॥

वामाङ्कस्थधराकराञ्जलिपुटप्रेमातिहृष्टान्तरं
सीमातीतगुणं फणीन्द्रफणगश्रीमान्यपादाम्बुजम्।
कामाद्याकरचक्रशङ्खसुवरोद्दामाभयोद्यत्करं
सामादीड्यवराहरूपममलं हे मानसे तं स्मर॥2॥

कोलाय लसदाकल्पजालाय वनमालिने।
नीलाय निजभक्तौघपालाय हरये नमः॥3॥

धात्रीं शुभगुणपात्रीमादायाशेषविबुधमोदाय।
शेषे तमिममदोषे धातुं हातुं च शङ्किनं शङ्के॥4॥

नमोऽस्तु हरये युक्तिगिरये निर्जितारये।
समस्तगुरवे कल्पतरवे परवेदिनाम्॥5॥

## परमस्तुतिः॥35॥

ॐ॥ मौक्तिकाङ्कुरकल्पदंष्ट्रमुखाम्बुजं प्रलयाम्बुजम्
चक्रशङ्खवराभयच्छविमत्करं सुयशस्करम्।
रत्नराजिविराजिवृत्तशिरोधरं धरणीधरं
पोत्रिरूपिणमच्युतं प्रणतोऽस्मि तं सुखदस्मितम्॥1॥

अङ्कहीननिशेषबिम्बसमाननं निजमाननं
शङ्खमाल्यसुबोधपुस्तकधारिणं मधुवैरिणम्।
कुङ्कुमाङ्कितचन्दनोज्वलकन्धरं श्रुतिमन्दिरं
किङ्करीकृतविश्वमश्वमुखं भजत्सुखदं भजे॥2॥

नीलशैलविशालवप्रलसद्गुजान्तरसङ्गुजा-
बाल्यमानुषसक्तभूललनाश्रमघ्न जितश्रम।
मालतीमणिमञ्जुमाल्य सरोजनेत्र गुरो जने
कोलरूप भवन्तमीश नतोऽस्मि तं सुखदस्मितम्॥3॥

हारशोभिविशालवक्षसमीश्वरं तमनश्वरं
वारिजातसुजातपत्रविलोचनं कृतसेचनम्।
शारदाम्बुदसन्निभं सकलोन्नतं सुजनैर्नतं
पारवर्जितशौर्यमश्वमुखं भजत्सुखदं भजे॥4॥

जातरूपमयग्र्यमध्यविभूषणं भवभीषणं
पीतवस्त्रविषक्तसद्रशनोर्जितं मलवर्जितम्।
आततायिसुरारिसञ्चयभञ्जदं कनकाङ्गदं
ख्यातसूकररूपिणं प्रणतोऽस्मि तं सुखदस्मितम्॥5॥

पद्मरागविराजिकिङ्किणिमेखलाञ्चितमेखला
साध्य बुद्धिरियं वरोदरबन्धन स्मरतां धन
त्वाद्य चिन्तयतूद्यदर्कसमाम्बरं गतडम्बरम्
तद्वराय भवन्तमश्वमुखं भजत्सुखदं भजे॥6॥

मृद्विभेन्द्रकरोपमाङ्कगवल्लभं सुरवल्लभं
स्निग्धजानुयुगं मनोहरजङ्घमद्भुतजङ्गमम्।
पद्मशोभिपदानखीकृतनागमान्यघनागमा-
वेद्यमद्भुतसूकरं प्रणतोऽस्मि तं सुखदस्मितम्॥7॥

वर्तुलोरुयुगं मनोरमवृत्तजानुमवृत्तजा
स्तुत्यकोमलपुष्टजङ्घमहीनतल्पमहीनतम्।
रक्तशारदचारुपद्मलसत्पदं निगमास्पदं
दैत्यवार्धिमहौर्वमश्वमुखं भजत्सुखदं भजे॥8॥

वादिराजयतीरिता हयवक्रभूधरवक्रभू-

र्वेदवागिव पावनी परमस्तुतिर्गुणविस्तृतिः

सादरं पठतां सतां हरिपादपेशलपादपे

साधुभक्तिलतां स्थिरीकुरुतेतरामवृतेतराम्॥9॥

## श्रीत्रिविक्रमस्तोत्रम्॥36॥

ॐ॥ विदारितारिसङ्घातं पादाक्रान्तजगत्त्रयम्।

गदाचक्रधरं धीरं सदा वन्दे त्रिविक्रमम्॥1॥

शङ्खाम्भोजकरद्वन्द्व हुङ्कारार्दितदानव।

शङ्कातङ्कहराहं ते किङ्करोऽस्मि त्रिविक्रमम्॥2॥

क्षपाकरोल्लसद्वक्त्रं कृपाविपुललोचनम्।

अपारसुगुणस्तोममुपासे तं त्रिविक्रमम्॥3॥

रमाधराश्लिष्टपार्श्वं समस्तसुरसेवितम्।

भ्रमादिदोषदूरं तं नमामि श्रीत्रिविक्रमम्॥4॥

योऽङ्गादङ्गजमस्राक्षीद्गङ्गामङ्गुष्ठतोऽसृजत्।

तुङ्गामरचयोत्तुङ्गं तं गायामि त्रिविक्रमम्॥5॥

नानालङ्कारभरितं पीनावयवमोहनम्।

ज्ञानानन्दमयं वन्दे श्रीनाथं तं त्रिविक्रमम्॥6॥

वृन्दारकेन्द्रवन्द्याङ्घ्रिं नन्दितीर्थमुनेः प्रियम्।

कन्दर्पकोटिलावण्यं तं ध्यायामि त्रिविक्रमम्॥7॥

| |
|---|
| सुधाकुन्देन्दुधवलमधःकृतचराचरम्।<br>उदारमादराद्वन्दे त्रिधामानं त्रिविक्रमम्॥8॥ |
| वेदान्तवेदितगुणं बोधप्रदमहर्निषम्।<br>आधारं नौमि जगतां श्रीधामानं त्रिविक्रमम्॥9॥ |
| अनुयागेन बलिना मनुना मननेन च।<br>दिनेदिनेऽर्चितं वन्दे  मनसा तं त्रिविक्रमम्॥10॥ |
| सर्पिः पायसनैवेद्यैर्भक्ष्यैश्च विविधैः सदा।<br>नृत्यवादित्रगीतैश्च तर्पयामि त्रिविक्रमम्॥11॥ |
| वादिराजेन्द्रवरदं सोदापरुनिवासिनम्।<br>मोदप्रदं सदा वन्दे माधवं तं त्रिविक्रमम्॥12॥ |
| धूपैर्गन्धानुलेपैश्च दीपैरपि मनः प्रियैः।<br>तापसैः पूजितं वन्दे श्रीपतिं तं त्रिविक्रमम्॥13॥ |
| योऽसौ धवलगङ्गायाः पार्श्वे तिष्ठति सर्वदा।<br>देशे देशे च विख्यातमासेवे तं त्रिविक्रमम्॥14॥ |
| अग्रे निधाय श्रीदेवीं पृष्ठे पार्श्वे च सज्जनान्।<br>स्वर्गिभिः परितः सेव्यो मध्ये भाति त्रिविक्रमः॥15॥ |
| शिलामयै रम्यतमशालावलभिमण्डपैः।<br>कलशैश्चोल्लसद्देवालये भाति त्रिविक्रमः॥16॥ |
| यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी।<br>तावत्त्रिविक्रमः सोऽयं  पूज्यस्तिष्ठतु सज्जनैः॥17॥ |

इदं स्तोत्रं वादिराजो मुदे सज्जनसन्ततेः।
व्यधत्त तेन प्रीतोऽस्तु सदा श्रीदस्त्रिविक्रमः॥18॥

## हर्यष्टकम्॥37॥

ॐ॥ स्वमुद्धर्तुं हरे वेत्ति किं कूपे पतितः पशुः।
क्षिपन्नङ्घ्रिं मुहुः क्रन्दन्कृपां जनयति प्रभो॥1॥

अनिच्छतोऽपि तस्याङ्गस्याङ्गं कुक्षिं च दामभिः।
शनैर्निबध्य स्वजनैर्हरे स परमुद्धरेत्॥2॥

स हरे लालयेत्पङ्कं क्षालयेत्पालयेत्तृणैः।
शमयेदौषधैर्मन्त्रैः स्वगोष्ठस्थस्य वेदनाम्॥3॥

तथा नरपशोरीश भवकूपेऽर्दितस्य मे।
हरे परिहराशेषक्लेशं केशिघ्न केशव॥4॥

मां हि जीवन्मृतं कर्तुं यतन्ते परितः खलाः।
तान्निहत्य हरे शीघ्रं सेवायां ते नियुंक्ष्व माम्॥5॥

कामाद्यान्तरशत्रुभ्यो बाह्यशत्रुभ्य एव च।
भीतं हरेऽसुराद्भीतप्रह्लादाह्लाद पाहि माम्॥6॥

आधीन्व्याधीनरीन् राज्ञो द्रोहिणोऽन्यांश्च दुर्जनान्।
क्षिप्रं नाशाय सर्वज्ञ सर्वशक्ते हरे मम॥7॥

कलिं खण्डय तद्भृत्यान्दण्डयाऽऽशु हरे मम।
मनश्शोधय सत्तत्त्वं बोधयेष्टं प्रसाधय॥8॥

वादिराजयतिप्रोक्तमेवं हयष्टकं नवम्।

पठन्नृसिंहकृपया रिपून्संहरति क्षणात्॥9॥

## विष्णुस्तुतिः॥38॥

ॐ। बहुदुःखभरोदर्कस्तमसोग्रतमोऽधमः।

नरको नर को वा तं मतिमानतिवर्तते॥1॥

नरकान्तकपादाब्जपरिचर्यापरान्नरान्।

विना विनायकाद्यर्चापरोऽप्युच्चतरोऽरितः॥2॥

पतेत्तत्र न तत्राणं कुर्युस्ते पर्युपासिताः।

पश्य दृश्यपदद्वन्द्वस्यार्थं न व्यर्थधीर्भव॥3॥

असुरो हि सुरक्लेशकरो नरकनामकः।

तस्य हन्ता सतां चिन्तासन्तापाद्यन्तकृन्न किम्॥4॥

विशेषेण घ्नन्ति कार्यं विघ्नास्तेषामधीश्वरः।

आरब्धशुभकार्याणां विरुद्धस्य हि नायकः॥5॥

अजामिलो द्विजः पूर्वमतिचक्राम केन तान्।

ससुराः कस्य भजकाः कुतो वा तत्र चक्रमुः॥6॥

इति चिन्तय तेनापि सन्देहं चिन्धि मन्द ते।

गङ्गासेतू पापभङ्गकरौ कोऽकुरुत प्रभुः॥7॥

हयाननस्य वाक्छिष्यो नाभिपुत्रः पदार्चकः।

गुरुर्हि तस्य भ्रूभङ्गः शिवाय स्यात्सतां सदा॥8॥

वादिराजयतिप्रोक्तं स्तोत्रमेतत्पठन्सदा।

वादे विजयमाप्नोति नाधो याति कदाचन॥9॥

## नरहर्यष्टकम्॥39॥

ॐ। यद्धितं तव भक्तानामस्माकं नृहरे हरे।

तदाशु कार्यं कार्यज्ञ प्रळयाकार्युतप्रभ॥1॥

रटत्सटोग्रभ्रुकुटीकठोरकुटिलेक्षण।

नृपञ्चास्य ज्वलज्ज्वालोज्ज्वालास्यारीन् हरे हर॥2॥

उन्नद्धकर्णविन्यास विवृतानन भीषण।

गतदूषण मे शत्रून् हरे नरहरे हर॥3॥

हरे शिखिशिखोद्भास्वदुरुक्रूरनखोत्कर।

अरीन् संहर दंष्ट्रोग्रस्फुरज्जिह्व नृसिंह मे॥4॥

जठरस्थजगज्जाल करकोट्युद्यतायुध।

कटिकल्पतटित्कल्पवसनारीन् हरे हर॥5॥

रक्षोध्यक्षबृहद्वक्षोरुक्षकुक्षिविदारण।

नरहर्यक्ष मे शत्रुपक्षकक्षं हरे दह॥6॥

विधिमारुतशर्वेन्द्रपूर्वगीर्वाणपुङ्गवैः।

सदा नताङ्घ्रिद्वन्द्वारीन् नरसिंह हरे हर॥7॥

भयङ्करोर्वलङ्कार वरहुङ्कारगर्जित।

हरे नरहरे शत्रून्मम संहर संहर॥8॥

वादिराजयतिप्रोक्तं नरहर्यष्टकं नवम्।

पठन्नृसिंहकृपया रिपून् संहरति क्षणात्॥9॥

## श्रीमद्वेङ्कटेशमङ्गलाष्टकम्॥40॥

ॐ॥ श्रीक्षोण्यो रमणीयुगं सुरमणी पुत्रोऽपि वाणीपतिः

पौत्रश्चन्द्रशिरोमणिः फणिपतिः शय्या सुराः सेवकाः।

तार्क्ष्यो यस्य रथो महच्च भवनं ब्रह्माण्डमाद्यः पुमान्

श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम्॥1॥

यत्तेजोरविकोटिकोटिकिरणान् धिक्कृत्य जेजीयते

यस्य श्रीवदनाम्बुजस्य सुषमा राकेन्दुकोटीरपि।

सौन्दर्यं च मनो भवानपि बहून् कान्तिश्चकादम्बिनीं

श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम्॥2॥

नानारत्नकिरीटकुण्डलमुखैर्भूषागणैर्भूषितः

श्रीमत्कौस्तुभरत्नभव्यहृदयः श्रीवत्ससल्लाञ्छनः।

विद्युद्वर्णसुवर्णवस्त्ररुचिरो यः शङ्खचक्रादिभिः

श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम्॥3॥

यत्फाले मृगनाभिचारुतिलको नेत्रेऽब्जपत्रायते

कस्तूरीघनसारकेसरमिलच्छ्रीगन्धसारो द्रवैः।

गन्धैर्लिप्ततनुः सुगन्धसुमनोमालाधरो यः प्रभुः

श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम्॥4॥

| |
|---|
| एतद्दिव्यपदं ममास्ति भुवि तत्सम्पश्यतेत्यादरा-<br>द्भक्तेभ्यस्स्वकरेणे दर्शयति यद्दृष्ट्वाऽतिसौख्यं गतः।<br>एतद्भक्तिमतामियानपि भवाम्भोधिर्नदीति स्पृशन्<br>श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम्॥5॥ |
| यः स्वामीसरसस्तटे विहरतो श्रीस्वामिनाम्नः सदा<br>सौवर्णालयमण्डितो विधिमुखैर्बर्हिर्मुखैः सेवितः।<br>यः शत्रून्हनयन्निजानवति च श्रीभूवराहात्मकः<br>श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम्॥6॥ |
| यो ब्रह्मादिसुरान् मुनींश्च मनुजान्ब्रह्मोत्सवायाऽऽगतान्<br>दृष्ट्वा हृष्टमना बभूव बहुशस्तैरर्चितस्संस्तुतः।<br>तेभ्यो यः प्रददद्वरान् बहुविधान् लक्ष्मीनिवासो विभुः<br>श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम्॥7॥ |
| यो देवो भुवि वर्तते कलियुगे वैकुण्ठलोकस्थितो<br>भक्तानां परिपालनाय सततं कारुण्यवारां निधिः।<br>श्रीशेषाख्यमहीध्रमस्तकमणिर्भक्तैकचिन्तामणिः<br>श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम्॥8॥ |
| शेषाद्रिप्रभुमङ्गलाष्टकमिदं तुष्टेन यस्येशितुः<br>प्रीत्यर्थं रचितं रमेशचरणद्वन्द्वैकनिष्ठावता।<br>वैवाह्यादिशुभक्रियासु पठितं यैः साधु तेषामपि<br>श्रीमद्वेङ्कटभूधरेनद्ररमणः कुर्याद्धरिर्मङ्गलम्॥9॥ |

# दशावतारस्तोत्रम् ॥41॥

ॐ। नमोऽस्तु नारायणमन्दिराय नमोऽस्तु हारायणकन्धराय।
नमोस्तु पारायणचर्चिताय नमोऽस्तु नारायण तेऽर्चिताय॥1॥

नमोऽस्तु मत्स्याय लयाब्धिगाय नमोऽस्तु कूर्माय पयोब्धिगाय।
नमो वराहाय धराधराय नमो नृसिंहाय परात्पराय॥2॥

नमोऽस्तु शक्राश्रयवामनाय नमोऽस्तु विप्रोत्सवभार्गवाय।
नमोऽस्तु सीताहितराघवाय नमोऽस्तु पार्थस्तुतयादवाय॥3॥

नमोऽस्तु बुद्धाय विमोहकाय नमोऽस्तु ते कल्किपदोदिताय।
नमोऽस्तु पूर्णामितसद्गुणाय समस्तनाथाय हयाननाय॥4॥

करस्थशङ्खोल्लसदक्षमालाप्रबोधमुद्राऽभयपुस्तकाय।
नमोऽस्तु वक्रोद्गिरदागमाय निरस्तहेयाय हयाननाय॥5॥

रामासमाकारचतुष्टयेन क्रमाच्चतुर्दिक्षु निषेविताय।
नमोऽस्तु पार्श्वद्वयगद्विरूपश्रियाऽभिषिक्ताय हयाननाय॥6॥

किरीटपट्टाङ्गदहारकाञ्चीसुरत्नपीताम्बरनूपुराद्यैः।
विराजिताङ्गाय नमोऽस्तु तुभ्यं सुरैः परीताय हयाननाय॥7॥

विदोषकोटीन्दुनिभप्रभाय विशेषतो मद्गुमुनिप्रियाय।
विमुक्तवन्द्याय नमोऽस्तु विष्वद्विधूतविघ्नाय हयाननाय॥8॥

नमोऽस्तु शिष्टेष्टदवादिराजकृताष्टकाभिष्टुतचेष्टिताय।
दशावतारैस्त्रिदशार्थदाय निशेशबिम्बस्थहयाननाय॥9॥

## दशावतारस्तुति॥42॥

ॐ॥ प्रोष्ठीश विग्रह सुनिष्ठीवनोद्धत विशिष्टाम्बुचारि जलधे
कोष्ठन्तराहित विचेष्टागमौघ परमेष्ठीडित त्वमव माम्।
प्रेष्ठार्क सूनु मनुचेष्टार्थमात्मविदतीष्टो युगान्त समये
स्थेष्ठात्म श्रृङ्गधृतकाष्ठाम्बुवाहन वराष्टा पद प्रभतनो॥1।।

खन्डी भवद्बहुलडिण्डीर जृम्भणसुचण्डी कृतोदधिमहा
काण्डाति चित्रगतिशौण्डाद्य हैमरदभाण्डा प्रमेय चरित।
चण्डाश्व कण्ठमदशुण्डाल दुर्हृदयगण्डाभि खण्ड करदो
श्चण्डामरेश हयतुण्डा कृते दृशमखण्डा मलं प्रदिश मे॥2।।

कूर्माकृते त्ववतु नर्मात्म पृष्ठ धृतभर्मात्म मन्दरगिरे
धर्माव लम्बन सुधर्मा सदा कलितशर्मा सुधा वितरणात्।
दुर्मान राहु मुखदुर्मायि दानव सुमर्माभि भेदन पटो
घर्मार्क कान्तिवरवर्मा भवान् भुवननिर्माण धूत विकृतिः॥3।।

धन्वन्तरेऽङ्गरुचिधन्वंतरेऽरितरुधन्वंस्तरी भव सुधा
भान्वन्तरावसथ मन्वन्तराधिकृततन्वन्तरौषधनिधे।
धन्वन्तरङ्गशुगुधन्वन्तमाजिषु वितन्वन् ममाब्धि तनयाः
सून्वन्तकात्म हृदतन्वन्तरावयवतन्वन्तरार्ति जलधौ॥4।।

| |
|---|
| या क्षीर वार्धि मथनाक्षीण दर्प दितिजाक्षोभितामर गणा-<br>पेक्षाप्तयेऽजनि वलक्षांशु बिम्बजिदतीक्ष्णालकावृतमुखी।<br>सूक्ष्माव लग्न वसनाऽऽक्षेप कृत्कुच कटाक्षा क्षमी कृत मनो-<br>दीक्षा सुराहृत सुधाऽक्षाणि नोऽवतु सुरूक्षे क्षणाद्धरितनुः॥5\|\| |
| शिक्षादि युङ्गिगमदीक्षा सुलक्षण परीक्षाक्षमा विधिसती<br>दाक्षायणी क्षमति साक्षाद्रमाऽपि न यदाक्षेप वीक्षण विधौ।<br>प्रेक्षाक्षि लोभकरलाक्षार सोक्षितपदाक्षेप लक्षित धरा<br>साऽक्षारितात्मतनुभूक्षार कारिनिटिलाक्षाऽक्षमानवतु नः॥6\|\| |
| नीलाम्बुदाभ शुभशीलाद्रि देहधर खेला धृतो दधिधुनी-<br>शैलादियुक्त निखिलेलाकटाद्यसुरतूलाटवीदहन ते।<br>कोलाकृते जलधिकालाचलावयवनीलाब्ज दंष्ट्र धरणी-<br>लीलास्पदोरु तल मूलाशियोगिवरजालाभि वन्दित नमः॥7\|\| |
| दम्भोलि तीक्ष्ण नखसम्भेदितेन्द्ररिपुकुम्भीन्द्र पाहि कृपया<br>स्तम्भार्भकासहन डिम्भाय दत्तवर गम्भीरनाद नृहरे।<br>अम्भोधि जानुसरणाम्भोज भूपवनकुम्भीन सेश खगराट्<br>कुम्भीन्द्र कृत्तिधरजम्भारि षण्मुख मुखाम्भोरुहाभिनुत माम् ॥8\|\| |
| पिङ्गाक्ष विक्रम तुरङ्गादि सैन्य चतुरङ्गावलिप्त दनुजा- |
| साङ्गाध्वरस्थ बलिसाङ्गावपात हृषिताङ्गामरालिनुत ते।<br>शृङ्गार पाद नखतुङ्गाग्र भिन्न कनकाङ्गाण्ड पाति तटिनी- |
| तुङ्गाति मङ्गलतरङ्गाभि भूतभजकाङ्गाघ वामन नमः॥9\|\| |

ध्यानार्ह वामन तनो नाथ पाहि यजमाना सुरेश वसुधा-
दानाय याचनिक लीनार्थ वाग्वशितनाना सदस्य दनुज।
मीनाङ्क निर्मल निशानाथ कोटि लसमानात्म मौञ्जि गुणकौ-
पीनात्मासूत्र पदयानातपत्रकरकानम्यदण्ड वरभृत्॥10||

धैर्याम्बुधे परशुचर्याधि कृत्तखलवर्यावनीश्वर महा-
शौर्याभि भूतकृतवीर्यात्म जातभुजवीर्यावलेपनिकर।
भार्यापराध कुपितार्याज्ञया गलितनार्यात्म सूगलतरो
कार्याऽपराधमविचार्यार्यमौघ जयिवीर्यामिता मयि दया॥

श्रीराम लक्ष्मण शुकाराम भूरवतु गौराम लामित महो-
हाराम रस्तुतयशो राम कान्तिसुतनो राम लब्धकलह।
स्वाराम वर्यरिपुवीराम यर्धिकर चीरामला वृतकटे
स्वाराम दर्शन जमाराम याभिगतसुघोराम नोरथहर॥12||

श्रीकेशव प्रदिश नाकेश जातकपिलोकेश भग्न रविभू-
स्तोकेत रार्तिहरणाकेवलार्थ सुखधीकेकि काल जलद।
साकेतनाथवरपाकेरमुख्यसुतकोकेन भक्तिमतुलां
राकेन्दु बिम्बमुख काकेक्षणापह हृषीकेश तेऽङ्घ्रि कमले॥13||

रामे नृणां हृदभिरामे नराशिकुलभीमे मनोऽद्य रमतां
गोमेदिनी जयितपोऽमेय गाधिसुतकामे निविष्ट मनसि।
श्यामे सदा त्वयि जितामेय तापस जरामे गताधिक समे
भीमेश चापदलनामेय शौर्यजितवामेक्षणे विजयिनि॥14||

कान्तार गेहखलकान्ता रटद्ददनकान्ताल कान्तकशरं
कान्ताऽऽर याऽम्बुजनिकान्तान्व वायविधुकान्ताश्म भाधिप हरे।
कान्तालि लोलदलकान्ताभिशोभितिलकान्ता भवन्तमनु सा
कान्तानु यानजितकान्तार दुर्गकटकान्ता रमा त्ववतु माम्॥15||

दान्तं दशानन सुतान्तं धरामधि वसन्तं प्रचण्ड तपसा
क्लान्तं समेत्य विपिनान्तं त्ववाप यमनन्तं तपस्वि पटलम्।
यान्तं भवारति भयान्तं ममाशु भगवन्तं भरेण भजतात्
स्वान्तं सवारि दनुजान्तं धराधर निशान्तं सतापस वरम्॥16||

शम्पाभ चापलवकम्पास्त शत्रुबलसम्पादिता मितयशाः
शं पाद तामरससम्पातिनोऽल मनुकम्पार सेन दिश मे।
सम्पाति पक्षि सहजं पापि रावण हतं पावनं यदकृथा
स्त्वं पापकूप पतितं पाहि मां तदपि पम्पासर स्तटचर॥17||

लोलाक्ष्यपेक्षित सुलीला कुरङ्ग वधखेला कुतूहल गते
स्वालाप भूमि जनिबालाप हार्यनुजपालाद्य भो जय जय।
बालाग्नि दग्धपुरशाला निलात्म जनिफालात्त पत्तलरजो
नीलाङ्गदादि कपिमालाकृतालि पथमूलाभ्यतीत जलधे॥18||

तूणीर कार्मुक कृपाणी किणाङ्क भुजपाणी रवि प्रतिमभाः
क्षोणीधरालि निभघोणी मुखादि घनवेणी सुरक्षणकरः।
शोणीभवन्न यनकोणी जिताम्बुनिधिपाणीरिता र्हणमणि
श्रेणी वृताङ्घ्रिरिह वाणीश सूनुवरवाणीस्तुतो विजयते॥19||

हुङ्कार पूर्वमथ टङ्कार नादमतिपङ्काऽवधार्य चलिता
लङ्का शिलोच्च यविशङ्कापतद्विदुरशङ्काऽऽस यस्य धनुषः।
लङ्काधिपोऽम नुत यं काल रात्रिमिव शङ्का शताकुलधिया
तं काल दण्डशतसङ्काश कार्मुक शराङ्कान्वितं भज हरिम् ॥20॥

धीमान मेयतनुधामाऽऽर्त मङ्गलदनामा रमा कमलभू
कामारि पन्नगपकामाहि वैरिगुरुसोमादि वन्द्य महिमा।
स्थेमादि नापगतसीमाऽवतात् सखलसामाज रावणरिपू
रामाभिधो हरिरभौमाकृतिः प्रतनसामादि वेद विषयः ॥21॥

दोषाऽऽत्म भूवशतुराषाड तिक्रमजरोषात्म भर्तृ वचसा
पाषाण भूतमुनियोषावरात्म तनुवेषादि दायि चरणः।
नैषाद योषिदशुभेषा कृदण्ड जनिदोषा चरादि शुभदो
दोषाग्र जन्ममृतिशोषाप होऽवतु सुदोषाङ्घ्रि जात हननात्॥22॥

वृन्दावनस्थ पशुवृन्दावनं विनुतवृन्दारकैक शरणं
नन्दात्मजं निहतनिन्दाकृदा सुरजनं दाम बद्ध जठरम्।
वन्दामहे वयममन्दा वदात रुचिमन्दाक्ष कारि वदनं
कुन्दालि दन्त मुतकन्दासित प्रभतनुं दाव राक्षस हरम्॥23॥

गोपालकोत्सव कृतापार भक्ष्यरससूपान्न लोप कुपिता
शापालया पितलयापाम्बु दालि सलिलापाय धारित गिरे।
स्वापाङ्ग दर्शन जतापाङ्ग रागयुतगोपाङ्गनां शुकहृति
व्यापार शौण्ड विविधापाय तस्त्वमवगो पारिजात हरण॥24॥

कंसादिका सदवतंसाव नीपतिविहिंसाकृतात्म जनुषं
संसार भूतमिह संसार बद्धमनसं सार चित्सुख तनुम्।
संसाधयन्त मनिशं सात्त्विक व्रजमहं सादरं बत भजे
हंसादिता पसरिरंसास्पदं परमहंसादि वन्द्य चरणम्॥25॥

राजीव नेत्र विदुराजीव मामवतु राजीव केतन वशं
वाजीभ पत्ति नृपराजी रथान्वित जराजीव गर्वशमन।
वाजीश वाह सितवाजीश दैत्यतनुवाजीश भेद करदो-
र्जाजी कदम्बनवराजीव मुख्य सुमराजी सुवासित शिरः॥26॥

काली ह्रदावसथकालीय कुण्डलिपकालीस्थ पाद नखरा-
व्यालीन वांशुकरवाली गणारुणितकाली रुचे जय जय।
केलील वापहृतकालीश दत्तवरनालीक दृप्त दितिभू
चूलीक गोपमहिलाली तनूघु सृणधूली कणाङ्क ह्रदय॥27॥

कृष्णादि पाण्डुसुतकृष्णा मनः प्रचुरतृष्णा सुतृप्ति करवाक्
कृष्णाङ्क पालिरत कृष्णाभि धाघहर कृष्णादि षण्महिल भो।
पुष्णातु मामजित निष्णात वार्धिमुदनुष्णांशु मण्डल हरे
जिष्णो गिरीन्द्रधर विष्णो वृषावरज धृष्णो भवान् करुणया॥28॥

रामा शिरोमणिधरामा समेत बलरामानु जाभिध रतिं
व्योमा सुरान्तकर ते मार तात दिश मे माधवाङ्घ्रिकमले।
कामार्त भौमपुररामावलि प्रणयवामाक्षि पीत तनुभा
भीमाहिनाथ मुखवैमानिकाभिनुत भीमाभि वन्द्यचरण॥29॥

सक्ष्वेल भक्ष्य भयदाक्षिश्रवो गणजलाक्षेप पाश यमन
लाक्षागृह ज्वलनरक्षो हिडिम्ब बकभैक्षान्न पूर्व विपदः।
अक्षानु बन्ध भवरूक्षाक्षर श्रवणसाक्षान्महिष्य वमती
कक्षानु यानमधमक्ष्माप सेवनमभीक्ष्णाप हास मसताम्॥30||

चक्षाण एव निजपृक्षाग्र भूदश शताक्षात्म जादि सुहृदा-
माक्षेप कारि कुनृपाक्षोहिणी शत बलाक्षोभ दीक्षित मनाः।
ताक्ष्यासि चापशरतीक्ष्णारि पूर्वनिजलक्ष्माणि चाप्य गणयन्
वृक्षालयध्वज रिरक्षाकरो जयति लक्ष्मीपति र्यदुपतिः॥31||

बुद्धावतार कविबद्धानुकम्प कुरु बद्धाञ्जलौ मयि दयां
शौद्धोदनि प्रमुखसैद्धान्तिका सुगमबौद्धागम प्रणयन।
क्रुद्धाहिता सुहृतिसिद्धासि खेटधर शुद्धाश्व यान कमला-
शुद्धान्त मां रुचिपिनद्धाखिलाङ्ग निजमद्धाऽव कल्क्यभिध भो॥32||

सारङ्ग कृत्तिधरसारङ्ग वारिधर सारङ्ग राज वरदा
सारं गदारितरसारं गतात्ममदसारं गतौषध बलम्।
साराङ्ग वत्कुसुमसारं गतं च तव सारङ्ग माङ्घ्रियुगलं
सारङ्ग वर्णमपसारङ्ग ताब्जमदसारं गदिंस्त्वमव माम्॥33||

ग्रीवास्य वाहतनुदेवाण्डजादिदशभावाभिराम चरितं
भावाति भव्य शुभधीवादिराजयतिभूवाग्विलास निलयम्।
श्रीवागधीश मुखदेवाभिनम्य हरिसेवार्चनेषु पठता-
मावास एव भविताऽवाग्भवेतर सुरावास लोक निकरे॥34||

## चतुर्विंशतिमूर्तिभेदस्तोत्रम्॥43॥

ॐ। अधरं दक्षिणं हस्तमारभ्यैव प्रदक्षिणम्।
मूर्तिभेदान्हरेर्वक्ष्ये भवबन्धविमुक्तये॥1॥

श्रीमत्पङ्कजशङ्खचक्रगदया सम्भूषिते केशवे
शङ्खाम्भोजगदासुदर्शनधरे नारायणे सर्वदा।
भक्तिर्मेऽस्तु गदारिशङ्कजलजैर्युक्ते दृढा माधवे
गोविन्दे वरचक्रधारिणि गदाफुल्लाब्जशङ्खाङ्किते॥2॥

कौमोदक्यरविन्दशङ्खविदधच्चक्रं च विष्णुर्मुदा
चक्राङ्को मधुसूदनो दधदसौ शङ्खाब्जकौमोदकीः।
नित्यं पद्मगदारिशङ्खसहितश्चित्ते मम त्रिक्रमो
युक्तस्तिष्ठतु शङ्खचक्रगदया पद्मी सदा वामनः॥3॥

वन्दे श्रीधरमब्जचक्रगदया शङ्खेन चालङ्कृतं
नित्यं पाहि गदारिपङ्कजदरान् बिभ्रद्धृषीकेश माम्।
शङ्खाब्जारिगदाधराद्य कुरु मे श्रीपद्मनाभाभयं
श्रीदामोदरमब्जशङ्खगदिनं सारिं प्रपन्नोऽस्म्यहम्॥4॥

कौमोदक्युरुशङ्खपद्मसदरिः सङ्कर्षणः शर्मदो
भूयात्सोऽग्र्यगदादरारिकमलः श्रीवासुदेवोऽस्तु मे।
प्रद्युम्नश्च रथाङ्गकम्बुगदया युक्तोऽब्जपाणिर्मुदे
चक्री चारुगदी सशङ्खकमलो देवोऽनिरुद्धोऽस्तु मे॥5॥

देवेशः पुरुषोत्तमोऽरिकमलः शङ्खी गदी चिद्वपुः
बिभ्रत्पद्मगदोरुशङ्खमरिणा साकं सदाऽधोक्षजः।
शङ्खाम्भोजगदादराङ्कितचतुर्बाहुर्नृसिंहः सुखं
दद्यादद्य ममाच्युतः पृथुगदापद्मारिशङ्खी परम्॥6॥

साब्जारिः स जनार्दनोऽस्तु सदयः शङ्खी गदी मे सदा
मूर्ध्नोपेन्द्रमहं नतोऽस्मि सदरं युक्तं गदार्यम्बुजैः।
वन्दे शङ्खसुदर्शनाम्बुजगदापाणिं हरिं मुक्तये
कृष्णं शङ्खगदाब्जचक्रिणमलं भक्त्या तमभ्यर्चये॥7॥

वादिराजयतिप्रोक्तकेशवादिस्तुतिं नरः।
पठन्सर्वेष्टमाप्नोति सर्वारिष्टनिवृत्तिमान्॥8॥

## ऋणमोचनस्तोत्रम्॥44॥

ॐ। देवताकार्यसिद्ध्यर्थं सभास्तम्भसमुद्भवम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥1॥

लक्ष्म्यालिङ्गितवामाङ्गं भक्तानां वरदायकम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥2॥

आन्त्रमालाधरं शङ्खचक्राब्जायुधधारिणम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥3॥

स्मरणात्सर्वपापघ्नं कद्रूजविषनाशनम्।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥4॥

| |
|---|
| सिंहनादेन महता दिग्दन्तिभयनाशनम्।<br>श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥5॥ |
| प्रह्लादवरदं श्रीशं दैत्येश्वरविदारणम्।<br>श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥6॥ |
| क्रूरग्रहैः पीडितानां भक्तानामभयप्रदम्।<br>श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥7॥ |
| वेदवेदान्तयज्ञेशं ब्रह्मरुद्रादिवन्दितम्।<br>श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये॥8॥ |
| य इदं पठते नित्यमृणमोचनसंज्ञितम्।<br>अनृणी जायते सद्यो धनं शीघ्रमवाप्नुयात्॥9॥ |

## धीशुद्धिस्तोत्रम्॥45॥

| |
|---|
| ॐ॥ चिन्तामणिर्हयग्रीवो वशे यस्य निषेविणः।<br>सोऽपि सर्वार्थदो नृणां किमुतासौ हयाननः॥1॥ |
| यं यं चिन्मय सन्मूर्ते धर्मं कुर्मस्तवाज्ञया।<br>तं तं घ्नन्त्यसुराः किं तद्धन्ता त्वं तान्न कृन्तसि॥2॥ |
| त्वद्दत्तपुण्यवित्तं मे सद्यः पापैरपाहरन्।<br>क्रुद्धा दैत्या न दैत्यारे तद्विक्रान्तेरलं तव॥3॥ |
| स्वक्षेम राम मे कामे रक्षांस्यक्षाण्यचिक्षिपन्।<br>तत्क्षाम्यं न हृषीकेशस्याक्षय्यत्रय्यधीशितुः॥4॥ |

| |
|---|
| स्वप्नोऽपि सूचको यस्मात्तस्मादस्माकमच्युत।<br>अस्वप्नप्रिय न स्वप्नेऽप्यक्षं निक्षिप दुष्कृते॥5॥ |
| क्वाहं नृहय तेऽङ्घ्र्यर्कशरणः करुणाम्बुधे।<br>क्वेदं निस्सारसंसारनीहारावरणं मम॥6॥ |
| अनुत्साहमहोत्साहचरणस्मरणे सताम्।<br>शरणे सति जल्पन्तः किमसन्तो हसन्ति नः॥7॥ |
| कस्य कस्य प्रियं ब्रूमः स्तुमः कं कं पदे पदे।<br>कस्मै कस्मै दिशामोऽर्थं कस्माद्वाऽस्मात्प्रयोजनम्॥8॥ |
| को वा जीवापरस्त्राता देवाच्छ्रीवासुदेवतः।<br>योवागावाति यश्चोर्ध्वं तौ वातौ वामनाश्रितौ॥9॥ |
| मां चेन्मुञ्चति देवोऽसौ गां च मुञ्चति वैदिकीम्।<br>सत्यव्रतस्य नासत्यं भक्तस्यं न कदाऽपि भीः॥10॥ |
| प्रभो प्रबोध्य बोधाब्धिं प्रबुद्धबुधसाध्य ते।<br>कृपाक्षपाकरकरश्चकोरीमिव पातु माम्॥11॥ |
| सेयं श्रीशहयग्रीवदासेनाऽऽचार्यसेविना।<br>यतिना वादिराजेन स्तुतिर्धीशुद्धये कृता॥12॥ |

## चिन्ताखण्डनस्तोत्रम्॥46॥

| |
|---|
| ॐ॥ यया ते धर्मकामौ च यया ते व्यर्थमार्जनि।<br>किं तया चिन्तया जीव हन्ताहन्ताऽफला तव॥1॥ |

| |
|---|
| सुखमीशेच्छया नृणां दुःखं चापि तदिच्छया।<br>न स्वेच्छया भवेत्किञ्चिद्धन्ताहन्ताऽफला तव॥2॥ |
| अदतोमदतोऽन्धस्य जिह्वां बह्वाशिनो नर।<br>सन्तः खादन्ति दन्तास्ते हन्ताहन्ताऽफला तव॥3॥ |
| महत्त्वे ते यदाऽऽकाङ्क्षा महत्त्वेव भयं तदा।<br>जीव किं जीवनार्थेऽतश्चिन्तया चिन्तयाच्युतम्॥4॥ |
| महापद्यागतायां हि महापद्यार्थिनोऽधुना।<br>हरिणा स्वैरिणा त्राताः किं न खिन्नकृपालुना॥5॥ |
| ममता येषु ते नित्यममतास्तेऽत एव हि।<br>अहन्ता यत्र ते जीव न हन्ता तस्य किं यमः॥6॥ |
| न स्वेषां स्वेच्छयाऽकार्षीत्कष्टं वाऽत्यक्रमीदिह।<br>नरो वाऽप्यथवा नारी सुरो वाऽप्यसुरोऽपि वा॥7॥ |
| स्वेष्टानाप्त्या रोदनेन रुद्रोऽरुददिति श्रुतिः।<br>नर्ते त्वत्क्रियते किञ्चिदित्याहान्याच्युतं प्रभुम्॥8॥ |
| पार्थान्पार्थसतीमार्तां हरं भस्मासुरार्दितम्।<br>विरोचनस्य पितरं कः कष्टात्प्राग्व्यमोचयत्॥9॥ |
| शत्रवो यान्ति मित्रत्वं मित्रे मित्रे सतां हरौ।<br>मित्राण्येव च शत्रुत्वं शत्रौ शत्रौ सुरद्विषाम्॥10॥ |
| पितुर्वधे पुत्र एव कारणं प्रागभूदिति।<br>किं न श्रुतं सर्पवैरी सर्पस्यैवाभयङ्करः॥11॥ |

दुःखास्पृष्टो हरिस्त्वेको दुःखस्पृष्टास्ततोऽपरे।
अतो न भीतो दुःखेभ्यो भवानुभवधीरधीः॥12॥

सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।
इति यन्नियमस्तस्मान्नियमे नियमं कुरु॥13॥

अतो दुरन्तया स्वान्तचिन्तया किं चिदन्तया।
हयाननं दयासिन्धुं स्मर स्मरद्भीष्टदम्॥14॥

आचतुर्दशमाद्वर्षाद्या चिन्ता हृदि देहिनाम्।
वादिराजो यतिस्तस्याः खण्डनायेदमभ्यधात्॥15॥

## अभयसंस्तवः॥47॥

ॐ॥ यस्मान्मयि दयालुस्त्वमाभिमुख्यं पुराऽकरोः।
तस्मात्कदाऽपि कुत्रापि कुतोऽपि न भयं मम॥1॥

त्वद्दयार्द्रदृशा दृष्टा ब्रह्माद्या लोकपालताम्।
अगमन्निगमोद्धर्तः क्व दैन्यं क्व च ते दया॥2॥

यं पासि त्वं किम्पुरुषे सोऽत्र साक्षी कपीश्वरः।
तथा विभीषणः साक्षी दिवि साक्षी ध्रुवो ध्रुवः॥3॥

भुवोऽधस्ताद्बलिः साक्षी यद् द्वार्यद्यापि वर्तसे।
धरा च साक्षिणी या प्राग्वराहवपुषोद्धृता॥4॥

वेदश्च साक्षी यद्ग्रन्थं बिभर्षि करपङ्कजे।
गिरिश्च मन्दरः साक्षी देवाश्चाध्वनि चूर्णिताः॥5॥

भवः साक्षी भस्मदैत्यभस्मीकरणविक्रम।
दक्षस्साक्षी रक्षितो यस्त्वया देवर्षिसंसदि॥6॥

द्रौपदी च तथा साक्षीण्यक्षयाम्बरदायक।
सौभद्रस्य सुतः साक्षी यं द्रौण्यस्त्रादजीवयः॥7॥

सुधादृष्टिमृताशेषस्वसैन्योज्जीवनैकद्।
कपिसेना साक्षिणी सा प्रह्लादाजामिळावपि॥8॥

भूयो भूयः साहचर्याद्व्याप्तिर्निर्णीयते किल।
अतस्त्वं नियमेनासि भक्तानां भयभञ्जनः॥9॥

अकुतश्चिद्भयं प्राह यतस्ते पादसेवनम्।
स्मृतिर्भागवताख्या तद्व्याप्तिराप्तोक्तितोऽप्यभूत्॥10॥

दशदिक्षु गतासज्यः सतां भयजिहीर्षया।
दशश्लोक्या वादिराजश्चकाराभयसंस्तवम्॥11॥

## अक्षपञ्चकम्॥48॥

ॐ॥ गिरान्तेऽर्थानुसन्धातृश्चिरान्तेवासिनो हरे।
पुरान्ते दर्शनोत्कान्नः स्मरान्ते स्वीयमुन्नयन्॥1॥

पोषायाऽऽषाढाब्दनादवेषा शेषादिकेकिनाम्।
द्वेषान्तासुरपाषाणपेषायाशनिरोषधूः॥2॥

भाषा शेषाङ्गभूषाणां घोषाभा शोषदा द्विषाम्।
हेषा तवैषा निर्दोषा तोषाय स्याद्धयास्य मे॥3॥

हृद्याविद्याब्धिशब्दाभा मार्गे कलकलप्रभा।

स्वर्गिणामुपदेशे सा वल्गुवाद्यस्वनायते॥4॥

सेनाया वैरिसेनाया नाकिनां सपिनाकिनाम्।

भयाभयप्रद स्यान्नोऽभयायांहोभयाय सा॥5॥

भीरुणा वैरिणः पापाख्यारुणादक्षपञ्चकात्।

यतिना वादिराजेन कृतिनेयं कृतिः कृता॥6॥

## नैवेद्यप्रकारः॥49॥

ॐ नित्यानन्द चिदाकृते त्रिजगतीचित्रान्नभुक्तेऽनिशं

विष्वग्व्याप्त बृहच्छरीर निरनिष्टावद्यविद्रावण।

मुक्ताधीश्वर दुर्घटान्नघटनाचातुर्यधुर्य प्रभो

कः कुर्यात्प्रति ते विनाऽञ्जलिपुटं भक्तोऽल्पको वा महान्॥1॥

सर्पिः पायसकर्दमामृतनदीनाथेदमाद्यं किल

क्षुद्रक्षीरमपूपशाकविविधान्नाद्यं किलेदं तव

दुग्धाब्ध्युन्मथनोत्थसद्घन सुधाविश्राणनं योऽकरो-

स्तस्य श्रीश तवान्वहं नम इति प्रह्वत्वमेवार्हणम्॥2॥

भक्त्या नाभजमीदृशं त्वसदृशं त्वां सद्घशं मादृशं

प्रत्यर्प्यादृतया दृशं निजमनस्याद्यादृशं तादृशम्।

सोऽहं दुर्विषयौघमोहविषमो दोषोत्थरोषो द्विषो

नाथेमां सुरयूथनाथ कुरुते गाथाब्धिपाथः पथम्॥3॥

वादिराजयतिप्रोक्तं श्लोकत्रयमिदं सदा।
पूजावसानसमये पठेत्केशवसन्निधौ॥4॥

## सप्तरात्रोत्सवप्रकारः॥50॥

ॐ॥ देवोपदेवाः पितरो योगीन्द्राश्चक्रवर्तिनः।
श्रीविष्णुपार्षदाः सर्वेऽप्यायान्तूत्सवरक्षकाः॥1॥

घ्नन्त्वन्तरायान्परितः कृन्तन्तु परिपन्थिनः।
सन्तारयन्तु कर्माब्धिं सन्तु सन्तोषदाः सदा॥2॥

हीनतां पूरयन्त्वेते हानिर्मास्त्वत्र काचन।
ज्ञानानन्दमयः श्रीमान् श्रीनाथः प्रीयतां प्रभुः॥3॥

सप्तरात्रोत्सवास्सर्वे सार्थकास्सन्तु सन्ततम्।
तृप्तोऽस्तु लक्ष्मीरमणोऽस्माकं युष्मदनुग्रहात्॥4॥

इन्द्रो महैश्वर्यदः स्यादस्मिन्नुत्सवकर्मणि।
हुतं तु सुहुतं कुर्यात्सप्तजिह्वो हुताशनः॥5॥

यमो नियमयेच्छत्रूंत्रिर्ऋतिर्हन्तु राक्षसान्।
वरुणो वारयेद्विघ्नान्वायुर्ज्ञानप्रदोऽस्तु नः॥6॥

धनदस्तु धनं भूरि दद्यादुत्सवपूर्तये।
चन्द्रः शान्तिकरो भूयादाह्लादयतु च प्रजाः॥7॥

विद्रावयेदभ्द्राणि रुद्रो रौद्रपराक्रमः।
अनन्तोऽनन्तफलदमिमं कुर्यान्महोत्सवम्॥8॥

| |
|---|
| ब्रह्मा सर्वाणि कर्माणि सम्यञ्चीह करोतु नः।<br>हरे भवत्प्रसादेन मोक्षाख्यफलसिद्धये॥9॥ |
| अङ्कुरारोपणं पूर्वं किङ्करैः क्रियते तव।<br>पार्षदाः पान्त्वहोरात्रमस्मिन्नुत्सवकर्मणि॥10॥ |
| विष्णोस्सर्वाणि भूतानि रक्षन्तु परितो दिशम्।<br>विष्वक्सेनश्च विघ्नेशो विष्वक्स्वस्वगणैर्युतौ॥11॥ |
| निकृन्ततां चान्तरायं शान्तिं च कुरुतां सदा।<br>पञ्चोत्सवाः पञ्चदिनेष्वथो विष्णुरथोत्सवः॥12॥ |
| पश्चादवभृथस्नानं द्रष्टॄणां सन्तु तुष्टये।<br>प्राग्रत्नमण्टपे कुर्यादुत्सवं श्रीपतेः सुधीः॥13॥ |
| पश्चात्सिंहोत्सवं कुर्याद्गजोत्सवमतः परम्।<br>शेषोत्सवं ततः कुर्यात्ताक्ष्योत्सवमतः परम्॥14॥ |
| रथोत्सवं ततः कुर्यादलङ्कृत्य जनार्दनम्।<br>सर्वोत्सवस्य श्रीभर्तुः सर्वोत्सवशिरोमणिः॥15॥ |
| रथोत्सवोऽयं दद्यान्नो मनोरथमहोत्सवम्।<br>सप्तरात्रोत्सवान्यस्तु भक्त्या सेवेत मानवः॥16॥ |
| सप्तलोकोपरिस्थोऽस्य विष्णुर्हस्तगतो भवेत्।<br>नमोऽस्तु विष्णवे तुभ्यं श्रियै चास्तु नमोनमः॥17॥ |
| नमोऽस्तु परिवारेभ्यो देवेभ्यः शिवमस्तु नः।<br>तृप्तस्त्रिविक्रमस्सर्वोत्तमस्सप्तभिरुत्सवैः॥18॥ |

दद्यादायुः श्रियं भक्तिं मुक्तिं च भजतां सताम्।
जनास्सुकृतिनस्सन्तु मनोऽस्तु मधुसूदने॥19॥

भक्तिर्भवेद्भवो नश्येन्नश्येयुरघराशयः।
पूर्वापूर्वक्रमज्ञास्यै सप्तरात्रमहर्निशम्॥20॥

इमं स्तवं यस्तु पठेद्वादिराजसमीरितम्।
दिने दिने तस्य भवेदायुः श्रेयश्च मङ्गलम्॥21॥

आहूय देवतास्सर्वा मन्त्रेणानेन मान्त्रिकः।
आरभेतोत्सवं विष्णोर्भेरीताडनपूर्वकम्॥22॥

वाचयित्वा स्वस्त्ययनं स्तोत्रमेतद्दिवौकसाम्।
अङ्कुरारोपणात्पूर्वं पठेयुर्हरिकिङ्कराः॥23॥

## स्वप्नपद्यम्॥51॥

सुदर्शनपदाम्भोजसमीपस्थोऽहमन्वहम्।
गृहीतमस्तकस्तु स्यां भयभञ्जनपाणिना॥1॥

## सहस्रारस्तुतिः॥52॥

ॐ॥ सहस्रार महाशूर रणधीर गिरा स्तुतिम्।
षट्कोण रिपुहृद्बाण सन्त्राण करवाणि ते॥1॥

यस्त्वत्तस्तप्तसुतनुः सोऽस्ति मुक्तिफलं किल।
नातप्रतनुर्नित्यस्तौत् ख्याता वाक् त्वां महौजस॥2॥

हतवक्रद्विषच्चक्र हरिचक्र नमोऽस्तु ते।
प्रकृतिघ्नासतां विघ्न त्वमभग्नपराक्रम॥3॥

| |
|---|
| कराग्रे भ्रमणं विष्णोर्यदा ते चक्र जायते।<br>तदा द्विधाऽपि भ्रमणं दृश्यतेन्तर्बहिर्द्विषाम्॥4॥ |
| वरादवध्यदैत्यौघशिरः खण्डनचातुरी।<br>हरेरायुध ते दृष्टा न दृष्टा या हरायुधे॥5॥ |
| अवार्यवीर्यस्य हरेः कार्येषु त्वं धुरन्धरः।<br>असाध्यसाधको राट् ते त्वं चासाध्यस्य साधकः॥6॥ |
| ये चिन्नकन्धराश्चक्र दैतेयास्तव धारया।<br>त एव चित्रमनयंस्तथाऽप्यच्छिन्नकन्धराम्॥7॥ |
| अरे तवाग्रे नृहरेरारिः कोऽपि न जीवति।<br>नेमे तवाग्रे कामाद्या नेमे जीवन्त्वहो द्विषः॥8॥ |
| पवित्र पविवत्त्वाहि पवित्रीकुरु चाश्रितान्।<br>चरण श्रीशचरणौ स्थिरीकुरु मनस्सु नः॥9॥ |
| यस्त्वं दुर्वाससः पुष्ठनिष्ठो दृष्टोऽखिलैः सुरैः।<br>अस्तावयः स्वभर्तारं स(त)त्वं स्तावय मद्गिरा॥10॥ |
| भूस्थदुर्दर्शनं सर्वं धिक्कुरुष्व सुदर्शन।<br>वायोः सुदर्शनं सर्वस्यायोध्यं कुरु ते नमः॥11॥ |
| सुष्टु दर्शय लक्ष्मीशतत्त्वं सूर्यायुतप्रभ।<br>द्वारं नः कुरु हर्यास्यै कृतद्वार तमस्यपि॥12॥ |
| पद्यानि निरवद्यानि वादिराजाभिधः सुधीः।<br>द्वादश द्वादशारस्य चक्रस्य स्तुतयेऽकृत॥13॥ |

# चक्रस्तुतिः॥53॥

ॐ॥ दोषौघवारणं यस्य धारणं मोक्षकारणम्।
न वैदिकं तप्तचक्रधारणं यदि मन्यसे॥1॥

ग्रन्थादौ मङ्गलं तर्हि कस्मान्नावैदिकं तव।
शिष्टाचारात्स्मृतिः कल्प्या स्मृतेश्च श्रुतिकल्पना॥2॥

यदि तत्र तथैतस्मिन्किन्न कल्पयसि श्रुतिम्।
द्वारकायायिभिस्सर्वैरद्यापि प्राक्प्रवेशतः॥3॥

निम्बादित्यानुगैः प्राज्ञैर्मायावाद्येकदेशिभिः।
विष्णुस्वामिमतस्थैश्च रामानुजमताश्रयैः॥4॥

तत्त्ववादिजनाचार्यैः शिष्टश्रेष्ठैरनुष्ठिते।
कैश्चिच्चीर्णमिदं नोचेत्यक्तं तदपि नास्तिकैः॥5॥

बहुशिष्टजनाचारः प्रमाणमुभयत्र च।
स्वमूलग्रन्थभागेषु तथा प्रकरणेषु च॥6॥

निबन्धेषु च सर्वेषु केनापीदं न दूषितम्।
अनाचारस्तु केषाञ्चिदनाचारः प्रकल्प्यताम्॥7॥

त्यजेदेकं कुलस्यार्थमिति न्यायं विजानत।
नृसिंहपरिचर्यायां रामार्चाचन्द्रिकादिषु॥8॥

श्रुतिस्मृतिपुराणोक्त्या तैरपीदं प्रसाधितम्।
न नः पूर्वैः पराक्रान्तं सर्वसम्प्रतिपत्तितः॥9॥

| |
|---|
| इदानीमाग्रहादेव विवदन्ते क्वचित्क्वचित्।<br>दुराग्रहग्रहं तेषां केषाञ्चिन्मनसि स्थितम्॥10॥ |
| निवर्तयेत्सुप्रयुक्तःश्रौतो मन्त्रो महात्मभिः।<br>अवैदिकमिदं चेत्ते ब्रह्मैक्यं वैदिकं कुतः॥11॥ |
| श्रुतयस्तत्र चेत्सन्ति न सन्ति किमिहागमाः।<br>यद्येतेषामितोऽन्योऽर्थः कल्प्यते स्वकपोलतः॥12॥ |
| श्रुतिस्मृतिसमाख्यातस्तत्रान्यार्थो न किं श्रुतः।<br>आग्रहोऽयं परेषां चेत्तथाऽयं किन्तु नाग्रहः॥13॥ |
| वादिविप्रतिपन्नाभिः श्रौतत्वं तूभयोस्समम्।<br>यद्यश्रौतमिदं कर्म यज्ञोऽश्रौतः कथं न ते॥14॥ |
| तन्मूलभूतवेदानामतत्वावेदकत्वतः।<br>अन्यार्थकल्पनेनापि तत्त्ववेदकता गता॥15॥ |
| तेनैवावेदकत्वं चेदध्वरस्य कथं न तत्।<br>अधुना बाधवैधुर्यादव्यावहारिकमानता॥16॥ |
| समोभयत्र केषाञ्चिन्मते बाधोऽत्र तत्र च।<br>वेदाप्रामाण्यशंसित्वादशिष्टौ तावुभावपि॥17॥ |
| व्यावहारिकमानत्वं मूढाप्रामाण्यमेव हि।<br>अतप्रधारणं चेत्स्यात्तन्मूलेनैतदागतम्॥18॥ |
| सदा तदुक्तलाभार्थमिदं प्राज्ञैर्हिरण्मयी।<br>पवित्रमुद्रेव कुशश्रुतिमूला प्रधार्यते॥19॥ |

| |
|---|
| किमग्निनाऽपराद्धं ते किं चक्रेण मुरद्विषः।<br>किं वा सद्भिरनिर्भीतैः किं पुराणैस्त्रयीगिरा॥20॥ |
| निषेधवाक्याद्भीतिस्तु तप्तातप्ताङ्कयोस्समा।<br>तत्सर्वं तप्तगं कुर्वन्समः स्वार्थपरार्थयोः॥21॥ |
| अमन्त्राहोममूलाङ्कविषयं कुरु लाघवात्।<br>शिष्टाचारविरुद्धोऽर्थस्स्वसारं चाधिरोहति॥22॥ |
| इत्यादौ त्यज्यते वेदे किं पुनः स्मृतिकोणगः।<br>यदि स्मृतिमनादृत्य श्रुतावनुदितत्वतः॥23॥ |
| विधिं न मानयस्येनं निषेधः केन मान्यते।<br>नहि श्रुतिसती धर्ममिमं क्वापि निषेधति॥24॥ |
| सुदर्शनकृतोद्योगनिष्कण्टकितपद्धतिः।<br>तूष्णीं स्थितेऽपिलोकेऽस्मिन्नङ्गीकार इतीर्यते॥25॥ |
| शास्त्रेऽप्यप्रतिषिद्धं चेद्गीयतेऽनुमतं त्विति।<br>यदि स्मृत्युक्तमाचारमश्रौतं मन्यते भवान्॥26॥ |
| शौचादौ दिग्विभागं च वैचित्र्यं मृतिकाग्रहे।<br>योग्यायोग्यदिनत्वं च दन्तधावनकर्मणि॥27॥ |
| काष्टे ग्राह्याग्राह्यतां च तथाऽऽचमनपद्धतिम्।<br>गृह्योक्तं पार्वणविधिं भोज्याभोज्यपदार्थताम्॥28॥ |
| क्रमं षोडशसंस्कारे श्राद्धादीनां दिनान्यपि।<br>तर्हि त्यक्त्वाव्रात्यदशामाश्रय त्वविशङ्कितः॥29॥ |

| |
|---|
| सर्वधर्मान्परित्यज्येत्यादिवाक्यमुपाश्रितः।<br>नारदीये बृहति ते बलं वाक्यचतुष्टयम्॥30॥ |
| पाद्मगारुडमुख्येषु सन्त्यस्माकं सहस्रशः।<br>द्वैधे बहूनां वचनमिति न्यायेन तत्त्यजन्॥31॥ |
| अङ्गीकुरु हरेश्चक्रधृतिं मुक्तिसृतिं पराम्।<br>अष्टादशपुराणस्थान्यस्मद्वाक्यानि सर्वशः॥32॥ |
| मुख्यान्युपपुराणस्थवाक्येभ्यो न हि बिभ्यति।<br>पञ्चरात्रस्य विष्णूक्तेः सर्वैः प्रामाण्यमिष्यते॥33॥ |
| प्रतिष्ठापर्वपूजाद्या देवानां स्युः कथं न चेत्।<br>श्रुतिप्रतीकं सङ्गृह्य पवित्राख्यां प्रदाय च॥34॥ |
| तत्र प्रथमसंस्कारस्तप्तचक्राङ्क ईर्यते।<br>तद्विरुद्धमृषिप्रोक्तं दुरुक्तमिति गृह्यते॥35॥ |
| उभयोः कलहे साक्षी विजातीयो हि मान्यते।<br>यच्छास्त्रं लिङ्गपारम्यं परं दैवमुमापतिम्॥36॥ |
| तमः प्रवर्तकं वक्ति तामसं तत्प्रचक्षते।<br>इति गारुडवाक्येन तथा पाद्मगतेन च॥37॥ |
| विष्ण्वाधिक्यविरोधित्वे पुराणस्मृतिविद्ययोः।<br>अपि तामसतैवोक्ता ततोऽप्यन्यदुपेक्षताम्॥38॥ |
| नहि तामसमाश्रित्य तमः प्राप्तुं त्वमर्हसि।<br>श्रीमद्भागवतं सर्वैः पूर्वैर्नो भवतामपि॥39॥ |

| |
|---|
| पुराणेषूत्तमत्वेन श्रुतं मतमुपाश्रितम्।<br>तत्रापि विष्णुमाहात्म्यरसायनविरोधिनाम्॥40॥ |
| शैवोक्तिविषबिन्दूनां तामसत्वमुदाहृतम्।<br>वाचं हीनां मया रक्षन् दुःखदुःखी भवेदिति॥41॥ |
| श्रुण्वन्ति येऽन्यविषयाः कुकथा मतिनाशिनीः।<br>ते तमः प्राप्नुवन्तीति वन्ध्यां न बिभृयाद्गिरम्॥42॥ |
| इत्यादौ तेन चोक्तं नः सर्वं चार्वेव गम्यते।<br>मल्लक्षणमिमं कायं कृत्वा मद्धर्ममाश्रितः॥43॥ |
| स्वलिङ्गधारणेनेति तत्रोक्तं चक्रलाञ्छनम्।<br>श्रुतितात्पर्यसिद्धेऽर्थे विरोधं कुर्वती स्मृतिः॥44॥ |
| विरोधे त्वनपेक्षं स्यादित्यमानत्वमेष्यति।<br>पवित्रं त इति ह्येका गोविन्दुर्बिभ्रदायुधम्॥45॥ |
| येन देवाः पवित्रेण आत्मानं पुनते सदा।<br>तेन सहस्रधारेण पावमान्यः पुनन्तु माम्॥46॥ |
| इत्याद्यृचि यजुर्वेदे लोकस्य द्वारमित्यपि।<br>चरणं पूतमिति च तथा साम्नि स्फुटं वचः॥47॥ |
| नेमिना तप्तसुतनुः सायुज्यं प्राप्नुयादिति।<br>उरुक्रमाङ्कैः सुभगा वयमेभिरिहाङ्किताः॥48॥ |
| इत्यथर्वग तंवाक्यं तथा श्रुतिशिरस्यपि।<br>अद्यापि गौर्जरैर्विप्रैः पठ्यमाने गुरोर्मुखात्॥49॥ |

| |
|---|
| धृतोऽर्ध्वपुण्ड्रः श्रितसच्चक्रधारी हरिं परम्।<br>यो ध्यायेत्स महात्मेति स्पष्टमर्थान्तरोज्झितम्॥50॥ |
| सन्ति स्मृतीतिहासाद्याः पुराणानि च कोटिशः।<br>सुदर्शनस्य मीमांसा कृता ह्यस्मत्पुरातनैः॥51॥ |
| तत्रोद्धृतेषु वाक्येषु कथमेतेषु संशयः।<br>यदि वाक्यं स्वयं कृत्वा प्रावक्ष्यन्पूर्वसूरयः॥52॥ |
| तर्ह्यर्च्यनेकभेदायां कुतो वाक्यं निजेच्छया।<br>नाकरिष्यन्त्रतिस्पष्टमनर्थान्तरसम्भवम्॥53॥ |
| प्रावर्तन्त कथं पूर्वे सर्वेऽप्यास्तिकमौलयः।<br>सृष्टैर्वाक्यैर्न चेत्सर्वविप्लवः स्याज्जिनोक्तितः॥54॥ |
| स वक्ति सर्वमाम्नायां रक्षसा केनचित् कृतम्।<br>पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनम्॥55॥ |
| पर्यायवाचका ह्येते चक्रस्य परमात्मनः।<br>पुराणोक्तिरियं चक्रं पवित्राद्याख्ययाऽऽह हि॥56॥ |
| मर्त्यानुशासनं ग्राह्यं किं पुनः स्मार्तशासनम्।<br>पविवत्रायते लोकानिति व्युत्पत्तिसम्भवात्॥57॥ |
| योगरूढिबलायाता पवित्राख्या सुदर्शने।<br>इमां श्रुतिमुपादाय पुराणान्येव सर्वशः॥58॥ |
| प्रमाणयन्ति स्वोक्तेऽस्मिंस्तप्तचक्राङ्कधारणे।<br>अतोऽन्यार्थः श्रुतेरस्याः कथं शक्यो मनीषिभिः॥59॥ |

| |
|---|
| सति नेतरि मार्गस्य किमन्योक्तः क्रमो भवेत्।<br>पवित्रपदनिर्दिष्टमर्थं वेदस्तमेव हि॥60॥ |
| सहस्रधारनामोक्त्या चक्रत्वं स्पष्टयत्यहो।<br>षट्कोणत्वाभिधां चक्रच्छायामाद्याप्युपाददत्॥61॥ |
| कुशग्रन्थिरपि ह्यासीत्पवित्राख्यो महीतले।<br>यथा चित्रस्थसिंहस्य सिंहासादृश्यमात्रतः॥62॥ |
| सिंहतायां मुख्यसिंहो वन्य एवेति निर्णयः।<br>तथा पवित्रानामैतच्चक्रस्यैवेति गम्यते॥63॥ |
| षट्कोणता सर्वमते चक्रस्यैव हि लक्षणम्।<br>आगमोक्तं पवित्रं च षट्कोणग्रन्थितोऽभवत्॥64॥ |
| अतोऽन्यार्थकथा वाताहता शुष्कलताऽभवत्।<br>तत्पवित्रमिदं व्याप्तं यत्त्वं पर्येषि विश्वतः॥65॥ |
| इति श्रुत्युदितं विष्णुव्याप्त्या व्याप्तत्वमेव च।<br>चक्रस्येवोचितं विप्रकुशस्यात्यन्तबाधितम्॥66॥ |
| प्राक्प्रसक्तपवित्रेण तप्तातप्तत्वमिष्यते।<br>पञ्चाग्निकृततापोक्तौ दूषणद्वयमागतम्॥67॥ |
| प्रसक्तस्य परित्यागो ह्यप्रसक्तपरिग्रहः।<br>आमत्वोक्त्या तप्तचक्रदाहाभावो हि दूष्यते॥68॥ |
| अग्निदूरसमीपस्थवस्तुन्यामत्वसाम्यतः।<br>शृतास इति शब्दार्थो दाहवन्तो न तापसाः॥69॥ |

पादोक्तौ स्यात्पवित्रेणेत्येतद्व्यर्थं पदान्तरम्।

चक्रं प्रयुज्य निबिडं तमो निर्बिद्य रन्ध्रतः॥70॥

अनन्तासनलोकं स्वं प्राप कृष्णः सहार्जुनः।

इति पौराणिकख्यात्या लोकस्य द्वारताऽपि च॥71॥

चक्रस्यैवोचिताऽन्यत्र शक्योऽतोऽर्थो न शङ्कितुम्।

अपि चार्थद्वये प्राप्ते समाख्यैकार्थसाधिका॥72॥

तत्पुराणसमाख्यानादर्थोऽयमवधार्यते।

मीमांसाभिधविख्यातसीमासाम्राज्यकारिभिः॥73॥

यद्यप्याम्नायमार्गेऽस्मिन्वक्तुं बहु च शक्यते।

तथाऽप्यल्परणोद्योगे योद्धुः शूरस्यनोचितम्॥74॥

महाप्राकारकरणमिति मत्वोपरम्यते।

कुमतध्वान्तनिर्भेदी स्वमताम्भोधिसम्भ्रमः॥75॥

हयग्रीवोल्लसच्चन्द्रपादः खेदापहोऽस्तु नः।

हयग्रीवपदद्वन्द्वचिन्तनासक्तचेतसा।

यतिना वादिराजेन चक्रस्तुतिरियं कृता॥76॥

## अधिकरणनामावलिः॥54॥

सङ्क्षेपतो ब्रह्मसूत्रभाष्याधिकरणार्थवत्तया परमात्मनो नम्यत्वोक्तिः क्रियते

ॐ विशिष्टाधिकारिकमोक्षफलकजिज्ञासागोचराय नमः ॐ॥1-1-1-1॥

ॐ जगज्जन्माद्यष्टकर्त्रे ॐ॥1-1-2-2॥

| |
|---|
| ॐ वेदादिसकलशास्त्रजनितनिखिलजगज्जन्मादि कारणत्वप्रमागोचराय नमः ॐ ॥ 1-1-3-3 ॥ |
| ॐ उपक्रमादिलिङ्गकनिखिलशास्त्रतात्पर्यगोचराय नमः ॐ ॥ 1-1-4-4 ॥ |
| ॐ सर्वशब्दमुख्यवाच्याय नमः ॐ ॥ 1-1-5-5 ॥ |
| ॐ अन्यत्रप्रसिद्धनामात्मकाशेषशब्दसमन्वयप्रतिपादकपाद-प्रतिपाद्याय नमः ॐ ॥ 1-1-6-6 ॥ |
| ॐ आनन्दमयादिगुणिसामान्यवाच्यानन्दादिगुणवाचि शब्दसमन्वयगोचराय नमः ॐ ॥ 1-1-7-7 ॥ |
| ॐ सर्वान्तस्थेद्राद्यशेषाधिदैवगतशब्दवाच्याय नमः ॐ ॥ 1-1-8-8 ॥ |
| ॐ आकाशाद्याधिभौतिकसर्वशब्दवाच्याय नमः ॐ ॥ 1-1-9-9 ॥ |
| ॐ प्राणाद्यशेषाध्यात्मिकसर्वशब्दवाच्याय नमः ॐ ॥ 1-1-10-10 ॥ |
| ॐ कर्णाद्यगोचरज्योतिषे नमः ॐ ॥ 1-1-11-11 ॥ |
| ॐ गायत्रीशब्दवाच्याय नमः ॐ ॥ 1-1-12-12 ॥ |
| ॐ त्रिविधोपासागोचरप्राणशब्दवाच्याय नमः ॐ ॥ 1-1-13-13 ॥ |
| ॐ सर्वगताय नमः ॐ ॥ 1-2-1-14 ॥ |
| ॐ चराचरात्त्रे नमः ॐ ॥ 1-2-2-15 ॥ |
| ॐ गुहांप्रविष्टत्वप्रयुक्तसुकृतफलभोक्त्रे नमः ॐ ॥ 1-2-3-16 ॥ |
| ॐ अक्ष्यादित्याद्यन्तस्थाय दिव्यदृष्टिगोचराय नमः ॐ ॥ 1-2-4-17 ॥ |
| ॐ सर्वान्तर्यामिणे नमः ॐ ॥ 1-2-5-18 ॥ |
| ॐ अदृश्यत्वादिगुणकाय नमः ॐ ॥ 1-2-6-19 ॥ |

| |
|---|
| ॐ पाचकत्वादिमद्वैश्वानराय नमः ॐ॥1-2-7-20॥ |
| ॐ अन्यत्रप्रसिद्धलिङ्गात्मकाशेषशब्दवाच्याय नमः ॐ॥1-2-8-20॥ |
| ॐ द्युभ्वाद्यायतनाय नमः ॐ॥ 1-3-1-21॥ |
| ॐ भूम्ने नमः ॐ ॥1-3-2-22॥ |
| ॐ अक्षराय नमः ॐ॥ 1-3-3-23॥ |
| ॐ सते नमः ॐ॥1-3-4-24॥ |
| ॐ हृत्पद्मस्थाय नमः ॐ ॥1-3-5-25॥ |
| ॐ आनुकूल्येन गृह्यमाणाय नमः ॐ ॥1-3-6-26॥ |
| ॐ ईशानाय नमः ॐ॥1-3-7-27॥ |
| ॐ ब्रह्मविद्याधिकारिदेवोपास्याय नमः ॐ॥ 1-3-8-28॥ |
| ॐ शूद्राद्यैर्वेदविद्याऽविज्ञेयाय नमः ॐ॥1-3-9-29॥ |
| ॐ वज्राय नमः ॐ ॥1-3-10-30॥ |
| ॐ ज्योतिषे नमः ॐ॥1-3-11-31॥ |
| ॐ आकाशाय नमः ॐ॥1-3-12-32॥ |
| ॐ स्वाप्नादिद्रष्ट्रे असङ्गाय नमः ॐ॥1-3-13-33॥ |
| ॐ नित्यमहिम्ने ब्राह्मणाय नमः ॐ॥1-3-14-34॥ |
| ॐ उभयत्रप्रसिद्धानामलिङ्गात्मकाशेषशब्दवाच्याय नमः ॐ |
| ॥1-3--34॥ |
| ॐ अव्यक्ताय नमः ॐ॥1-4-1-35॥ |
| ॐ कर्मतदङ्गवाचिच्योतिष्टोमवसन्तादिशब्दवाच्यायनमः ॐ॥1-4-2-36॥ |

| |
|---|
| ॐ बहुत्वसङ्ख्याविशिष्टवाचिपञ्चजनादिशब्दवाच्याय नमः ॐ ॥1-4-3-37॥ ॐ |
| ॐ अवान्तरकारणवाच्याकाशादिशब्दवाच्याय नमः ॐ ॥1-4-4-38॥ |
| ॐ सकललौकिकवैदिकशब्दपरममुख्यार्थाय नमः ॐ ॥1-4-5-39॥ |
| ॐ प्रकृत्याद्यशेषस्त्रीलिङ्गशब्दवाच्याय नमः ॐ ॥1-4-6-40॥ |
| ॐ निषेधमुखवेद्यशब्दवाच्यसदादिशब्दवाच्यायाशेषस्वरवर्ण-पदवाक्यात्मकाशेषशास्त्रयोनयेजगज्जन्मादिकर्तृत्वमुखानन्तगुणाय नमः ॐ ॥ 1-4-7-41॥ |
| ॐ अन्यत्रैव प्रसिद्धाशेषशब्दवाच्याय नमः ॐ ॥1-4--41॥ |
| ॐ सकलविरोधशून्यसमन्वयगोचराय नमः ॐ ॥2-1--42॥ |
| ॐ अप्रमाणावैदिकस्मृत्यविरुद्धकारणत्ववते नमः ॐ ॥2-1-1-42॥ |
| ॐ फलविसंवाद्यनित्यविलक्षणवेदगोचराय नमः ॐ ॥2-1-2-43॥ |
| ॐ जडत्वयुक्त्यविरुद्धमृदाद्यभिमानिवक्तृत्वपरवेदगोचराय नमः ॐ |
| ॥2-1-3-44॥ |
| ॐ विश्वप्रागभावकर्तृत्वसाधकयुक्त्यविरुद्धकर्तृत्ववते नमः ॐ ॥2-1-4-45॥ |
| ॐ जीवाभिन्नत्वयक्त्यविरुद्धसर्वकर्तृत्ववते नमः ॐ ॥2-1-5-46॥ |
| ॐ स्वतन्त्रसाधनान्तरसापेक्षत्वयुक्त्यविरुद्धस्वतन्त्रकर्तृत्ववते नमः ॐ |
| ॥2-1-6-47॥ |
| ॐ जीवकर्तृत्वयुक्त्याविरुद्धकारणत्ववते नमः ॐ ॥2-1-7-48॥ |
| ॐ सर्वशक्तिप्रसक्त्यादियुक्त्यविरुद्धकर्तृत्ववते नमः ॐ ॥2-1-8-49॥ |
| ॐ निष्फलत्वादियुक्त्यविरुद्धकर्तृत्ववते नमः ॐ ॥2-1-9-50॥ |

| |
|---|
| ॐ वैषम्यादिदोषप्राप्तिरूपयुक्त्यविरुद्धसर्वकर्तृत्ववते नमः ॐ ॥2-1-10-51॥ |
| ॐ चेतनत्वयुक्त्यविरुद्धसर्वगुणपूर्णत्ववते नमः ॐ ॥2-1-11-52॥ |
| ॐ सर्वयुक्त्यविरुद्धगुणपूर्णत्ववते नमः ॐ ॥2-1--52॥ |
| ॐ निरीश्वरसाङ्ख्यसमयाविरुद्धकारणत्ववते नमः ॐ ॥ 2-2-1-53॥ |
| ॐ सेश्वरसाङ्ख्यसमयाविरुद्धस्वतः कर्तृत्ववते नमः ॐ ॥2-2-2-54॥ |
| ॐ चार्वाकसमयाविरुद्धजगत्कारणत्ववते नमः ॐ ॥2-2-3-55॥ |
| ॐ पुरुषोपसर्जनप्रकृतिकर्तृत्वसमयाविरुधकारणत्ववते नमः ॐ ॥2-2-4-56॥ |
| ॐ प्रकृत्युपसर्जनपुरुषकर्तृत्वसमयाविरुद्धजगत्कर्तृत्ववते नमः ॐ ॥2-2-5-7॥ |
| ॐ वैशेषिकादिसमयाविरुद्धसर्वगुणपूर्णत्ववते नमः ॐ ॥2-2-6-58॥ |
| ॐ वैभाषिकसौत्रान्तिकसमयाविरुद्धजगत्कर्तृत्ववते नमः ॐ ॥2-2-7-59॥ |
| ॐ शून्यसमयाविरुद्धजगत्कारणत्ववते नमः ॐ ॥2-2-8-60॥ |
| ॐ विज्ञानवादिसमयाविरुद्धजगत्कारणत्ववते ॐ ॥2-2-9-61॥ |
| ॐ जैनसमयाविरुद्धजगत्कारणत्ववते ॐ ॥2-2-10-62॥ |
| ॐ पाशुपतमताविरुद्धजगत्कारणत्ववते नमः ॐ ॥2-2-11-63॥ |
| ॐ शक्तिमताविरुद्धजगत्कारणत्ववते नमः ॐ ॥2-2-12-64॥ |
| ॐ सर्वकुसमयाविरुद्धजगत्कर्तृत्ववते नमः ॐ ॥2-2--65॥ |
| ॐ आकाशोत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥2-3-1-65॥ |
| ॐ मुख्यवायूत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥2-3-2-66॥ |
| ॐ स्वोत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥ 2-3-3-67॥ |
| ॐ तेजोजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥ ॥2-3-4-68॥ |

| |
|---|
| ॐ अजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥2-3-5-69॥ |
| ॐ द्वारविषयश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥2-3-6-70॥ |
| ॐ स्वाकर्तृकजगत्संहारश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥2-3-7-71॥ |
| ॐ अधिभूतादिसंहारकश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥ 2-3-8-72॥ |
| ॐ अधिभूतादिलयक्रमश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥ 2-3-9-73॥ |
| ॐ स्वलयश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-3-10-74॥ |
| ॐ जीवजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥ 2-3-11-75॥ |
| ॐ जीवपरिमाणश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ |
| ॥2-3-12-76॥ |
| ॐ जीवसांशत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-3-13-77॥ |
| ॐ जीवैक्यश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-3-14-78॥ |
| ॐ जीवनित्यत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥2-3-15-79॥ |
| ॐ जीवस्वरूपश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥2-3-16-80॥ |
| ॐ जीवकर्तृत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-3-17-81॥ |
| ॐ जीवेशांशत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ |
| ॥2-3-18-82॥ |
| ॐ जीवप्रतिबिम्बत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ |

| |
|---|
| ॥2-3-19-83॥ |
| ॐ इति श्रुतिपरस्पराविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-3--83॥ |
| |
| ॐ इन्द्रियोत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-1-84॥ |
| ॐ मनोजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-2-85॥ |
| ॐ वागुत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-3-86॥ |
| ॐ प्राणसङ्ख्याश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ ॥2-4-4-87॥ |
| ॐ प्राणपरिमाणश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-5-88॥ |
| ॐ मुख्यप्राणजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-6-89॥ |
| ॐ मुख्यप्राणपारतन्त्र्यश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥ 2-4-7-90॥ |
| ॐ दासप्राणश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-8-91॥ |
| ॐ प्राणाणुत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-9-92॥ |
| ॐ जीवकरणत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-10-93॥ |
| ॐ मुख्यप्राणस्येन्द्रियत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥ 2-4-11-94॥ |
| ॐ प्रपञ्चस्रष्टृत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-12-95॥ |
| ॐ शरीरकराणविषयश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥2-4-13-96॥ |
| ॐ इति न्यायोपेतश्रुतिपरस्पराविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ॥3-1-1-96॥ |
| ॐ वैराग्यादिप्रसादान्तसाधनप्राप्याय नमः ॐ॥3-1-1-96॥ |

| |
|---|
| ॐ भक्तिदार्ढ्यप्रयोजकवैराग्यगम्याय नमः ॐ ॥3-1-1-96॥ |
| ॐ भूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ ॥3-1-1-97॥ |
| ॐ समस्तभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॥3-1-2-98॥ |
| ॐ प्राणगत्यविनाभूतभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ ॥3-1-3-99॥ |
| ॐ विशेषप्रमाणोक्तभूतवियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॥3-1-4-100॥ |
| ॐ श्रद्धाशब्दोपलक्षितभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ ॥3-1-5-101॥ |
| ॐ अथहैनमित्युक्तभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ ॥3-1-6-102॥ |
| ॐ वैराग्यादिव्यतिरिक्तकर्मागम्याय नमः ॐ ॥3-1-7-103॥ |
| ॐ अवश्यानुष्ठेयवैराग्यादिसाधनगम्याय नमः ॐ ॥3-1-8-103॥ |
| ॐ स्वर्गागतिक्लेशिताज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ ॥3-1-9-105॥ |
| ॐ गतागतक्लेशिताज्ञानप्रयोज्यकाम्यकर्मवैराग्यगम्याय नमः ॐ |
| ॥3-1-10-106॥ |
| ॐ अज्ञानिमात्रसाधारणगतागतदुःखज्ञानप्रयोज्यवैराग्यगम्याय नमः ॥3-1-11-106॥ |
| ॐ भगवद्द्वेषादिगतिनित्यनिरयसाधनताज्ञानप्रयोज्यातिवैराग्यगम्याय नमः ॐ ॥3-1-12-108॥ |

| |
|---|
| ॐ नरकगतसदुःखताज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ ॥3-1-13-109॥ |
| ॐ गत्यस्वातन्त्र्यप्रयोज्यवैराग्यगम्याय नमः ॐ ॥3-1-14-110॥ |
| ॐ अन्धेतमसिदुःखविशिष्टत्वज्ञानप्रयोज्यातिवैराग्यगम्याय नमः ॐ |
| ॥3-1-15-111॥ |
| ॐ कर्मिगतधूमादिदेवताभावाप्रयोजकताज्ञानप्रयोज्य वैराग्यगम्याय नमः ॐ ॥3-1-16-112॥ |
| स्वर्गावरोहोत्तराचिरगर्भवासप्राप्तिज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ ॥3-1-17-113॥ |
| ॐ व्रीह्यादिभावनिरासप्रयोज्यप्रामाण्यवद्वेदविहितवैराग्यगम्याय नमः ॐ ॥3-1-18-114॥ |
| ॐ स्वर्गावरोहोत्तरपितृप्रवेशज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ ॥3-1-1-115॥ |
| ॐ पितृद्वारा मातृयोनिप्रवेशज्ञानसाध्यातिवैराग्यगम्याय नमः ॐ ॥3-1-20-116॥ |
| ॐ भक्तिलक्षणसाधनगम्याय नमः ॐ॥3-1--116॥ |
| ॐ भक्तिप्रयोजकस्वप्ननियामकत्वमहिम्ने नमः ॐ॥3-2-1-117॥ |
| ॐ भक्तिप्रयोजकस्वप्नतिरोधाननियामकत्वमहिम्ने नमः ॐ॥3-2-2-118॥ |
| ॐ भक्तिप्रयोजकजाग्रत्प्रवर्तकत्वमहिम्ने नमः ॐ॥ 3-2-3-119॥ |
| ॐ भक्तिप्रयोजक सुप्तप्राप्यत्वमहिम्ने नमः ॐ॥3-2-4-120॥ |
| ॐ भक्तिप्रयोजक सुप्तप्रबोधकत्वमहिम्ने नमः ॐ ॥ 3-2-5-121॥ |

| |
|---|
| ॐ भक्तिप्रयोजक सर्व जीवसम्बन्धिसार्वकालिकसर्वावस्थानियामकत्व महिम्ने नमः ॐ ॥ 3-2-6-122 ॥ |
| ॐ भक्तिप्रयोजकावान्तरावस्थासंस्थितजीवप्राप्यत्वमहिम्ने नमः ॐ ॥ 3-2-7-123 ॥ |
| ॐ भक्ति प्रयोजगक स्वगतभेदशून्यत्वापादकनिर्दोषत्वाशेषगुणपूर्णत्वमहिम्ने नमः ॐ ॥ 3-2-8-124 ॥ |
| ॐ भक्तिप्रयोजकाप्राकृतरूपवत्त्वमहिम्ने नमः ॐ ॥ 3-2-9-125 ॥ |
| ॐ भक्तिप्रयोजकजीवाभेदशून्यत्ववते नमः ॐ ॥ 3-2-10-126 ॥ |
| ॐ जीवगतस्वसादृश्याभिव्यञ्जनात्मकफलवद्भक्तिगम्याय नमः ॐ ॥ 3-2-11-127 ॥ |
| ॐ भक्तिकर्तव्यताप्रयोजकभक्त्यनुसारिफलदातृत्ववते नमः ॐ ॥ 3-2-12-128 ॥ |
| ॐ भक्तिप्रयोजक पालकत्वरूपमहामहिम्ने नमः ॐ ॥ 3-2-13-129 ॥ |
| ॐ भक्तिप्रयोजक स्वतोऽव्यक्तत्वमहिम्ने नमः ॐ ॥ 3-2-14-130 ॥ |
| ॐ भक्तिप्रयोजक गुणित्ववते नमः ॐ ॥ 3-2-15-131 ॥ |
| ॐ भक्तिप्रयोजकालौकिकगुणवत्त्वमहिम्ने नमः ॐ ॥ 3-2-16-132 ॥ |
| ॐ भक्तिप्रयोजक ब्रह्माद्यानन्दादिबिम्बानन्दादित्ववते नमः ॐ ॥ 3-2-17-133 ॥ |
| ॐ भक्तिप्रयोजक पुरुषप्रयत्नजन्यध्यानगोचरविलक्षणत्वप्रयुक्ताव्यक्तत्वमहिम्ने नमः ॐ ॥ 3-2-18-134 ॥ |
| ॐ भक्तिप्रयोजक सार्वदेशिकसार्वकालिकसृष्ट्यादिकर्तृत्ववते नमः ॐ ॥ 3-2-19-135 ॥ |

| |
|---|
| ॐ भक्तिप्रयोजक कर्मफलदातृत्वमहिम्ने नमः ॐ॥ 3-2-20-136॥ |
| ॐ उपासनालक्षणसाधनगम्याय नमः ॐ ॥3-3-1136॥ |
| ॐ सर्ववेदनिर्णयोत्पाद्यज्ञानविषयाय नमः ॐ ॥3-3-1-137॥ |
| ॐ सर्वगुणोपसंहारात्मकोपासनागोचराय नमः ॐ ॥3-3-2-138॥ |
| ॐ पुरुषयोग्यताभेदव्यवस्थितोपसंहारानुपसंहारयोग्यगुणवते नमः ॐ ॥3-3-3-139॥ |
| ॐ महाफलदबहुगुणोपसंहाररूपोपासनागोचराय नमः ॐ ॥3-3-4-140॥ |
| ॐ सर्वमुमुक्षुसाधारणचतुर्गुणोपसनाजन्यापरोक्षज्ञानगोचराय नमः ॐ ॥3-3-5-141॥ |
| ॐ प्रियशिरस्त्वादिगुणाविषयकसर्वमुमुक्षुसाधारणोपासनागम्याय नमः ॐ ॥3-3-6-142॥ |
| ॐ चतुर्गुणसर्वगुणेतरदेवकर्तृकोपसंहारयोग्यमध्यमगुणाश्रयाय नमः ॐ ॥3-3-7-143॥ |
| ॐ स्वनामरूपसर्वविद्याप्रतिपाद्योपसंहर्तव्यानुपसंहर्तव्यसर्व गुणवते नमः ॐ ॥3-3-8-144॥ |
| ॐ आत्मशब्दोदितचतुर्गुणोपासनाऽधीनापरोक्षज्ञानगोचराय नमः ॐ ॥3-3-9-145॥ |
| ॐ चतुर्मुखतदितराधिकारिसापेक्षात्मशब्दकारणकाभिधानयोग्यसर्वगुणाल्पगुणवते नमः ॐ॥3-3-10-146॥ |
| ॐ ध्यातव्यालौकिकगुणवते नमः ॐ॥3-3-11-147॥ |

| |
|---|
| ॐ स्वसदृशफलदोपासनाजन्यदर्शनाविषयाय नमः ॐ ॥3-3-12-148॥ |
| ॐ युगपदात्मशब्दोदितसर्वगुणोपासनागम्याय नमः ॐ ॥3-3-13-149॥ |
| ॐ देवादिमात्रोपास्यसम्भूतिध्युव्याप्तिमते नमः ॐ ॥3-3-14-150॥ |
| ॐ सर्वशाखाविप्रकीर्णापेक्षितसर्वगुणोपासनाजापरोक्षगोचराय नमः ॐ ॥3-3-15-151॥ |
| ॐ यत्याद्ययोग्यहिंसादिफलकसर्वानधिकारिकभेदनाद्युपासायोग्याय नमः ॐ ॥3-3-16-152॥ |
| ॐ मुक्तावप्यनुवर्तमानोपासनागोचराय नमः ॐ ॥3-3-17-153॥ |
| ॐ अनियतमुक्तकर्तृककर्मैज्याय नमः ॐ ॥3-3-18-154॥ |
| ॐ ज्ञानोत्तरमोक्षनियमप्रयोज्यनिश्शङ्कोपासाविषयाय नमः ॐ ॥3-3-19-155॥ |
| ॐ मौक्तानन्दतारतम्यप्रयोजकोपासनाऽधिकारिनियतिमदुपास्याया नमः ॐ ॥3-3-20-156॥ |
| ॐ अधिकार्यग्रेसरप्राणोपास्यसर्वगुणोपाश्रयाय नमः ॐ ॥3-3-21-157॥ |
| ॐ सर्वाधिकार्युत्तमप्राणोत्तमाय नमः ॐ ॥3-3-22-158॥ |
| ॐ सत्योपर्युपदिष्टविज्ञानमतिश्रद्धानिष्ठाकृतिसुखभूमाहङ्कारात्मस्वरूपाय नमः ॐ ॥3-3-23-159॥ |
| ॐ भगवद्दर्शनसाधनोपासनाऽनधिकारिरमोपास्याय नमः ॐ ॥3-3-24-160॥ |

| |
|---|
| ॐ श्रवणमननध्यानात्मकसमस्तोपासनासाध्यापरोक्षगोचराय नमः ॐ ॥3-3-25-161॥ |
| ॐ प्रसादपूर्वकगुरुप्रदानपूर्वकश्रवणादिरूपोपासनागोचराय नमः ॐ ॥3-3-26-162॥ |
| ॐ बलीयस्तमगुरुप्रसादरूपेतिकर्तव्यतायुक्तश्रवणाद्युपासनागोचराय नमः ॐ ॥3-3-27-163॥ |
| ॐ पूर्वप्राप्तानधिकावरत्ववद्भिन्नसमग्रानुग्रहकर्तृगुरुप्रसादयुतोपासागोचराय नमः ॐ ॥3-3-28-164॥ |
| ॐ कर्माद्यसाध्यज्ञानसाध्यप्राप्तिकर्मणे नमः ॐ ॥3-3-29-165॥ |
| ॐ बलवच्छ्रुतिलिङ्गोपपत्तिवचनबोधितमोक्षसाधनत्ववज्ज्ञानविषयाय नमः ॐ ॥3-3-30-166॥ |
| ॐ हरिगुरुभक्तिशमदमाद्युपेतगुरुप्रसादयुतोपासागोचराय नमः ॐ ॥3-3-31-167॥ |
| ॐ विविधोपासनासाध्यविविधज्ञानविषयाय नमः ॐ ॥3-3-32-168॥ |
| ॐ महरादिमात्रप्रापकसामान्यदर्शनातिरिक्तबिम्बदर्शनप्राप्याय नमः ॐ ॥3-3-33-169॥ |
| ॐ भक्तिसामर्थ्याप्रयोज्यस्वप्रसादैकसाध्यापरोक्षगोचराय नमः ॐ ॥ 3-3-34-170॥ |
| ॐ इन्द्रार्जुनाद्यंशांश्यभेदप्रयोज्यानादियोग्यतासापेक्षोपासागोचराय नमः ॐ ॥3-3-35-171॥ |

| |
|---|
| ॐ यथायोग्याद्देवतोपासनायुक्तोपासनागम्याय नमः ॐ॥3-3-36-172॥ |
| ॐ भूमत्वेन सर्वमुमुक्षुपास्यानन्दादिमते नमः ॐ॥3-3-37-173॥ |
| ॐ अधिकारितारतम्यानुसारप्रतीतिमद्भूमत्वोपासनागोचराय नमः ॐ ॥3-3-38-174॥ |
| ॐ दुरितादिनिवृत्तिफलकवैकल्पिकनृसिंहाद्युपासनासहित बिम्बोपासनाप्राप्याय नमः ॐ॥3-3-39-175॥ |
| ॐ अर्थादिकामसाधनवैकल्पिकोपासनायोग्यगुणवद्प्रविशेषाय नमः ॐ ॥3-3-40-176॥ |
| ॐ देवताधिकारिकतत्तदङ्गप्राप्तिफलकतत्तदङ्गाश्रितत्वोपासागोचराय नमः ॐ॥3-3-43-178॥ |
| ॐ सर्वशाखास्वनुक्तत्वप्रयुक्तसर्वोपास्यताहीनाङ्गाश्रितत्वोपासा गोचराय नमः ॐ॥3-3-42-177॥ |
| ॐ अपरोक्षज्ञानाख्यसाधनगम्याय नमः ॐ ॥3-3--177॥ |
| ॐ सर्वपुरुषार्थसाधनत्वमहिमोपेतज्ञानविषयाय नमः ॐ॥3-4-1-178॥ |
| ॐ सर्वानधिकारिकत्वमहिमोपेतज्ञानगोचराय नमः ॐ॥3-4-2-179॥ |
| ॐ दौर्लभ्यवत्सम्पूर्णाधिकारविषयज्ञानप्राप्याय नमः ॐ॥3-4-3-180॥ |
| ॐ असत्प्रवृत्तावपिमोक्षसाधनत्वनियमलक्षणमहिमोपेतज्ञान साध्यप्राप्तिकर्मणे नमः ॐ॥3-4-4-181॥ |
| ॐ योग्यैकसाध्यत्वमहिमोपेतज्ञानसाध्यप्राप्तिकर्मणे नमः ॐ॥3-4-5-182॥ |

| |
|---|
| ॐ देवादिपदाकाङ्क्षाशून्यैरेव प्राप्यत्वमहिमोपेतज्ञानप्राप्याय नमः ॐ ॥3-4-6-183॥ |
| ॐ अस्वामिनोऽपिसन्निधिमात्रेणफलदानरूपमहिमोपेतज्ञानप्राप्याय नमः ॐ ॥3-4-7-184॥ |
| ॐ यतीनामेव ज्ञानाधिकारातिशयप्रयुक्तमर्माधिकाशियोपेतज्ञानप्राप्याय नमः ॐ॥3-4-8-185॥ |
| ॐ अतिगोप्यत्वमहिमोपेतज्ञानसाध्यप्राप्तिमते नमः ॐ॥3-4-9-186॥ |
| ॐ प्रतिबन्धाभावे साधनसम्पत्तिजन्मन्येवोदयवज्ज्ञानसाध्यप्राप्तिमते नमः ॐ ॥3-4-10-187॥ |
| ॐ स्वोत्पत्तिजन्मानन्तरमेव प्रतिबन्धाभावेमुक्तिसाधनत्वमहिमोपेतज्ञान विषयाय नमः ॐ॥3-4-11-188॥ |
| ॐ स्वदर्शनसाध्यस्वप्रसादद्वारकस्वप्राप्तिमते नमः ॐ॥3-4--188॥ |
| ॐ कर्मक्षयसाधनापरोक्षज्ञानविषयाय नमः ॐ॥3-4-188॥ |
| ॐ अवश्यम्भाविनित्यशः कार्यश्रवणाद्यावृत्तिसाध्यज्ञानगोचराय नमः ॐ ॥4-1-1-189॥ |
| ॐ नित्यशः कर्तव्यस्वनिष्ठात्मत्वोपासनासाध्यज्ञानगोचराय नमः ॐ ॥4-1-2-190॥ |
| ॐ अवश्यकविष्णुप्रतीकैक्योपासनावर्जनप्रयोज्यसर्वस्वामित्वोपासनसाध्यज्ञानगोचराय नमः ॐ॥4-1-3-191॥ |
| ॐ आवश्यकर्तव्यब्रह्मत्वोपासनासाध्यदर्शनविषयाय नमः ॐ॥4-1-4-192॥ |

| |
|---|
| ॐ तत्तदङ्गाश्रितत्वेन देवतोपासनासाध्यापरोक्षविषयाय नमः ॐ ॥4-1-5-193॥ |
| ॐ आसनादिनियमपूर्वकध्यानसाध्यज्ञानविषयाय नमः ॐ॥4-1-6-194॥ |
| ॐ प्रायणाख्यमोक्षपर्यन्तं ध्यानसाध्यज्ञानविषयाय नमः ॐ ॥4-1-7-195॥ |
| ॐ कर्मक्षयलक्षणफलसिद्धिसम्पादकज्ञानविषयाय नमः ॐ॥4-1-8-196॥ |
| ॐ देवतासम्बन्धिस्वोत्तमदेहलयतदन्यसम्बन्धिब्रह्मनाड्युत्क्रमणै तदुभयसाधनज्ञानविषयाय नमः ॐ॥4-1--196॥ |
| ॐ वाचो मनसि लयप्रयोज्यस्वप्राप्तिमते नमः ॐ ॥4-2-1-197॥ |
| ॐ मनसः प्राणे लयप्रयोज्यस्वप्राप्तिमते नमः ॐ॥4-2-2-198 |
| ॐ स्वस्मिन्प्राणलयप्रयोज्यस्वप्राप्तिमते नमः ॐ ॥4-2-3-199॥ |
| ॐ समस्तभूतेषु देवतालयप्रयोज्यस्वप्राप्तिमते नमः ॐ॥4-2-4-200॥ |
| ॐ अग्नावेव सर्वदेवतालयासम्भवप्रयुक्तसर्वभूताधिकरणकलय प्रयोज्यस्वप्राप्तिमते नमः ॐ॥4-2-5-201॥ |
| ॐ नित्यमुक्तप्रकृतिलयाधिकरणाय नमः ॐ॥4-2-6-202॥ |
| ॐ मोक्षे चतुर्मुखेतरदेवैरपि प्राप्याय नमः ॐ॥4-2-7-203॥ |
| ॐ मुक्तावपि स्वाधीनदेवताकाय नमः ॐ॥4-2-8-204॥ |
| ॐ अज्ञमरणविलक्षणज्ञानिमनुष्यसम्बन्धिदेहोत्क्रमणप्रयोज्यमुक्तिदात्र नमः ॐ ॥4-2-9-205॥ |
| ॐ अवश्यकर्तव्यगत्यनुस्मरणसाध्यस्वप्राप्तिमते नमः ॐ ॥ 4-2-10-206॥ |

| |
|---|
| ॐ ब्रह्मानाड्युत्क्रान्तज्ञानिसम्बन्ध्यर्चिरादिमार्गप्राप्याय नमः ॐ |
| ॥4-2-206॥ |
| ॐ अर्चिः प्राथम्यकमार्गगम्याय नमः ॐ॥4-3-1-207॥ |
| ॐ द्वितीयप्राप्यवायुकमार्गगम्याय नमः ॐ॥4-3-2-208॥ |
| ॐ संवत्सरानन्तरप्राप्यतटित्कमार्गगम्याय नमः ॐ॥4-3-3-209॥ |
| ॐ द्वितीयप्राप्याऽऽतिवाहिकवायुमन्मार्गगम्याय नमः ॐ॥4-3-4-210॥ |
| ॐ अन्तिमप्राप्यमुख्यवायुमन्मार्गगम्याय नमः ॐ॥4-3-5-211॥ |
| ॐ ज्ञान्यनुस्मरणीयगम्यरूपपरब्रह्मणे नमः ॐ॥4-3-6-212॥ |
| ॐ चतुर्मुखेन सह स्वप्राप्तिमतां बोगप्रदाय नमः ॐ |
| ॥4-3--212॥ |
| ॐ मुक्तानां स्वानतिक्रमेण स्वसमीप एव भोगदाय नमः ॐ॥4-4-1-213॥ |
| ॐ सौषुप्तिकाहरहः प्राप्तिविलक्षणमुक्तिकालीनप्राप्तिमतामेव सम्यक् स्वरूपानन्दाभिव्यक्तिप्रदाय नमः ॐ॥4-4-2-214॥ |
| ॐ मुक्तप्राप्यपरञ्ज्योतिःस्वरूपपरब्रह्मणे नमः ॐ॥4-4-3-215॥ |
| ॐ सायुज्यभाजामपि स्वभुक्तभोगभोक्तृत्वप्रयुक्तसर्वभोक्तृत्ववते नमः ॐ ॥4-4-4-216॥ |
| ॐ मुक्तानां चिद्देहेन भोगभोक्तृत्वसामर्थ्यप्रदाय नमः ॐ ॥4-4-5-217॥ |
| ॐ सङ्कल्पमात्रसाध्यभोगभोक्तृमुक्तसङ्घपरिवृताय नमः ॐ ॥4-4-6-218॥ |
| ॐ स्वाधमनियामकराहित्येन भोगवन्मुक्तसङ्घपरिवृताय नमः ॐ॥4-4-7-219॥ |

| |
|---|
| ॐ बाह्यदेहराहित्यप्रयुक्तनिर्दुःखभोगानुभववन्मुक्तसङ्घपरिवृताय नमः ॐ॥4-4-8-220॥ |
| ॐ जगत्सृष्ट्यादीतरसर्वकामावाप्तिमन्मुक्तसङ्घपरिवृताय नमः ॐ॥4-4-9-221॥ |
| ॐ वृद्धिह्रासारहितैकप्रकारानन्दानुभवितृमुक्तगणनिषेविताय नमः ॐ ॥4-4-10-222॥ |
| ॐ पुरावृत्तिशून्यस्वप्राप्तिमन्मुक्तौघावृताय नमः ॐ॥ ॥4-4-11-223॥ |
| ॐ विरक्तिभक्त्युपास्तिजनितस्वसाक्षात्कारोदितस्वप्रसादसाध्याशेष-पुरुषार्थप्रवरकैवल्यप्राप्तिसाधनाशेष गुणपूर्णत्वनिर्दोषत्वो-भयप्रकारकमननरूपजिज्ञासागोचरपरममङ्गलमूर्तिश्रीनारायणाय नमः ॐ॥ इति श्रीमद्ब्रह्मसूत्राधिकरणप्रतिपाद्यार्थवत्तया नारायणनमनं कृतमित्यशेषमतिमङ्गलम् |

**संस्कृत (ब्रह्म)सूत्रार्थः ॥55॥ रागः सारङ्गनाटि, अट्टताळ**

| |
|---|
| मन्दभाग्य मनुज त्वं क्व हरिरस्मीत्यन्ध न वद न वद भो॥ हे॥ |
| 'भिन्नोऽचिन्त्य' इति सुदृढं वेदवाक्यम् अन्यमीशमिति च श्रुतिं द्वासु-पर्णेति सुगमनिगमं नेति नेतीति भिन्नोक्तिं किं नो पश्यसि  हे॥1॥ |
| 'तद्गुणसारत्वात्तद्वादः' इति ह्यस्मिन् अध्यात्मसम्बन्धभूमेति। अद्वैतवाक्यानां हि गतिः ब्रह्मसूत्रमध्ये स्पष्टमुदिता हे॥2॥ |
| भेदव्यपदेशाच्चान्य उभयेऽपि भेदेनैनमधीयते विशेषेण। भेदव्यपदेशाभ्यां चेति ब्रह्मसूत्रसाधितार्थं किं न त्वमीक्षसे हे॥3॥ |

| |
|---|
| सह ब्रह्मणा विपश्चिता परं ज्योतिर्महदुपसम्बद्येति।<br>मुहुर्मुक्तगतं च भेदं बोधयन्तीं रहस्योक्तिं मनो वेद न ते हे॥4॥ |
| नास्ति हि नारायणसमं भावि भूतं नास्ति केशवात् परं दैवम्।<br>उत्तमः पुरुषस्त्वन्यः परमात्येत्युक्तिर्हि महाभारते॥5॥ |
| 'भेदद्दष्ट्याऽभिमानेन' 'विद्याऽऽन्पनि भिदा बोध' इति कथं ते।<br>त्वदन्यो नान्योऽस्तीत्यन्याभेदवादो भागवतवाचा हे॥6॥ |
| पादप्रक्षालनकृद्धाता यत्पादोदमादरेण धत्ते हि शम्भुः।<br>आदौ नाभिजन्मा स विधिः सद्योजातो रोदनाद्रुद्रो हि गिरिशः हेः॥7॥ |
| 'सहस्त्रशीर्षा पुरुष' न ते विष्णो महिम्नोऽन्तं परो मात्रया।<br>अहो विष्णोर्नुकं वीर्याणीत्यादि वेदं दहसि किं कुमतिप्रिय अज्ञ हे॥8॥ |
| अज्ञानं च क्व सर्वज्ञस्य तज्ज्ञानी चाज्ञानतः कथं मुक्तः।<br>अज्ञ दोषसङ्गतो दोषो भवतीति प्राज्ञवादं किं न जानासि हे॥9॥ |
| मामेव ये प्रपद्यन्ते मायामेतां धीमन्तस्ते तरन्त्येवेति।<br>श्रीमद्गीतावचनेन विरुद्धं च तामसेन्द्र हरेरज्ञानं हे॥10॥ |
| विलज्जमानाय यस्य स्थातुमीक्षास्थलेऽमुया मायया।<br>अलं हि मोहिता इति हि भागवते जलजसम्भवचनं हे॥11॥ |
| शिशुभावे पर्वतधारी तदैवोग्रविषधरमर्दनपटुः।<br>असुरारिरसि कथं त्वं दीन मर्त्यः स सिन्धुबन्धनविहारी॥12॥ |
| हरिनामभीतकिङ्कराः किं वद हरिमेव नराः किं घ्नन्ति।<br>गुरुमध्वमतमेव त्वं सर्वसारं स्मर हयवदनप्रिय अज्ञ हे॥13॥ |

# एकादशीनिर्णय॥56॥

ॐ॥ एकादशीं वृथा घ्नन्ति केचिदास्माकपण्डिताः।
तेषां लुत्यै कर्मक्लृप्त्यै कृष्णप्रीत्यै यतामहे॥1॥

अरुणोदयवेलायां दशमी यदि दृश्यते।
पापमूलं तदा ज्ञेयमेकादश्युपवासनम्॥2॥

चतस्रो घटिकाः प्रातररुणोदय उच्यते।
इत्याचार्यवचः स्मार्तं तद्विरोधोऽस्ति नः किल॥3॥

इति विप्रतिपन्नानामुत्तरं दातुमारभे।
स्यादेतद्यदि मध्वोक्ते चतुष्के दशमीस्पृशि॥4॥

उपवासं परदिने कुर्मस्तन्मार्गगा वयम्।
तत्पूर्वघटिकामात्रवेधेऽपि त्यजतां तिथिम्॥5॥

तत्त्यागः सुतरां यस्मादस्माकमकुतोभयम्।
अनुक्तोऽयं कुतः पन्था इति शङ्कान्तरं यदि॥6॥

तर्ह्यनुक्तिविरोधोऽयं तत्राप्युत्तरमारभे।
प्रमाणान्येव सङ्गृह्णन्नाचार्यैः स्वाशयं त्विमम्॥7॥

शिष्यायोपदिशन्ग्रन्थे न बबन्ध सदग्रणीः।
कृष्णाष्टमीकल्पकर्त्रा मध्वेनादर्शितं यथा॥8॥

तित्थ्यन्ते पारणं शुष्कादाचारात्तद्वदस्त्विदम्।
साम्यमात्रविवक्षायामग्रे प्रववृते स्मृतिः॥9॥

| |
|---|
| द्विमुहूर्तमनाध्याय इति साम्यवचो यथा।<br>न्यायप्राप्तो विशेषोऽयं नाङ्गीकार्यः कथं बुधैः॥10॥ |
| न हि वृद्धौ क्षये साम्ये तिथीनामेकरूपता।<br>वृद्धौ साम्ये क्षये चोषस्त्रिचतुः पञ्चनाडिकाः॥11॥ |
| इत्यादिस्मृतिवाक्येषु वैरूप्यस्यैव दर्शनात्।<br>यत एकत्र निर्णीतः शास्त्रार्थो ह्यपरत्र च॥12॥ |
| सङ्क्षेपविस्तराभ्यां हि प्रवदन्ति मनीषिणः।<br>यथा सामान्यशब्दार्थं चतुष्पदविबोधितम्॥13॥ |
| आदाय कालभेदेन निश्शेषं च वदद्वचः।<br>न विरुद्धं तथाऽऽर्योक्तसामान्यवचनं त्विदम्॥14॥ |
| साम्ये ह्रासे समादाय वृद्धिमात्रप्रभेदकम्।<br>विशेषं दर्शयद्वाक्यं विरुद्धं नैव धीमतः॥15॥ |
| न हि द्विलिप्तकामात्रं तत्कालत्वावबोधतम्।<br>घटिकात्रिकमात्रं तु वृद्धौ ह्रासे तु पञ्चकम्॥16॥ |
| कस्मादनाध्यायतायां हेतुरित्येव चिन्त्यताम्।<br>वृद्धावुन्मुखता तिथ्याः ह्रासेऽवाङ्मुखता तथा॥17॥ |
| अतिस्त्रिकं वृद्धिगतं भविष्यति चतुष्टयम्।<br>ह्रासे तथा पञ्चकं स्यादिति कृत्वैव चोदना॥18॥ |
| एवं सति महावृद्धौ दशमी षष्ठगाऽपि  या।<br>स्यादेव सप्तमस्यान्तपर्यन्ता न्यायसाम्यतः॥19॥ |

तथा च श्रीमदाचार्यवचनोल्लङ्घनाद्भयम्।
अनाश्रिताप्ततच्छिष्यवचनस्य भवेत्तव॥20॥

नास्माकं तत्कृपाभाजां तच्छिष्यकरुणाबलात्।
किं च पञ्चाशतः षष्ठघटिका व्यापिनी यदा॥21॥

दशमी तद्दिनं त्वं च मुञ्चस्येवाविशङ्कितः।
अतो वेलापदं ह्येतत्पूर्वकालस्य वाचकम्॥22॥

अनिच्छताऽपि स्वीकार्यं नीरादेरप्रसक्तितः।
नो चेन्मध्वोक्त्यवज्ञाता पूर्वकालेऽपि तां त्यजन्॥23॥

भयभाक् स्यास्स नः कालस्सप्तमी घटिका यतः।
वृथा सामान्यशब्दस्य विशेषार्थपरिग्रहान्॥24॥

कथं नार्योक्तमार्गेण श्रेयांस्तस्य परिग्रहः।
पूर्वपरत्वं षष्ठ्यर्थस्सम्बन्धः सहभाविता॥25॥

आनन्तर्यं चेति वाचा जायार्यस्यैव निश्चितम्।
शिष्टाचारात्स्मृतिः कल्प्या दृष्टा सामान्यवागसौ॥26॥

तन्मूलार्थं त्यजेन्नैव निर्मूलं तद्विरोधिनम्।
यतो मुहूर्तशब्दोऽयं साधिके घटिकाद्वये॥27॥

अपि शक्तस्ततोऽस्माकं न विरोध्यपरं वचः।
किं च टीकाकृतोक्तोऽर्थो मूलस्यातिप्रशस्यते॥28॥

न ह्यक्ष्यादित्ययोरैक्यादित्यस्यैकविधत्वतः।
इति टीकोदितोऽन्योऽर्थः परित्याज्यो विपश्चिता॥29॥

| |
|---|
| एवे चेन्मद्वशिष्येण साक्षाट्टीकाकृता कृता।<br>त्रिविक्रमार्यवर्येण मर्यादेयं किमुच्यते॥30॥ |
| न च तत्कृतपद्यत्वे शङ्कात्रोत्थातुमर्हति।<br>देशान्तरस्थविदुषामैतिह्यारव्यप्रमाणतः॥31॥ |
| पान्थ्वस्मानिति पद्यस्य वन्दे वन्द्यमितिस्तुतेः।<br>अन्यथा मध्वकृतितानिर्णयः किं कृतस्तव॥32॥ |
| साक्षाच्छ्रीमद्वशिष्याणां नवानां जयसन्मुनेः।<br>टीकाकारस्य मार्गोऽयं हेयो वाचा  कथं द्वयोः॥33॥ |
| जानन्त्यमी न किं सर्वे कृष्णामृतमहार्णवम्।<br>नैतादृशी तिथिस्तेषां काले किं काऽपि नाभवत्॥34॥ |
| गुरवस्ते किं नु मूकाः शिष्या वा द्रोहिणो गुरोः।<br>लक्ष्मीनारायणमुनेर्व्यासतीर्थार्ययोगिनः॥34॥ |
| विबुधेन्द्रमुनेर्वंशो जयतीर्थादिरेव हि।<br>बलवत्त्वं प्रतिज्ञाय बहुत्वाच्च स्वभावतः॥36॥ |
| प्रबलस्य विरोधेन दुर्बलस्यैव हेयताम्।<br>शिक्षतो मध्वमार्गस्य गतिस्ते कण्टकायते॥37॥ |
| बह्वागमविरोधेषु ब्राह्मणेषु विवादिषु।<br>उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणम्॥38॥ |
| इत्याचार्यवचः साक्षात्त्यक्तं सर्वात्मना त्वया।<br>बहुदुष्टविरोधेऽपि यतः  पूर्वैव सेव्यते॥39॥ |

| |
|---|
| एकाऽतिद्वादशीवृद्धौ नो चेद्वृद्धौ तु षोडश।<br>ह्येकलिप्ती समे ह्रासे चतुष्कादुत्तरं त्विदम्॥40॥ |
| अतिवृद्धावष्टयुगं वृद्धावष्ट समे चतुः।<br>ह्येकलिप्ती समे ह्रासे चतुष्कादुत्तरं त्विदम्॥41॥ |
| अस्यार्थः कथ्यते पूर्वविद्वच्छिक्षानुसारतः।<br>एकातिद्वादशीवृद्धौ नो चेदित्येकवाक्यता॥42॥ |
| वृद्धौ तु षोडशेत्येतदपरं तत्परं परम्।<br>आदिपादस्यादिवाक्यं द्वितीयस्य द्वितीयकम्॥43॥ |
| वाक्यं द्वितीयपद्येऽस्मिन् तृतीयस्य तृतीयकम्।<br>षड्पञ्चघटिकावृद्धिरतिवृद्धिरिहोच्यते॥44॥ |
| एकद्वित्र्यात्मिका वृद्धिः समवृद्धिरिति स्मृता।<br>चतुष्कान्मूलवाक्योक्तघटिकानां चतुष्टयात्॥45॥ |
| उत्तरं पूर्वकाले तु ज्ञेयेत्थं दशमी तिथिः।<br>अतिवृद्धौ न चेत्साम्यवृद्धौ तद्वेधवर्जिता॥46॥ |
| घटिकैका यदि भवेच्छुद्धा सा सकला तिथिः।<br>लिप्तिर्विघटिकाः पञ्च लिप्तये द्वादशैव तु॥47॥ |
| घटिकैकेति विज्ञेया ज्योतिः शास्त्रप्रमाणतः।<br>पञ्चाशदुत्तरा षष्ठी घटिकैकाऽथ लिप्तयः॥48॥ |
| चतस्रः पञ्चमीप्रान्तभागात्मकतया स्थिताः।<br>एवं षोडश पूर्वोक्ता दशमीवेधवर्जिताः॥49॥ |

यदि स्युर्लिप्तयस्तर्हि शुद्धा सा सकला तिथिः।
समे द्विलिप्तिकामात्रं ह्रासे त्वेकैव सा मता॥50॥

चतुष्कादुत्तरं त्वेतद्दशमीवेधवर्जनम्।
महाह्रासेऽधिका शुद्धिरल्पह्रासे तु विद्धता॥51॥

अपि स्यादिति सा शङ्का लिप्तिमात्रमशोधयत्।
एवं सति तदाऽप्युक्ता लिप्तिरेका पराऽपि च॥52॥

ह्रासत्वावगतेरस्याः साम्यपक्षोपमैव हि।
अतिवृद्धावष्टयुगमष्टद्वन्द्वं हि षोडश॥53॥

लिप्तयो वेधहीनाः स्युर्वृद्धौ सत्यां समे दिने।
सति साम्ये न वृद्धिश्चेदिति यावत्तदष्टकम्॥54॥

चतुष्टयं च लिप्तीनामेवं द्वादश लिप्तयः।
घटिकैका भवेत्सर्वा दशमीवेधवर्जिता॥55॥

अन्यत्स्पष्टं लिप्तिमात्राश्रयात्श्लोकोयमुत्तरः।
इति श्रीमद्वकृपया हयग्रीवस्य किङ्करः।
एकादशीं निर्णिनाय वादिराजो यति स्फुटम्॥56॥

## हितोपदेशः॥57॥

ॐ॥ स्मर कृष्णं भज हरिं नम विष्णुं श्रियाच्युतम्।
त्यज कामं जहि क्रोधं जहि मोहं भवालयम्॥1॥

श्रुणु शौरिकथाः पुण्याः पश्य श्रीपतिविग्रहम्।
जिघ्र श्रीपादतुलसीः स्पृश वैकुण्ठवल्लभम्॥2॥

भुङ्क्ष्व केशवनैवेद्यं तिष्ठ माधवनमन्दिरे।

जप नारायणमनुं पठ तन्नाम मङ्गलम्॥3॥

पाहि प्रपन्नजनतां ब्रूहि तथ्यं हितं नृणाम्।

देहि काङ्क्षितमर्थिभ्यो याहि सज्जनसङ्गतिम्॥4॥

कुरु भूतदयां नित्यं चर धर्ममहर्निशम्।

जानीहि नित्यमात्मानमवेह्यन्यद्धि नश्वरम्॥5॥

पञ्चश्लोकीमिमां शश्वत् पठ धारय चिन्तय।

एतावान् सर्ववेदार्थः समासेन निरूपितः॥6॥

नास्ति नारायणसमं न भूतं न भविष्यति

एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम्॥7॥

## कुरुस्तुति (लकारविभक्त्येकतास्तुतिः)॥58॥

ॐ॥ व्याकुर्वनिलसच्छास्त्रं स्वीकुर्वस्यैव सन्मतम्।

हीकुर्वन्यमताचार्यान् मा कुर्वच्युतविस्मृतिम्॥1॥

न त्वं कुरु गुरूनपूज्यान् नाहंकुरु कदाचन।

अलङ्कुरु च दुर्गोष्ठीं नालंकुरु हरेः कथाम्॥2॥

अलङ्कुरु ततो वाचं न हुङ्कुरु सभान्तरे।

अङ्गीकरु हरिं नित्यं नमस्कुरु च सत्कुरु॥3॥

नाङ्गीकुरु हरेः श्रेष्ठमङ्गीकुरु परान्सुरान्।

ऊरीकुरु सदा व्याख्यामुररीकुरु सज्जनान्॥4॥

| |
|---|
| दूरीकुरु च दुःशास्त्रं नारीकुरु हरेः कथाम्।<br>आविष्कुरु च सत्तत्वं तिरस्कुरु मतान्तरम्॥5॥ |
| पुरस्कुरु शुभश्रेणीमधः गुरु च दुष्कृतम्।<br>अन्तःकुरु हरेश्चिन्तां बहिष्कुरु कलेर्भटान्॥6॥ |
| पराकुरु परार्थाशां निराकुरु निराक्रियाम्।<br>स्थिरीकुरु मनः कृष्णे तरीकुरु च तत्पदम्॥7॥ |
| धिक्कुरु श्रुतिनिन्दादीन् न्यक्कुरूदरपूरणम्।<br>त्रिःकुरु स्नानसन्ध्यार्च्याः स्वःकुरु स्वकरे स्थितम्॥8॥ |
| उरः कुरु पुरं विष्णोः शिरः कुर्वस्य वन्दने।<br>गिरः कुरु स्तुतावेवं धुरः सर्वाः परिष्कुरु॥9॥ |
| संस्कुर्वित्थं भवज्जन्म कैङ्कर्यं कुरु मापतेः।<br>तं कुरु स्ववरं भक्त्याऽस्तंङ्कुरुग्रं भवार्णवम्॥10॥ |
| सदोपकुरु साधूनां नैवापकुरु कस्यचित्।<br>नार्थैर्विकुरु कुत्रापि कुरोः प्रतिकुरु प्रियैः॥11॥ |
| सीत्कुरु श्रीमदाचार्यबाष्यामृतरसं सदा।<br>फूत्कुर्वपरभाष्यार्थतूलानि च पदे पदे॥12॥ |
| श्रुतं मतं हृदि ध्यातं साक्षात्कुरु हरिं प्रभुम्।<br>प्रसन्नीकुरु मुक्तिश्च सिद्धाः कुरु चतुर्विधाः॥13॥ |
| मुक्तोऽप्यश्वास्यपुर्यस्य परिचर्यां मुदा करु।<br>बन्दीकुरु हरेर्भक्तिं मन्दीकुरु पुनर्भवम्॥14॥ |

हर्येकनिष्ठतासिद्ध्यै वादिराजो हरेः स्तुतौ।

लकारस्य विभक्तेश्च धातोरप्येकतां व्यधात्॥15॥

## हरिभक्ताष्टकम्॥59॥

श्रीमध्वशुद्धराद्धान्तभूमयो धृतनेमयः।

महान्तो हरिसन्तोषकराः क्लेशहरा मम॥1॥

रूक्षाघक्षालने दक्षा मोक्षदाधोक्षजेक्षणाः।

रक्ष्येलक्ष्याविपक्षाक्षहर्यक्षाः परपक्षकाः॥2॥

सुदयानिधयो मोक्षवाधयो विचिताऽऽधयः।

हरिसन्निधयो ज्ञानेषुधयोऽम्बुधयो गुणैः॥3॥

प्रभञ्जनाप्तचित्पुञ्जाक्ष्यञ्जना जनरञ्जनाः।

निरञ्जनाः कञ्जनाभव्यञ्जना भवभञ्जनाः॥4॥

नृत्यन्तः स्वान्तवृत्यन्तस्सन्तो हन्तोज्झिता हरिम्।

भजन्तोऽन्यत्यजन्तस्ते यतयो गतयो मम॥5॥

सदा शास्त्रविचारस्थान् सदाऽशास्त्रजये पटून्।

सदा शास्त्रविचारस्थान् सदा शास्त्रपयोत्स्यतः॥6॥

अलं पटादिविषयेरित्यलम्बटमानसान्।

अनलंकुर्वतः स्वाङ्गमनलं कुर्वतो द्विषाम्॥7॥

भ्रमतो भ्रमतो देशं नमतो नमतोदयम्।

गुरुन्विद्यागुरून्सर्वान् स्मरध्वं स्मरतो हरिम्॥8॥

हरिभक्ताष्टकं दृष्टादृष्टसर्वेष्टपुष्टिदम्।

यतिना वादिराजेन रचितं सर्वदा पठेत्॥9॥

## श्रीमध्भागवतानुक्रमणिका॥60॥

### प्रथमस्कन्धः

रमाया रमणं नत्वा तुरङ्गवदनं हरिम्।

अनुक्रमणिकाध्यायं व्याकरिष्ये यथामति॥1॥

मङ्गलाचरणं प्रोक्तं अधिकार्यादिवर्णनम्।

सूतशौनकसंवादः शूद्रजन्मप्रकीर्तनम्॥2॥

श्रीमद्भागवतस्यैव कथनं च प्रकीर्तितम्।

पाण्डवानां कथा प्रोक्ता सेनायुद्धं परस्परम्॥3॥

गादयुद्धेन भीमेन दुर्योधनवधस्तथा।

अश्वत्थाम्नस्तु पार्थेन युद्दं तेन पराजयः॥4॥

शिरोमणेस्समाधानं कृष्णेनैव तु मोचनम्।

पाण्डवागमनं भीष्मस्तुतिरत्रैव कीर्तिता॥5॥

देहत्यागस्तु भीष्मस्य धर्मराजस्य पालनम्।

कृष्णस्य संस्तुतिः कुन्त्या कृता भक्त्याऽत्र कीर्तिता(विस्तरात्)॥6॥

द्वारकागमनं पश्चात् उत्तरागर्भपालनम्।

देहत्यागस्तु सम्प्रोक्तो गान्धारीधृतराष्ट्रयोः॥7॥

प्रलापश्चैव पार्थानां यदुनाशस्ततः परम्।

स्वर्गप्राप्तिः पाण्डवानां राज्यप्राप्तिः परीक्षितः॥8॥

तदुत्पत्तिसमाख्यानं दिग्जये कलिनिग्रहः।
मृगयागमनं प्रोक्तं विप्रशापस्ततः परम्॥9॥

भागीरथ्यां प्रवेशश्च शुकस्यागमनं ततः।
विंशतिस्तत्र चाध्याया आद्ये स्कन्धे प्रकीर्तिताः॥10॥

## द्वितीयस्कन्धः

विराड्रूपस्य माहात्म्यं तथा ध्यानं प्रकीर्तितम्।
योगधारणयोत्क्रान्तिमतिरुक्ता मनीषिणा॥11॥

वासुदेवप्राप्तिरुक्ता विरक्तिश्चात्र कीर्तिता।
प्रोक्ता शुकस्तुतिर्भक्तेः तत्र प्राधान्यमेव च॥12॥

ब्रह्माण्डोत्पत्तिकथनं तथा ब्रह्मसमुद्भवः।
तपसस्तस्य माहात्म्यं वरदानं तथैव च॥13॥

अध्यात्मिकादिरूपाणां माहात्म्यं सम्प्रकीर्तितम्।
द्वितीयेऽस्मिन् दशाध्याया व्यासेनैव प्रकीर्तिताः॥14॥

## तृतीयस्कन्धः

धृतराष्ट्रस्यापराधदर्शनाद्विदुरस्य च।
तीर्थयात्रा तु सम्प्रोक्ता प्रभासगमनं तथा॥15॥

विदुरोद्धवसंवादः कृष्णस्य चरितं तथा।
द्वारि द्युनद्या मैत्रेयदर्शनं सम्प्रकीर्तितम्॥16॥

स्थूलसृष्टिस्सूक्ष्मसृष्टिः षड्विधा प्राकृता तथा।
स्वायम्भुवसमुत्पत्तिः वराहचरितं तथा॥17॥

| |
|---|
| वैकुण्ठवर्णनं प्रोक्तं शापस्तु द्वारपालयोः।<br>सम्प्रोक्तं युद्धवैचित्र्यं हिरण्याक्षवराहयोः॥18॥ |
| देवहूतीकर्दमयोः माहात्म्यं सम्प्रकीर्तितम्।<br>निर्माणं च विमानस्य क्रीडावैचित्र्यमद्भुतम्॥19॥ |
| कपिलावतारः सम्प्रोक्तो नवकन्यासमुद्भवः।<br>साङ्ख्योपदेशस्सम्प्रोक्तः समस्तव्यस्तचिन्तनम्॥20॥ |
| जीवसंसारकथनं तत्त्वानां कथनं तथा।<br>गमनं कपिलस्याश्च देवहूतीगतिः परा।<br>चतुस्त्रिंशतिरध्यायाः तृतीयेऽस्मिन् प्रकीर्तिताः॥21॥ |
| **चतुर्थस्कन्धः** |
| दौहित्राणां कर्दमस्य सन्ततेर्विस्तृतिः स्मृता।<br>तत्तात्रेयावतारस्तु रुद्रद्वेषः प्रजापतेः॥22॥ |
| दक्षस्य यज्ञकरणं देवानाञ्च समागमः।<br>सतीकलेवरत्यागो रुद्रकोपः प्रकीर्तितः॥23॥ |
| वीरभद्रसमुत्पत्तिर्यज्ञनाशस्ततः परम्।<br>ध्रुवोत्पत्तिस्तपश्चर्या वरदानं प्रकीर्तितम्॥24॥ |
| ध्रुवसाम्राज्यसम्प्राप्तिर्गुह्यकानां वधस्तथा।<br>वेनाऽपचारो हुंकारात् ऋषीणां वेननाशनम्॥25॥ |
| पृथोर्बाह्वोस्समुत्पत्तिः राज्ये तस्याभिषेचनम्।<br>गोदोहनं दिग्जयश्च ह्यश्वमेधसमापनम्॥26॥ |

| |
|---|
| दर्शनं सनकादीनां संवादोऽध्यात्मसम्भवः।<br>पृथोः स्वलोकगमनं प्राचीनस्य समुद्भवः॥27॥ |
| दशप्राचेतसोत्पत्तिस्तपश्चर्या प्रकीर्तिता।<br>हंसमन्त्रोपदेशश्च पथि रुद्रेण कीर्तितः॥28॥ |
| प्राचीनबर्हिषस्तत्र पुरञ्जनकथाऽपि तु।<br>जीवसंसारसंज्ञप्त्यै नारदेन प्रकीर्तिता॥29॥ |
| प्रचेतसां तपश्चर्या वरदानं च कीर्तितम्।<br>एकत्रिंशत्तथाऽध्यायाः  चतुर्थस्कन्ध ईरिताः॥30॥ |
| **पञ्चमस्कन्धः** |
| प्रियव्रतकथा प्रोक्ता ब्रह्माज्ञापरिपालनम्।<br>गृहस्थाश्रमसम्प्राप्तिः नवपुत्रसमुद्भवः॥31॥ |
| ऋषभाऽवतारचरितं भरतस्य समुद्भवः।<br>ऋषभेणोपदेशश्च तथाऽजगरवर्णनम्॥32॥ |
| एणीजन्मप्रसादश्च कीर्तितो भरतस्य हि।<br>अवधूतब्राह्मणत्वसम्प्राप्तिः कथिताऽत्र हि॥33॥श |
| कलेरभयसम्प्राप्तिः तत्रान्दोलिकवाहने।<br>तथा रहूगणेनैव संवादः सम्प्रकीर्तितः॥34॥ |
| भवाटवीवर्णनञ्च तद्दशास्थानवर्णनम्।<br>सिन्धुद्वीपनदीनाञ्च परिमाणं प्रकीर्तितम्॥35॥ |

खण्डानां परिमाणञ्च तत्पतीनाञ्च वर्णनम्।

तत्र संस्थितमूर्तीनां लोकालोकाचलस्य हि॥36॥

सूर्यादिग्रहराशीनां गमनं सम्प्रकीर्तितम्।

शिंशुमारस्य माहात्म्यं नरकाणाञ्च संस्थितिः॥37॥

भूबिलानाञ्च सर्वेषां शेषस्य च महात्मनः।

यातना रौरवादीनां तत्तत्कर्मफलं तथा।

चतुर्विंशतिरध्यायाः पञ्चमेऽस्मिन् प्रकीर्तिताः॥38॥

## षष्ठस्कन्धः

नामस्मरणमाहात्म्यं षष्ठे स्कन्धे समीरितम्।

अतजामिलस्य चरितं यमदूतसमागमः॥39॥

दूतानां विष्णुयमयोः संवादः पापनाशनः।

दूतानान्तु यमेनैव नाममाहात्म्यवर्णनम्॥40॥

पौरोहित्याप्रभावाच्च देवेन्द्रस्य जयस्तथा।

नारायणात्मकं वर्म प्रोक्तं शत्रुविमर्दनम्॥41॥

वृत्रासुरसमुत्पत्तिः वृत्रयुद्धमतः परम्।

पराजयश्च देवानां देवचिन्ता प्रकीर्तिता॥42॥

विष्णुनाऽस्य वधोपायो वज्रोत्पत्तिस्ततः परम्।

वृत्रनाशस्तु सम्प्रोक्तो देवानां विजयस्तथा॥43॥

चित्रकेतुसमाख्यानं पुत्रशोकस्तथैव च।

मन्त्रोपदेशाद्राज्ञस्तु नारदस्य जले तदा॥44॥

विद्याधराधिपत्यञ्च रुद्रहास्यमतः परम्।

पार्वतीशापदानं च स्वलोकगमनं स्मृतम्॥ 45॥

व्रतं पुंसवनं प्रोक्तं मरुताञ्च समुद्भवः।

एकोनविंशतिरध्यायाः षष्ठेऽस्मिन् सम्प्रकीर्तिताः॥ 46॥

## सप्तमस्कन्धः

धर्मनारदसंवादो भक्तेः प्राधान्यकीर्तनम्।

हिरण्यकशिपोर्द्वेषः प्रह्लादे कीर्तिता क्रमात्॥ 47॥

मातुस्तत्त्वोपदेशश्च तपश्चर्या प्रकीर्तिता।

हिरण्यकशिपोर्ब्रह्मवरदानं तथैव च॥ 48॥

सर्वदिग्विजयः प्रोक्तो देवचिन्ता प्रकीर्तिता।

शण्डामर्कोपदेशश्च स्वविद्याप्रतिपादनम्॥ 49॥

दैत्यपुत्रोपदेशश्च प्रह्लादेनैव कीर्तितः।

हिरण्यकशिपोः कोपात् सभास्तम्भविभेदनम्॥ 50॥

पञ्चास्यस्यावतारस्तु तेन युद्धमतः परम्।

भेदनं हृदयस्योक्तं देवस्तुतिरतः परम्॥ 51॥

ब्रह्मादस्याभयः प्रोक्तो वरदानं तथैव च।

त्रिपुरासुरसंहारकथा तत्रैव कीर्तिता॥ 52॥

वर्णनामाश्रमाणाञ्च धर्मः स्त्रीणां पृथक् पृथक्।

तथा सङ्करजातीनां आपद्धर्मस्तथैव च।

स्कन्धेऽस्मिन् षोडशाध्यायाः सप्तमे सम्प्रकीर्तिताः॥ 53॥

| अष्टमस्कन्धः |
|---|
| स्वायम्भुवस्य महात्म्यं तथा यज्ञस्य वै हरेः।<br>गजेन्द्रनक्रग्रहणं हरिणा मोचनं तथा॥54॥ |
| अजितावतारमाहात्म्यं देवचिन्ता ततः परम्।<br>दैत्यानां च जयोपायो देवानां हरिणा स्मृतः॥55॥ |
| मन्दरानयनं प्रोक्तं मथनं क्षीरसागरे।<br>कूर्मावातारमाहात्म्यं विषोत्पत्तिः प्रकीर्तिता॥56॥ |
| उच्चैः श्रवाश्वाश्वगजयोः पारिजातस्य सम्भवः।<br>रमावतारः कथितो रमासौन्दर्यवर्णनम्॥57॥ |
| वरस्यान्वेषणं प्रोक्तं विवाहोऽप्यजितस्य हि।<br>वारुण्याश्च समुत्पत्तिरमृतस्य च सम्भवः॥58॥ |
| धन्वन्तरिसमुत्पत्तिरमृताहरणं तथा।<br>मोहिनीवर्णनं दैत्यवञ्चनाकरणं तथा॥59॥ |
| अमृतप्राशने राहोः शिरसश्छेदनं तथा।<br>पुनः पुरुषरूपत्वस्वीकारो यमनं तदा॥60॥ |
| दैत्यदानवयुद्धञ्च ततो दैत्यपराजयः।<br>रुद्रस्य मोहनं प्रोक्तं ततो बलिसमुन्नतिः॥61॥ |
| वामनावतारमाहात्म्यं विराड्रूपस्य वर्णनम्।<br>स्वर्गापहारः सम्प्रोक्तो बिलवासो बलेः स्मृतः॥62॥ |

| |
|---|
| मत्स्यावतारमाहात्म्यं तथा सत्यव्रतस्य च।<br>स्कन्धेऽस्मिन्नष्टमेऽध्यायाः त्रयोविंशतिरीरिताः॥63॥ |
| **नवमस्कन्धः** |
| वैवस्वतमनोर्यज्ञे कन्याया जननं स्मृतम्।<br>पुनर्वैवस्वतमनोः पुत्राणाञ्च समुद्भवः॥64॥ |
| तेषां माहात्म्यकथनं नाभागचरितं तथा।<br>अम्बरीषसमाख्यानं दुर्वासः प्रपलायनम्॥65॥ |
| चक्रतापात्मनश्शान्तिः वरदानञ्च भूपतेः।<br>यवनाश्वसमाख्यानं मान्धातुस्सौभरेस्तथा॥66॥ |
| त्रिशङ्कुराजचरितं हरिश्चन्द्रस्य कीर्तनम्।<br>सगरस्य च माहात्म्यं सागराणां प्रकीर्तनम्॥67॥ |
| भगीरथदिवोदासखट्वाङ्गरघुभूभृताम्।<br>रामावतारमाहात्म्यं सीतापहरणं तथा॥68॥ |
| सेतुबन्धस्सिन्धुमध्ये रावणस्य वधस्तथा।<br>रामाभिषेकमाहात्म्यं तद्वंशस्यानुवर्णनम्॥69॥ |
| चंद्रवंशसमाख्यानं पुरूरवशसङ्क्रमात्।<br>नहुषस्य ययातेश्चे पुरोस्संवरणस्य च॥70॥ |
| कुरुप्रतीपयोश्चैव शन्तनोस्तस्य पुत्रयोः।<br>पाण्डवानां कुरूणाञ्च समुत्पत्तिः प्रकीर्तिता॥71॥ |

यादवानां समुत्पत्तिर्वसुदेवस्य कीर्तिता।
प्रादुर्भावस्तु कृष्णस्य तत्तन्माहात्म्यवर्णनम्।
एकविंशतिरध्यायाः नवमेऽस्मिन् प्रकीर्तिताः॥72॥

## दशम स्कन्धः (पूर्वार्धः)

भूभारस्यापनोदार्थं ब्रह्मादिप्रार्थनं तथा।
कृष्णावतारो देवक्यां वसुदेवस्तुतिः परा॥73॥

कृष्णस्तुतिस्तु देवक्याः शङ्खचक्रादिधारणम्।
पुनर्द्विभुजसम्प्राप्तिर्गोकुलागमनं तथा॥74॥

पूतनाया वधः प्रोक्तः शकटासुरपातनम्।
तृणावर्तस्य हननं बालक्रीडा च गोकुले॥75॥

गर्गेण नामकरणं दधिभाण्डस्य भञ्जनम्।
नवनीतादिहरणं बन्धनं चाप्युलूखले॥76॥

यमलार्जुनयोर्भङ्गो वत्सानां परिपालनम्।
वत्सासुरस्य हननं बकस्य हननं तथा॥77॥

कालीयमर्दनं रात्रौ दावाग्नेः पानमीशितुः।
यज्ञपत्नीसमानीतभोजनं पृथगीरितम्॥78॥

देवेन्द्रयज्ञहननं गोवर्धनसमुद्धृतिः।
कामधेन्वभिषेकश्च ऋतुवर्णनमेव तु॥79॥

वस्त्रापहारो गोपीनां रासक्रीडा च गोकुले।
वनगीता गोपिगीता वेणुगीता ततः परम्॥80॥

| |
|---|
| जलक्रीडा वनक्रीडा सङ्खचूडवधस्तथा।<br>वृषासुरवधः प्रोक्तः संहारो व्योमकेशिनौ॥81॥ |
| अक्रूरागमनं प्रोक्तं गोपीनां शोकसम्भवः।<br>मथुरागमनं प्रोक्तं विश्वरूपस्य दर्शनम्॥82॥ |
| अक्रूरसंस्तुतिः पश्चात् मथुरायां प्रवेशनम्।<br>मथुराङ्गनानां सम्मर्दो रजकस्य वधस्तथा॥83॥ |
| पुष्पमालाधारणञ्च वरदानं तथैव च।<br>त्रिवक्राया ह्यवक्रत्वं धनुर्भङ्गस्तथैव च॥84॥ |
| गजस्य हननं प्रोक्तं रङ्गस्थाने प्रवेशनम्।<br>चाणूरमुष्टिकापातः पातनं मातुलस्य च॥85॥ |
| स्त्रीप्रलापसमाधानं पितृमातृप्रमोचनम्।<br>उग्रसेनाधिपत्यञ्च तथा गुरुकुले स्थितिः॥86॥ |
| गुरुपुत्रसमुद्धारः प्रेषणं चोद्धवस्य तु।<br>गोपस्त्रीणां समाधानं पुनरागमनं तथा॥87॥ |
| सैरन्ध्रिकासमाधानं अक्रूरप्रेषणं तथा।<br>चत्वारिंशत् तथाष्टौ च पूर्वार्धे सम्प्रकीर्तिताः॥88॥ |
| **दशमस्कन्धः (उत्तरार्धः)** |
| अस्तिप्रास्त्युक्तवाक्येन प्रतिज्ञा मागधस्य च।<br>जरासन्धसमानीतसैन्यस्य बहुशो वधः॥89॥ |

| |
|---|
| गोमन्तारोहणं प्रोक्तं श्रृगालस्य वधः स्मृतः।<br>वैनतेयस्तुतिः प्रोक्ता किरीटागमनं तदा॥90॥ |
| गोमन्तदाहनं प्रोक्तं मथुरागमनं स्मृतम्।<br>द्वारवत्याश्च करणं स्थापनं स्वजनस्य च॥91॥ |
| गुहाप्रवेशः कृष्णस्य यवनस्य वधस्तथा।<br>मुचुकुन्दस्तुतिः प्रोक्ता द्वारकागमनं स्मृतम्॥92॥ |
| रुक्मिणीहरणं रुक्मि मानभङ्गः प्रकीर्तितः।<br>जाम्बवत्या विवाहश्च सत्राजित्यास्तथैव च॥93॥ |
| भद्रानीलामित्रविन्दालक्षणानां समस्तशः।<br>नरकस्य च संहारः कन्यानां दर्शनम स्मृतम्॥94॥ |
| स्वर्गस्य दर्शनं प्रोक्तं देवानां च पराजयः।<br>पारिजातस्य हरणं द्वारकागमनं स्मृतम्॥95॥ |
| षोडशस्त्रीविवाहश्च प्रद्युम्नजननं तथा।<br>पौण्ड्रकस्य वधः प्रोक्तः काशिसंदीपनं तथा॥96॥ |
| रुक्मिणीकृष्णयोः प्रेमकलहः सम्प्रकीर्तितः।<br>नारदागमनं प्रोक्तं विश्वरूपप्रदर्शनम्॥97॥ |
| राजसूयसमारम्भो जरासन्धवधस्तदा।<br>राजसूयसमाप्तिश्च ध्यूतोपक्रमणं तथा॥98॥ |
| वनवासः पाण्डवानां साल्वयुद्धमतः परम्।<br>प्रोक्तं रामस्य महात्म्यं विविदस्य वधस्तथा॥99॥ |

| |
|---|
| यमुनाकर्षणं प्रोक्तं कुरुपुर्याः प्रकर्षणम्।<br>तथा साम्बविवाहश्च श्रुतदेवप्रसन्नता॥100॥ |
| बकासुरवधश्चैव श्रुतिगीता ततः परम्।<br>विशिष्टकौरववधो धर्मसाम्राज्यवर्णनम्॥101॥ |
| सुदामद्विजमाहात्म्यं अश्वमेधसमुन्नतिः।<br>ब्राह्मणस्य च पुत्राणां आधानं च स्वधामतः॥102॥ |
| प्रोक्तश्चावभृथस्नानं दन्तवक्रवधः स्मृतः।<br>षोडशस्त्रीविहारश्च पुत्रपौत्रसमुन्नतिः।<br>त्र्यधिकं शतमध्याया दशमेऽस्मिन् प्रकीर्तिताः॥103॥ |
| **एकादशःस्कन्धः** |
| शौरिनारदसंवादो विदेहेन च योगिनाम्।<br>साम्बापराधाच्छापस्तु यदूनां सम्प्रकीर्तितम्॥104॥ |
| प्रोक्ता स्तुतिस्तु देवानां कृष्णवाक्यमतः परम्।<br>कृष्णौपगविसंवादो मनसः कारणत्वतः॥105॥ |
| अवधूतकथा चात्र बहुगुर्वी प्रकीर्तिता।<br>हरेर्ध्यानप्रकारश्च तारतम्यं तथैव च॥106॥ |
| वर्णानामाश्रमाणां च धर्माः प्रोक्ताः पृथक् पृथक्।<br>आवन्तिकस्यचरितं क्रियायोगसमुन्नतिः॥107॥ |
| त्रिगणानां फलप्राप्तिः शुद्ध्याशुद्धी प्रकीर्तिते।<br>कृष्णाज्ञया चोद्धवस्य बदरीगमनं स्मृतम्॥108॥ |

| |
|---|
| उत्पातानां दर्शनं च प्रभासगमनं तथा।<br>मैरेयपानादन्योन्यं यदूनां नाश ईरितः॥109॥ |
| देहत्यागस्तु रामस्य पिप्पलोपस्थसंस्थितिः।<br>ब्रह्मादीनामागमनं स्वलोकगमनं तथा॥110॥ |
| पार्थस्यागमनं प्रोक्तं शवानां दाहनं तथा।<br>पार्थानां मूलरूपैक्यप्राप्तिरुक्ता ततः परम्।<br>एकत्रिंशतिरध्यायाः स्कन्धेऽस्मिन् सम्प्रकीर्तिताः॥111॥ |
| **द्वादशस्कन्धः** |
| भविष्यद्राजचरितं युगसङ्ख्या समासतः।<br>आयुर्ह्रासो दुराचारो वर्णाश्रमविलोमतः॥112॥ |
| परिक्षिद्राजशुकयोः संवादस्य समापनम्।<br>तथा वेदविभागश्च वेदानां प्रचयस्तथा॥113॥ |
| याज्ञवल्क्यस्य माहात्म्यं रोमहर्षणसूतयोः।<br>मार्कण्डेयस्य चरितं वटपत्रस्य दर्शनम्॥114॥ |
| जगतो दर्शनं प्रोक्तं उदरे बालकस्य हि।<br>वरदानं तथा प्रोक्तं मार्कण्डेयस्य रुद्रतः॥115॥ |
| प्रत्येकमाससञ्चारः सूर्यस्य ससमूहतः।<br>पुराणकथनं प्रोक्तं ध्यानं विश्वात्मनो हरेः॥116॥ |

इति चोक्तं द्विजश्रेष्ठाः यत्पृष्टोऽहमिहास्मि वः।
लीलावतारकर्माणि कीर्तितानीह सर्वशः।
स्कन्धेऽस्मिन् द्वादशाध्यायाः कीर्तिताः इह सर्वशः॥117॥

## नवग्रहस्तोत्रम्॥61॥

ॐ॥ भास्वान्मे भासयेत्तत्वं चन्द्रश्चाह्लादकृद्भवेत्।
मङ्गलो मङ्गलं दद्याद्बुधश्च बुधतां दिशेत्॥1॥

गुरुर्मे गुरुतां दद्यात्कविश्च कवितां दिशेत्।
शनिश्च शं प्रापयतु केतुः केतुं जयेर्पयेत्॥2॥

राहुर्मे राहयेद्रोगं ग्रहाः सन्तु करग्रहाः।
नवं नवं ममैश्वर्यं दिशन्त्वेते नवग्रहाः॥3॥

शने दिनमणेः सूनो ह्यनेकगुणसन्मणे।
अरिष्टं हर मेऽभीष्टं कुरु मा कुरु सङ्कटम्॥4॥

हरेरनुग्रहार्थाय शत्रूणां निग्रहाय च।
वादिराजयतिप्रोक्तं ग्रहस्तोत्रं सदा पठेत्॥5॥

## पवनपञ्चरत्नमालिका॥62॥

ॐ॥ वीताखिलविषयेच्छं जातानन्दाश्रुपुलकामत्यच्छम्।
सीतापतिदूताद्यं वातात्मजमद्य भावये हृद्यम्॥1॥

तरुणारुणमुखकमलं करुणारसपूरपूरितसमुद्रम्।
सञ्जीवनमाशे मञ्जुलमहिमानमञ्जनाबाग्यम्॥2॥

शाम्बरवैरिशरातिगमम्बुजदललोचननोदारम्।

कम्बुगलमनिलवरिष्ठं बिम्बज्वलितोऽष्ठमेकमेव लम्बे॥3॥

वानरनिकराध्यक्षं दानवकुलकुमुदरविकरसदृक्षम्।

दीनजनावनदीक्षं पवनतपः पुञ्जपाकमद्राक्षम्॥4॥

दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः।

दारितदशमुखकीर्तिः पुरतो मम भाति हनूमतो मूर्तिः॥5॥

एतत्पवनसुतस्य स्तोत्रं यः पठति पञ्चरत्नाख्यम्।

सोऽसावखिलभयभ्यो मुक्तः श्रीरामभक्तिभाग्भवति॥5॥

## श्रीलक्ष्मीगद्यम्॥63॥

वाणीविरचितानीलवेणीमधुररोचिषा।

शोणीकृतलसन्नासामणिं पद्मालयां नुमः॥

ॐ॥ या विधिखगेशशतमुखमुखलेखकोटीरकोटिमणिकान्तिछटाविगुणित नखरुचिनिचया॥ अलया॥ सुरवधूधम्मिल्लोत्फुल्लमल्ली-परिभ्रमद्भ्रमरस्वरसान्द्रीभवन्मञ्जीरमञ्जुसिञ्जारञ्जितचरणा। करुणाभरणा॥ अनङ्गनिकषायितजङ्घा। निरस्त समस्तदूषण सङ्घा। ऊरूदरीकृतकरिराजकरा। कटितटलसितनवरत्नखचितकनककाञ्चीरुचिरा। अमलचैलावृतनितम्बा। भक्तजनदत्तावलम्बा नाभिगभीरालवालदूर्वाङ्कुरशङ्काकृद्रोमराजिविराजिता। मुनिजनपूजिता। कुम्भिकुम्भाकाराहङ्कारशुचशातकुम्भेषद्भ्रवलग्ना। आनन्दसिन्धौ निमग्ना। त्रिवलिवीचीनसौन्दर्यकूपारोदरा। करकङ्कणझणत्कारनिर्जितधनुष्टङ्कारा। अमरपरिवारा। प्राणनाथपरिरम्भसंरम्भनिरतभुजयुगळरता। हरिपादरता। पद्मरागमणिप्रणतशाणानखश्रोणी। कुशेशयकोशोल्लसहारिणी। विविधभूषणभूषिताङ्गुलीपल्लवा। समुद्रोद्भवा। अनाद्यानन्तहरिनिबद्धपरममङ्गळमणिमञ्जुसूत्रशोभितकम्बुसहोदरकन्धरा। विवेरसादसृक्

शोणीधराधरा। कुन्दवृन्दहृदायमानदन्तावळी। वदनाम्बुजविलसदलकावळी। मुखमुरुवृन्तायमानचुबुका। लपनलावण्यदुग्धाम्बुधिबुद्बुदीभूतनासामौक्तिका। कर्णान्तायतनयनासमाक्षिप्तनीलोत्पला। शम्बराराातिशरासनोपास्यमानभ्रूलतायुगळा। सिन्धूरविशेषविशेषितफाललीलाधिकृतार्द्रशशाङ्का। निरातन्का। गण्डतळे प्रतिफलितताटङ्का। वाणीन्द्राणीलग्नस्निग्धक च चयविलसच्छिखण्डिगणवदनेन दासीकृतहिमकिरणा। मर्त्यामर्त्याचिन्त्यवेदोदितामितानन्तगुणा। ब्रह्मणाकोटिगुणाधिका। ज्ञाने त्वनन्तगुणाधिका। हरेरन्तगुणावम। निरुपमा। ईशादन्यत्र सर्वात्रानालोचनेऽपि करतलामलकदशेष विशेषवद्विश्वं जानती। तथाऽपि क्षणानन्तांशे अपि हरेर्गुणगणानीक्षितुं दक्षाऽपि न तेषामन्तं पश्यती। किं(च) क्षणे क्षणे नवनवविशेषोपलम्भेन तत्तत्कौतूहलपारावारे अपारे गाहमाना।तानेव विशेषात् पुनः पुनर्ध्यायमाना। पुनर्विशेषदर्शनवती। पुनराश्चर्यवती। ईशगुणांशमपि न कलयती। अपि च कटाक्षलेशेन विधिमुखानां लोकानां सृष्ट्यादिकर्त्री तत्तेलप्रदात्री। विरिञ्चितृणीकरणतृणविरिञ्चीकरणे शक्ता। हरिणा भुक्तगुणसारभोगसक्ता। नित्यमुक्ता। वायूदपद्मादिरूपेण नानाप्रकारेण हरिं पूजयन्ती। हरिपूजात्मिकाशेषक्रियां कुर्वती। भक्ताज्ञान तमोहरन्ती। मन्दस्मितेन चन्द्रिकां जयन्ती। अनन्तैर्वेदैः हरिं स्तुवन्ती। स्तोत्रेण तुष्टा संहृष्टा हरिरितिपात्री जगज्जनयित्री। बाह्यान्तरसर्वसम्पत्प्रदात्री। श्रीहरिप्रियतमा। रमाऽस्मान् पातु पातु॥ यस्स्तौत्यनेन गद्येन हृद्येन हरिवल्लभाम्। इन्दिरा वसते तस्य मन्दिरे वदने च वाक्।

## हयग्रीवदण्डकम्॥64॥

ॐ॥ जयजय तुरङ्गास्यनस्तो- मुखान्निर्गतानन्त-वेदादि-विद्याप्रबोधीकृताम्भोजसम्भूतहेषारवोन्निर्जिताशेष-दैतेय लक्ष्म्या अमृतेनानिशं सिच्यमानाङ्गराकेन्दुकोटिप्रतीकाशदेहप्रभाभासिताब्जातगर्भाण्डबाह्यान्तरानम्रधात्रीररुद्रेन्द्रमुख्याम रव्रात-कोटीरमाणिक्यकान्तिच्छटाराजिताङ्घ्रेशरच्छन्द्रहृन्मन्दिरध्वान्तराशेः प्रपन्नामरानोकस्त्वंपुरादेव नारायणाख्येन रूपेण लोकं स्वगर्भे निधाय श्रियो बाहुयुग्मान्तरेसंस्थितस्सन् सिसृक्षुस्त्वमादौ विधातारमासृज्य तत्सत्रयागे हयग्रीवरूपं समास्थाय

दैत्याधमं लोकशत्रुं मधुं कैटभाख्यं च चक्रेण हत्वा पुनर्ल्लोकसंरक्षणार्थं झषाध्यावतारैः महादैत्यसङ्घांश्च निर्मथ्य लोकान् सदा पाहि भो देव यस्त्वां मनुष्योत्तमो दुग्धपाथोधिमध्यस्थ सुश्वेत-नामो-ल्लसद्वीपमध्ये सुसन्तानवृक्षावलीवेष्टिते सन्मणिस्तम्भयुक्ते महा-मण्टपे तत्र पङ्केरुहे कर्णिकायां सुधासूतिबिम्बे महायोगपीठे निषण्णं नमद्देवतामौलिमन्दारमालास्रवन्माकरन्दद्रवक्षालितेनांकुशच्छत्रपाटीनवज्राम्बुजातोर्ध्वरेखाङ्कितेनांघ्रियुग्मेन संराजितं श्वेतकूर्माभगुल्फं लसज्जानुयुग्मं दिशादन्तिशुण्डोपमोरुद्वयं दुग्धसिन्ध्वन्तरीयोपमेनाच्छकौशेयवस्त्राभिरामेण भास्वन्नितम्बेन युक्तं वियद्वाहिनीवर्तुलावर्तगम्भीरनाभीसरस्तीरसञ्जात-रोमावलीमण्डितेनोदरेणाञ्चितं श्रीनिवासायतोरुस्थलं शेषभोगाभहस्तैश्चतुर्भिस्सदा शङ्खमुक्ताक्षमालालसत्पुस्तकोद्बोध-युक्तारविन्दानि सम्यग् दधानं रणद्भृङ्गसंसक्तसम्फुल्लमन्दारमालावलीलग्नसत्कण्ठशोभाभिरामं शशाङ्कांशुसङ्काश सत्केसरव्रातकेशावलीमण्डितं दन्तकान्तिच्छटाभासिताशावकाशं दलत्पद्म पत्रायताक्षं स्फुरद्दक्षिणावर्त शङ्खप्रतीकाशकर्णं लसन्मस्तकं दिव्यमुक्तामयोदार-कोटीरकेयूरहारावलीमेखलाद्यखिलैर्भूषणैर्भूषितं चन्दना-चर्चिताशेषगात्रं सदामूर्तिमद्वेदशास्त्रेतिहासादिविद्यावलीसेवितं श्रीसतीचञ्चलापाङ्गनीराजितं ब्रह्मरुद्रेन्द्रादिवन्द्यं सन्मनः पङ्कजे चिन्तयन् देव ब्राह्मे हरिद्रोमयालिप्तकेरङ्गवल्लीसुशोभाञ्चिते स्तण्डिले श्वेतकौशेयवस्त्रावृते मालतीमल्लिकादि-प्रसूनावलीमण्डिते चक्रपद्मादिसन्मण्डलोपेतपीठे यथा याज्ञिका बाह्यवह्नौ निजान्तस्थमग्निं समाकृष्य मन्त्राक्षतैः स्थापयित्वा आवर्जयन्ति स्म तद्वद्बहिर्योगमार्गेण हृत्पद्ममध्यस्थमीशं स्वबिम्बे प्रतिष्ठाप्य नित्यं त्वदष्टाक्षरेणोक्तमार्गेण सम्पूजयन् वर्तते देव यद्वा सुवर्णादिसल्लोहपत्रेषु वा भूर्जपत्रेषु वा पट्टवस्त्रेषु वा वह्नि-पूर्वाणदिग्राजदन्तारकेषु क्रमादेकवर्णं त्वदीयं लिखित्वाऽथ पञ्चाक्षरं गारुडं चाष्टवर्णं स्वरानुष्टुभं सम्यगालिख्य तद्व-द्बहिर्योगमार्गे अशरीरा(ऽनङ्गा)क्षरैः कादिक्षान्तैः क्रमाद्वेष्टयित्वा ततो व्योमयुग्मं धरामण्डले दिक्पतीनां च बीजानि संलिख्य त्वद्बिम्ब-वद्गन्धपुष्पोपहारादिभिर्भक्तिभावेन सम्पूज्य सन्मन्त्रसिद्धो भवेत्तस्य वक्त्रे स्थिरा शारदा तस्य गेहे ध्रुवा श्रीः स्वयं तस्य दासा नृपालादयः तस्य भक्तिर्भवेच्छाश्वती तस्य विद्याः

स्फुरन्त्यश्रुतप्रज्ञया तस्य पुत्रादिवृद्धिर्भवेत्तस्य वाञ्छा लभन्तेऽखिला देव यद्वा मनोर्जङ्घपूको भ्रुवो-रन्तरे त्वां समस्तागमानुद्गिरन्तं समाचिन्त्य तत्रैव दीर्घान्वितं बिन्दु-युक्तं चतुर्योष्मरूपं मनुं स्वान्वितं सम्यगुच्चार्य सायं मुखे मुक्तनामासने सन्निवेश्यानिलं वेळया पूरयन् केवले कुम्भके संस्थितस्सन् तदूर्ध्वीकृते स्वस्य जिह्वाग्रभागेन रन्ध्रं निरुध्योद्गतं सोमनीतं पिबेत्प्रत्यहं तस्य गीर्वाणवाणी वशा तस्य पातञ्जलं स्याज्जलं तस्य भाट्टं घरट्टोद्धपिष्टोपमं तस्य तर्कस्तु पाणिस्थ-कर्कन्धुका तस्य वैय्यासिकी गीर्मरुन्मेचकी सैष वादेषु पञ्चाननो देव यो वा धृतं ब्राह्मिकापाचितं तथा कङ्गुणीबीजजालानि वाचाऽभिमन्त्र्य त्वदीयेन मन्त्रेण नित्यं पिबेत्खादयेत्तस्य वक्त्रे कवित्वं सुधासम्मितं सम्भवेत्तस्य बुद्धिर्बहुग्रन्थसन्धारिणीस्यात्प्रभो देव यत्ते पदाम्भोजशौचोदकं शूलपाणेः शिरोभूषणं यस्य नाभ्युद्भवो लोकनिर्माणकृत् पद्मभूः यस्य पौत्रो हरः सर्वसंहारकृत् यस्य निवासरूपाः समस्तागमाः यस्य पत्नीकटाक्षस्य लेशो विधीशेन्द्र-मुख्यामरस्थानदो यस्य तल्पं सशैलाटवीसिन्धुविश्वम्भराधारकः शेष-भोगीश्वरो यस्य वाहोत्तमः सर्ववेदाभिमानी खगाधीश्वरो यस्य वक्त्राग्निमध्ये सुरारातिसङ्घाः पतङ्गा बभूवुः स्वयं यस्य दिव्याङ्घ्र्यो-भक्तिभाजां नृणां तीर्थकोट्युत्थपुण्याधिको यस्य विज्ञानभक्त्याख्य-सद्द्रव्यसम्पादकानां भवेदक्षयानन्दभोगः प्रभो देव तं त्वामहं सच्चिदानन्दमूर्तिं जगज्जन्मसंरक्षणाज्ञानसंहारबन्धादिहेतुं निरस्ताधिकं निस्समं सद्गुणाम्भोनिधिं नित्यमुक्तं निजानन्दतृप्तं विभुं निर्गताशेषदोषं निरीशं स्वरोमावलीकूपसंस्थानगर्भाण्डकोटि-व्रजं मुक्तवागीशपक्षीशदेवेशकन्दर्पसूर्यादिमुख्यामरैः सेवितं श्रीकराम्भोजरत्नोर्मिकादीधितिस्तोमशोणीकृताङ्घ्रिद्वयं भक्त-लोकार्जितानेकजन्माद्यशुष्काटवीपावकंसर्वदेवैकवन्द्यं लसद्भक्ति-गम्यं महायोगिहृन्मन्दिरं सन्ततानन्तभोगासनं देवदेवं प्रणम्य प्रभो याचये।

साधुनिन्दात्मशंसाश्रुतग्रन्थदुश्शास्त्रवेत्तृत्वदुष्टात्मसेवाद्यनन्तापराधालयं नित्यकर्माद्यनुष्ठानदूरं दुराचारिणं ज्ञानहीनं सदा क्रोधलोभाद्यमित्रान्वितं स्वोत्तमाचार्यसेवानभिज्ञं कृतघ्नं नृशंसं महाघौघसिन्धौ निमग्नं कृपाम्भोनिधे पाहि निश्शृङ्खलां ते पादाम्भोजभक्तिं प्रभो देहि सुज्ञानवन्तं कुरुष्वाशु मां यत्ते मनोज्ञं लसत्पुण्डरीकायताक्षं प्रसन्नाननं चारुमन्दस्मितं शोभमानं शशाङ्कप्रभं दिव्यसद्गन्धभूषाम्बरालङ्कृतं श्रीसखं सच्चिदानन्दमूर्तिं सदा मन्मनः पङ्कजान्ते स्थिरं

स्थापयानन्तशक्ते जय वाजिवक्त्र प्रभो जय सिन्धुकन्यापते जय देवचूडामणे जयानन्तशक्ते जयानन्दसिन्धो जयगाधबोध प्रभो श्रीरमानाथ लोकैकनाथा-प्रमेयाच्युतान्त गोविन्द तुभ्यं नमस्ते नमस्ते नमस्ते नमः पाहि मां पाहि॥

## गङ्गास्तोत्रम्॥65॥

त्वं दीनेषु दयवातीति विदितं यद्ब्रह्महस्ताश्रयम्
प्राप्ताऽथाच्युतपादसङ्गमहिता पश्चाच्छनाकं श्रिता।
सौवर्णाचलश्रृङ्गमेत्य मुदिता शम्भोः शिरः सङ्गताऽऽ
प्यास्माकक्षितिमण्डले त्रिपथगे तुष्टास्यभीष्टप्रदा॥1॥

आदौ पादतलोर्ध्वभागमहसा या रक्तनीला हरेः
ऑस्वर्गस्त्रीकुचकुङ्कुमाङ्कनयनोपान्तश्रियाऽभ्यन्तरे।
अन्ते शम्भुकपर्दपन्नगगतश्रेणीज्वलज्ज्योतिषा
जन्मारभ्य सरस्वतीनतनयासङ्गेव गङ्गाऽस्ति सा॥2॥

अज्ञानाद्यदि सज्जनेषु रचितद्रोहान्मयि स्वर्धुनि
स्वस्फूर्त्या सुजनेषु दूषणगणारोपादवज्ञा तव।
तर्हि त्वां सगरात्मजास्थिनिकरा जानन्ति किं तैः प्रभोः
द्रोहः किं न कृतं किमम्ब न हरावारोपिता चोरता॥3॥

आरभ्याब्जजलोकमाक्षितितलादायातया किं त्वया
मच्चित्तं बहुदूरमित्यबलया त्यक्तं भिया जाह्नवी।
अक्षय्याचलतुङ्गश्रृङ्गनिकरान्निर्बिद्य यान्ती मम
स्वल्पं किं बहुमन्यसे शुभकुलं गङ्गेऽन्तरङ्गे चलम्॥4॥

अस्थिस्पर्शनमात्रतः किल तव श्रेयः प्रदत्वं गतं
विस्तीर्णान किमच्युतस्य नगरी मन्मात्रदेशोज्झिता।
तद्वत्वोऽपि सकण्टकं किमु सतां सन्तानजोऽहं न किं
कस्मादम्ब न मे प्रदास्यसि पदं गङ्गेऽखिलार्थप्रदम्॥5॥

हे गङ्गे तव कोमलाङ्घ्रिनलिनं रम्भोरुनीवीलसत्
काञ्चीधामतनूदरं घनकुचव्याकीर्णहारं वपुः।
सन्मुद्राङ्गदकङ्कणादृतकरं स्मेरं स्फुरत्कुण्डलं
सारङ्गाङ्गि जलान्यदिन्दुरुचि ये जानन्ति तेऽन्ये जलात्॥6॥

श्रीनारायणरामगोपतिहृषीकेशादिरूपोऽक्षम-
स्त्वां हातुं हरिसूकराकृतिरथ श्रीदेवहूत्यात्मजः।
वेणीमाधव बिन्दुमाधवतनुस्तीरे व्यधत्त स्थितिं
गङ्गे किं बहनाऽदुनाऽपि वसति त्वद्भर्तृगेहेऽप्यसौ॥7॥

गङ्गे त्वं शुभसञ्चयस्य जयता दोषात्मनां न त्विति
जातं यत् क्रतुकोटिलभ्यसुकृतस्याभ्युन्नतिं यच्छसि।
दुष्कर्माण्यमितानि दूरयसि यत् त्वद्गेयतोयेक्षया
पानेनाप्यवगाहनेन मनसा ध्यानेन गानेन वा॥8॥

## श्री कृष्णस्तोत्रम्॥66॥

श्री ब्रह्मरुद्रगरुडेद्रनतं शरण्यं सर्वाशुभप्रशमनं भुवनैकनाथम्।
सद्रूप्यपीठपुरमध्यगमिन्दिरेशं गोवर्धनोद्धरणदक्षमहं नतोऽस्मि॥1॥

| |
|---|
| वज्राङ्कुशध्वजसरोजयुताङ्घ्रिमूलं सन्दीप्यमाननखचन्द्रिककान्तिकान्तम्।<br>सिञ्जत्सुनूपुरपदं वरवृत्तजङ्घं पूर्णेन्दुभानुसमवर्तुलजानुयुग्मम्॥2॥ |
| स्तम्बेरमेन्द्रसुकरोरुमुदारकाञ्ची पीताम्बरोद्यतकटिं शुभनिम्ननाभिम्।<br>शातोदरार्पितवलित्रयमब्जनाभं श्रीवत्सकौस्तुभरमालयवक्षसं तम्॥3॥ |
| श्रीकम्बुकन्धरसमर्पितवैजयन्तीसद्धारकञ्जशुभमालिकयोल्लसन्तम्।<br>सद्दण्डपाशकरमूर्जितहारभूषं बिम्बाधरोष्ठमरविन्ददलायताक्षम्॥4॥ |
| कर्णोज्ज्वलन्मकरकुण्डलशोभिगण्डंसद्रत्नमौक्तिकलसच्छुभनासिकाढ्यम्।<br>शार्ङ्गायितभ्रुवमगण्यगुणाभिराममुद्यद्दिवाकरनिभाभविशालफालम्॥5॥ |
| श्रीमत्किरीटवरमण्डितरम्यशीर्षमाद्यन्तशून्यमसितं सुखतीर्थनाथम्।<br>श्रीनन्दनन्दनममेयमगाधभोधमीषत्स्मितेन्दुवदनं शरणं व्रजामि॥6॥ |
| किं संस्तवीमि तव मत्स्य सुकूर्मकोलश्रीमन्नृसिंह वरवामन भार्गवेश।<br>श्रीजानकीरमण यादवकृष्ण बुद्ध कल्क्यादिरूप कृतिसेवितसत्प्रभाव॥7॥ |
| श्रीकृष्णदेव करुणाकर सौम्यरूप श्रीवादिराजमुनिहृत्कमलाधिवास।<br>भक्तोत्सवेप्सितसुतत्वरहस्यदीप मां पाहि ते चरणसेवकभृत्यभृत्यम्॥8॥ |
| वादिवन्द्याख्ययतिना कृष्णस्तोत्रमिदं कृतम्।<br>हरेः कृपाप्तयेऽजस्रं पठतः प्रीयते हरिः॥9॥ |

## श्रीमद्वादिराजपूज्यचरणविरचित – ग्रन्थाद्यन्तश्लोकाः

### 1.महाभारतलक्षालङ्कार

व्यासायाप्रतिमेतिहासरचनोल्लासाय दुर्वादिनां

| |
|---|
| त्रासायासकराय सत्सु कृतविश्वासाय दोषद्विषे।<br>भासा यामुनरम्यतोयसदृशायासायमासेविने |
| दासायाभयदाय मध्वगुरुहृद्वासाय तुभ्यं नमः॥1॥ |
| अगाधव्यासबोधाब्धौ निगूढाः शब्दराशयः।<br>न विवेदयितुं शक्या मादृशैर्मन्दबुद्धिभिः॥2॥ |
| प्रक्रान्तार्थानुसारेण शिक्षाशून्यपदस्य च।<br>अर्थं कथञ्चिद्वक्ष्यामि तत्क्षन्तव्यं महात्मभिः॥3॥ |
| योऽक्षरत्यागयोगाभ्यां क्षत्रं शूद्राभिधं व्यधात्।<br>तस्य व्यासस्य वचसो वैदग्धीं वेत्ति कः कविः॥4॥ |
| नारायणस्य व्यासस्य मध्वस्य च कृपाबलात्।<br>भारतस्य श्लोकलक्षालङ्कारः क्रियते मया॥5॥ |

अन्त्य

| |
|---|
| व्यासस्य कृपया लक्षालङ्काराख्यः कृतो मया।<br>ग्रन्थोऽयं यः प्रभुः कीटमकरोत् पृथिवीपतिम्॥1॥ |
| भारतस्य सुधाम्भोधेः भारतीशादयः सुराः ।<br>यथावन्मथने शक्ताः कृतशिक्षा हरेर्मुखात्॥2॥ |
| अहं तु मानुषः कुर्यां महाकार्ये कथं मतिम्।<br>अत्रास्ति कारणं किञ्चिद्गुह्यं तत् श्रूयतां बुधैः॥3॥ |
| प्रयागे ब्रह्मणः सन्ध्यामठे जपपरायणः।<br>अहमासं तदा लक्षालङ्कारं कुर्विति प्रभुः॥4॥ |

| |
|---|
| भारतस्य श्लोकलक्षस्यार्थविस्तरणात्मकम्।<br>कारयामास योगीन्द्रो लक्षालङ्कारमीदृशम्॥5॥ |
| व्यास एव यतः कर्ता दासस्य हृदि मे स्थितः।<br>अतो न विस्मयः कार्यः किमकार्यः महाप्रभोः॥6॥ |
| सद्वाक्यरत्नमालेयं तद्व्यासस्य गलेऽर्पिता।<br>सदा स्यात् स्वाङ्गकान्त्येमां स एव प्रथयेत् प्रभुः॥7॥ |
| नमोऽस्तु वासुदेवाय व्यासदेवाय धीमते।<br>असुदेवाय देवेभ्यो गुरुभ्यश्च नमो नमः॥8॥ |
| श्रीदेव्यै भारतीदेव्यै गौरीदेव्यै नमो नमः।<br>नमः शच्यै त रत्यै च मातृभ्यश्च नमो नमः॥9॥ |

## 2.महाभारततात्पर्यनिर्णयभावप्रकाशिका।

### आदि

| |
|---|
| नमोऽस्तु गुणपूर्णाय दोषशून्याय विष्णवे।<br>समस्तजगतां मुख्यहेतवे धर्मसेतवे॥1॥ |
| हृदब्जसदनं वाजिवदनं सत्प्रमोदनम्।<br>नमाम्यनुदिनं बुद्धिशोधनं पापभेदनम्॥2॥ |
| प्रणम्य नृहरिं मध्वं गुरूंश्चान्यान्यथामति।<br>महाभारततात्पर्यनिर्णयार्थः प्रकाश्यते॥3॥ |
| वादी मध्वो यस्य राजा सोऽहं तस्य कृपाबलात्।<br>वादिराजो न स्वशक्त्या वीणेव रणयामि तत्॥4॥ |

अन्त्य

| |
|---|
| महाभारततात्पर्यनिर्णयार्थप्रकाशिका।<br>हरेः प्रसादाद्रचिता वादिराजाख्ययोगिना॥1॥ |
| माध्वग्रन्थस्याभिसन्धिं विदुर्देवा न मानवाः।<br>वायुस्तुतिरतिर्नित्यं वेदाहं च कथञ्चन॥2॥ |
| अनया सेवया श्रीशः प्रीयतां मे हयाननः।<br>हरिभक्ताग्रणीर्मध्वो गुरुश्च प्रीयतां मम॥3॥ |

## 3.श्रीमन्न्यायसुधागुर्वर्थदीपिका

आदि

| |
|---|
| नारायणं हयग्रीवं व्यासं वायुं सरस्वतीम्।<br>नत्वा तत्करुणसत्त्वाद्रमे न्यायसुधाम्बुधौ॥ |

अन्त्य

| |
|---|
| इयं न्यायसुधाम्भोधेस्तथा भाष्यानुभाष्ययोः।<br>अनुव्याख्यासङ्गृहीतन्यायानां विवृतिस्तथा॥1॥ |
| गुर्वर्थदीपिका वादिराजाख्ययतिना कृता।<br>आनन्दतीर्थाख्यगुरोस्तथा व्यासस्य तद्गुरोः॥2॥ |
| भारत्यास्तत्त्वदेवानां कृपया न स्वशक्तितः।<br>गुणा ये त्वत्र दृश्यन्ते ते सर्वे तत्प्रसादजाः॥3॥ |
| यदि सन्ति क्वचिद्दोषाः ते मे मन्दमतित्वतः।<br>तदवद्यं दयाशीलैः क्षन्तव्यं स्वजनप्रियैः॥4॥ |

नमोऽस्तु वासुदेवाय व्यासदेवाय धीमते।

असुदेवाय देवेभ्यो गुरुभ्यश्च नमो नमः॥5॥

## 4. तत्त्वप्रकाशिकागुर्वर्थदीपिका

### आदि

नत्वा नारायणं व्यासं हयास्यं मध्वमादरात्।

वाणीं गुरूंश्च सकलान् कुर्वे गुर्वर्थदीपिकाम्॥

### अन्त्य

नमामि लक्ष्मीरमणं नमामि हयकन्धरम्।

नमामि वेदव्यासं च नमामि सुखसन्मुनिम्॥1॥

सूत्रे भाष्ये च टीकायां सूत्रोक्तश्रौतवाचि च।

यथाशक्तिविमर्शेन प्रीयतां मे रमापतिः॥2॥

एवं गुरूणां सर्वेषां भावस्यैवं प्रकाशिका।

वादिराजाख्ययतिना कृता गुर्वर्थदीपिका॥3॥

## 5. तलवकारोपनिषद् भाष्यटिप्पणी

### आदि

दद्याद्दिव्यां हयग्रीवः पद्मा दद्याद् श्रियं मम।

विद्वान्मध्वो बुद्धिशुद्धिं दद्यादद्य महर्धिमान्॥1॥

प्रणम्य कमलाकान्तमनन्तं चिन्तितार्थदम्।

कुर्वे तलवकारोपनिषद्भाष्यस्य टिप्पणिम्॥2॥

**अन्त्य**

नियन्ता सर्वदेवानां निहन्ता सर्वरक्षसाम्।

स मन्ता कमलाकान्तः समन्तात्सुखदोऽस्तु मे॥3॥

## 6. तैत्तिरीयोपनिषद् भाष्यटिप्पणी (अपूर्णा)-

सुमतिभिरनुमेयं शुभ्रकायं सखायं

सुखमयमनपायं मुक्त्युपायं विमायम्।

नृहयमहममेयं ध्येयमाम्नायगेयं

सदयमसदजेयं श्रीसहायं भजेयम्॥

## 7. आथर्वणोपनिषद् भाष्यटिप्पणी

**आदि**

नमस्कृत्य हयग्रीवं समस्तसुरनायकम्।

आथर्वणोपनिषदः पोष्यं भाष्यं विवृण्महे॥

## 8.माण्डूकोपनिषद् भाष्यटिप्पणी

ताराभिधेयस्ताराभहारालङ्कारभासुरः।

सारात्सारो हयशिरास्तारयेद्दुस्तरादरात्॥1॥

कुर्वे सर्वेशमानम्य सर्वाभिमदभेदिनीम्।

माण्डूकोपनिषद्भाष्यटीकां शोकापहारिणीम्॥2॥

## 9. ईशावास्योपनिषद् भाष्यटिप्पणी

**आदि**

हयास्यं व्याकृष्णौ मां प्राणं वाणीं गुरूनपि।
प्रणम्य वादिराजाख्ययतिना तदनुग्रहात्॥

ईशावास्योपनिषदो भाष्यटीकाप्रकाशिका।
क्रियते ह्रियते दुर्वाग्गर्वान्धतमसं यया॥

**अन्त्य**

नियुङ्क्ते देहिनो योऽन्तः स्वयं भुङ्क्ते सुखानि च।
तदन्ते मुक्तिदस्तं ते भजन्ते चिन्तितार्थदम्॥1॥

ग्रन्थेनानेन भगवानिन्दिरारमणः प्रभुः।
नन्दितीर्थमुनेर्बन्धुः स दद्यात्सकलेप्सितम्॥2॥

## 10. षट्प्रश्नोपनिषद् भाष्यटीकाटिप्पणि

**आदि**

सर्पतल्पमनल्पेंद्रकल्पं नत्वा हयाननम्।
षट्प्रश्नोपनिषत् टीकाटिप्पणी क्रियते मया॥

**अन्त्य**

षट्प्रश्नोपनिषद्भाष्यटीकार्थकथनेन मे।
प्रीतो हयमुखः श्रीमान् कामादीन् हन्तु षड्रिपून्॥

# 11. युक्तिमल्लिका

## 1.गुणसौरभम्

आदि

भक्त्या स्तुत्त्या विरत्त्या भजदमलजनौन्नत्यभूत्यर्पकाय

क्षित्यामत्यल्पभृत्येष्वपि कुजनकृतौद्धत्यभूत्याजकाय।

कर्त्रे धर्त्रे च हर्त्रे हयमुखहरयेऽमुत्र पात्रे नमस्ते

तस्मै कस्मैचिदस्मान्मनसि धृतकथाविस्मृतौ स्मारकाय॥1॥

पारं भवाख्यजलधेर्भुवनैकसारं

स्वैरं कृतोरुविधवेदपथप्रचारम्।

आरञ्जितामरजनं सुखचिच्छरीरं

धीरं स्मरामि हृदि सत्यवतीकुमारम्॥2॥

यत्पूर्वं त्वमपूर्वसिन्धुमतरस्सद्वन्द्य मध्वाचला-

दुद्यातश्शतयोजनं परमदश्शंसन्ति सन्तः क्षितौ।

चित्रं जैत्र भवच्चरित्रमधुना यद्वेदवार्धिं तर-

न्नित्यं कोटिसहस्रयोजनमपि त्वं राजवद्राजसे॥3॥

व्यासाय भवनाशाय श्रीशाय गुणराशये।

हृद्याय शुद्धविद्याय मध्वाय च नमो नमः॥4॥

श्रीशस्ते सुश्रियं दद्यादायुर्वायुसुतप्रियः।

भूमिं तं वामनो दद्यादरीन्हन्तु नृकेसरी॥5॥

न वित्तैरुन्मत्ता न च कुहकदुर्मन्त्रबलिनो

न वा मिश्रैर्मिश्रा न च कुजनसाचिव्यसहिताः।

न दुश्शास्त्रं शस्त्रं विरसमुपजीव्योद्धतधियो

हयग्रीवं देवं वयमिममुपास्यैव कृतिनः ॥6॥

हयग्रीवस्य मध्वस्य (विद्यानिधिगुरोर्गुरोः) वाण्या विद्यार्गुरोर्गुरोः।

कृपया वादिराजोऽहं रचये युक्तिमल्लिकाम्॥

**अन्त्य**

वादिराजाख्ययतिना साधिता युक्तिमल्लिका।

गुणसौरभसर्वस्वं मुदे विष्णोर्न्यवेदयत्॥

## 2.शुद्धिसौरभम्

**आदि**

महत्सु गुणसारेषु दोषान्वेषणधीर्मुधा।

अनन्तगुणहृद्योऽपि निरवद्यो न किं हरिः॥

**अन्त्य**

वादिराजाख्ययतिना साधिता युक्तिमल्लिका।

शुद्धिसौरभसर्वस्वमद्धा विष्णोर्न्यवेदयत्॥

## 3.भेदसौरभम्

**आदि**

सर्ववस्त्वात्मकत्वं च यदनन्तत्वमीरितम्।

तदयुक्ततमं मन्ये युक्तायुक्तविचारणे॥

**अन्त्य**

वादिराजाख्ययतिना साधिता युक्तिमल्लिका।
भेदसौरभसर्वस्वमथ विष्णोर्न्यवेदयत्॥

## 4.विश्वसौरभम्

**आदि**

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः॥

**अन्त्य**

वादिराजाख्ययतिना साधिता युक्तिमल्लिका।
विश्वसौरभसर्वस्वमथ विष्णौ न्यवेदयत्॥

## 5.फलसौरभम्

**आदि**

यद्यज्ञानं  मनोवृत्तिप्रतिबन्धकमेव न।
मनसा ब्रह्मणस्तर्हि साक्षात्कारस्सदा भवेत्॥

**अन्त्य**

न शास्त्राभिज्ञाना न च निगमयुक्ता न यमिनो
न मन्त्रानुष्ठानव्रतचरणचित्ता अपि वयम्।
न तद्यत्नोपेतास्तदपि चतुरा एव नितरां
वदामो यद्विष्ठ्या हयवदन तुभ्यं नम इति॥

आचार्यः पवनोऽस्माकमाचार्याणी च भारती।
देवो नारायणः श्रीशः देवी मङ्गलदेवता॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका।
मुक्तिसौरभसर्वस्वमित्थं सत्सु न्यवेदयत्॥

## 12. न्यायरत्नावलिः

**आदि**

श्रीलक्ष्मवक्षसे रूक्षनखशिक्षितरक्षसे।
स्वपक्षरक्षादीक्षाय नृहर्यक्षाय ते नमः॥1॥

त्रिधामा यस्य हृत्सीम्नि कृतधामा निरन्तरम्।
सुधीश्रियं दिशतु मे स मध्वक्षीरसागरः॥2॥

**अन्त्य**

वादिराजेन रचितां न्यायरत्नावलीमिमाम्।
सङ्गृह्यतः सभामध्ये वाग्दारिद्र्यं न विद्यते॥

वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः।
पञ्चमः सुधियां कण्ठालङ्कारं कुरुते तराम्॥

## 13. उपन्यासरत्नमाला

**आदि**

कमलासनाच्च भवतोऽभवतो महतीन्दिरा किल तया लतया।
तरुवद्भवान्परिवृतोऽरिवृतोदयदाव सेदमनु ते मनुते॥

नारायणोऽगण्यगुणनित्यैकनिलयाकृतिः।
अशेषदोषरहितः प्रीयतां कमलालयः॥

करणपालनशील न ते स्थितिं जलजनाभ वदन्ति कमाश्रिताः।
विदुरमी वरदामधरोदरप्रियजुषो यजुषोऽग्निबलानिव॥

**अन्त्य**

वादिराजेन रचिता मालेयं विमला सदा।
सदये हृदये धार्या हरिणा भववैरिणा॥

## 14. श्रुतितत्वप्रकाशिका

**अदि**

भारत्याश्च सरस्वत्या वायोश्च ब्रह्मणः श्रियः।
हरेर्हयाननाख्यस्य गुरूणां च कृपाबलात्॥1॥

वादिराजाभिधः सोऽहं श्रुतितत्वप्रकाशिकाम्।
अघौघनाशिकां विद्वज्जनवक्त्रप्रकाशिकाम्॥2॥

विचित्रविमलार्थौघ(र्थानां) साधिकां सत्प्रमोदिकाम्।
करोमि दुर्मतध्वान्तबाधिकां मोक्षसाधिकाम्॥3॥

**अन्त्य**

द्वौ नञौ प्रकतार्थस्यातिशयं कुरुतः किल।
अतो मीमांसकाचार्यमध्वाचार्यस्य सन्निधौ।
को वा वादी प्रतिवदेद्यद्वागीशो ह्यसौ गुरुः॥

## 15. भूगोलनिर्णयः

**आदि**

नारायणं नमाम्यग्र्यहारायणशिरोधरम्।
दूरायनमदूरं च पारायणपरायणम्॥1॥

आज्ञाताम्नायशिरसे स्वाज्ञातकमलोरसे।
स्मरद्बुद्धीनसरसे तुरङ्गशिरसे नमः॥2॥

अन्त्य

| |
|---|
| इत्थं भुवनमर्यादा कीर्तिता प्रीतये हरेः।<br>मध्वस्य वाण्या देवानां गुरूणां च सदा मुदे॥1॥ |
| पूर्णबोधार्यभक्तेन वादिराजाख्यभिक्षुणा।<br>वाक्यार्थकथनव्याजाद् भूगोळमिति वर्णितम्॥२॥ |
| नमोऽस्तु लक्ष्मीपतये गतयेऽखिलयोगिनाम्।<br>नमोऽस्तु पूर्णप्रज्ञाय शास्त्राभिज्ञाय सर्वदा॥३॥ |

## 16. पाषण्डमतखण्डनम्

आदि

| |
|---|
| संसेवे हंससंसेव्यमिन्दिरेन्दिन्दिरप्रियम्।<br>प्रमोदामोदभरितं श्रीपतेः पादपङ्कजम्॥1॥ |
| यत्सृष्टिचातुरीतोऽब्जमपङ्कं पङ्कवास्यपि।<br>स निर्दोषो विजयते हयग्रीवाभिधो हरिः॥2॥ |
| तदीयचरणाम्भोजे चञ्चरीको महामतिः।<br>करोति वादिराजाख्यो यतिः पाषण्डखण्डनम्॥3॥ |

अन्त्य

| |
|---|
| इदं श्रौतमतोद्यानप्रसूनरसनिर्मितम्।<br>वादिराजाख्यसरघासर्वस्वं सेव्यतां बुधैः॥1॥ |
| सदा साधुजनाम्भोधिसुधाबिम्बाय विष्णवे।<br>श्रीमध्वमुनिहृद्व्योमधाम्ने भूम्ने नमो नमः॥2॥ |

# 17. हरिभक्तिलता

## आदि

| |
|---|
| रमारमणमानम्य क्रमान्नत्वा गुरूनपि।<br>करोमि वादिराजोऽहं हरेः सुगुणदर्पणम्॥1॥ |
| हरिभक्तिलतामेतां तुरङ्गवदनप्रियाम्।<br>करोति वादिराजेन्द्रः सतां मुक्तिफलाप्तये॥2॥ |
| कर्मणा वर्धते यो न न कनीयांश्च कर्मणा।<br>निरनिष्टः स नः पातु निरवद्यो हयाननः॥3॥ |
| अखर्वसर्वदुर्वादिगर्वनिर्वापणो हरिः।<br>कुर्वीतोर्वीं श्रियं शर्वपूर्वगीर्वाणराण्मम॥4॥ |

## अन्त्य

| |
|---|
| शिवाज्ञया वादिराजः शिवादीनामनुग्रहात्।<br>हरिभक्तिलतापुष्पैः चकार कवितामृतम्॥1॥ |
| वादिराजार्द्रहृद्वापीतटाकाङ्कुरिता त्वियम्।<br>हरिभक्तिलता कृष्णतरोः पादेऽर्पितैधताम्॥2॥ |
| नवरत्नप्रभाभासं नमतामखिलेष्टदम्।<br>इन्दिरानन्दकं कृष्ण(मन्दारतरुमाश्रये) वृन्दारकतरुं श्रये॥3॥ |
| तद्वादिराजहृद्वापीमारम्याच्युतमूर्धनि।<br>स्थिता मुक्तिपुरीपर्यन्तं च येयं लतोद्गता॥4॥ |
| सन्तोऽत्स्यन्तः फलान्यस्याः सन्ततान्यन्तरान्तरा।<br>आरोहन्तु लतामेतामालम्ब्यान्ते हरेः पुरीम्॥5॥ |

अनेन प्रीयतां श्रीशः प्रीयेतां वाण्युमापती।
सुराः सदाराः प्रीयन्तामनुगृह्णन्तु नः सदा॥6॥

वादिराजमुनीन्द्रेण कृता सुजनसम्मता।
हरिभक्तिलताऽसूत तृतीयां मञ्जरीमिमाम्॥7॥

## 18.कल्पलता

### आदि

कृष्णौ बलज्ञानकार्यौ कृष्णारमणराज्यदौ।
पुष्णीतां मम सद्बुद्धिं वृष्णीवासिष्ठवंशजौ॥

### अन्त्य

हयग्रीव हयग्रीव मणिग्रीव नमोऽस्तु ते।
सर्वज्ञयसि यः स्वीयं सर्वज्ञस्त्वं न चापरः॥1॥

सन्न्यायनन्दनवनादन्यायातपघातिका।
इयं कल्पलता कृष्णकृतानुस्मृतिनोद्धृता॥2॥

वर्धिता वादिराजेन विद्यादुग्धाब्धिसम्भृता।
इयं कल्पलता भूयात्सतां सम्पत्करी सदा॥3॥

वागीशवीन्द्रचन्द्रादिराज्यदो यो महाभुजः।
कृष्णः स्वभजकख्यातिं व्यनक्तु प्रथितो बुधान्॥4॥

कृष्णस्य पादमूले च पादान्ते चास्ति यस्य धीः।
स एव ग्रन्थकारः सन्पद्येऽस्मिंस्तद्वदस्ति हि॥5॥

दुर्जनगर्जनभर्जनसज्जनहृज्जाड्यमार्जनोर्जितचरित।
अर्जुनराज्यार्जन धीर्मज्जतु मम तेऽब्जनाभ पज्जलजनने॥6॥

# 19. विवरणव्रणम्

## आदि

| |
|---|
| नमोऽस्तु हरये युक्तिगिरये निर्जितारये।<br>समस्तगुरवे कल्पतरवे परवेदिनाम्॥1॥ |
| हयग्रीवाय देवाय ज्वलद्दावाय दुर्हृदाम्।<br>त्रयीगेयाय निर्मायजनध्येयाय ते नमः॥2॥ |
| व्यासं शुभगुणावासं श्रीशं नौमि सतां वशम्।<br>योऽशङ्को मां स्वहृल्लेशं दासं दर्शयतीदृशम्॥3॥ |
| सन्मुख्व्यगतये श्लाघ्यकृतये वीतभीतये।<br>स्वर्वाग्मिपतये पूर्णमतये यतये नमः॥4॥ |
| ध्यानी यत्कृपया ज्ञानी क्षोणी सा शास्त्रसम्बदाम्।<br>वाणी शुभगुणश्रेणी प्रीणातु हितकारिणी॥5॥ |
| उमा परिहृतात्मीयभ्रमा सरसविभ्रमा।<br>रमारमणतत्त्वानि प्रमापयतु मां क्रमात्॥6॥ |
| हयग्रीवपदाम्भोजमकरन्दमधुव्रतः।<br>श्रीव्यासकरुणालेशोद्वृद्धधीर्मध्वकिङ्करः॥7॥ |
| वादिराजो यतिः  सोऽहमद्वैतागमकर्दमे।<br>गच्छन्पथि क्षिप्तपदस्तच्छुध्यै स्पृहयन्मुहुः॥8॥ |
| कुर्वे विवरणं तीव्रव्रणं दुस्तत्वदीपनम्।<br>तत्त्वदीपनमेकोनपादिकां पञ्चपादिकाम्॥9॥ |

# 20. रुग्मिणीशविजयः –

आदि

| |
|---|
| श्रीवेदान्तमहाचलं हि परितः संयोज्य सूत्राहिपम्<br>सद्वातागमपोषितात्महृदयं तत्पूर्वपक्षासुरैः ।<br>सिद्धान्तोक्तिसुरेश्वरैश्च मथितो यः कृष्णदुग्धाम्बुधिः<br>स्वीयानाममृतं प्रयच्छति स मां पायाद्गुणोद्यन्मणिः ॥ 1 ॥ |
| सच्छास्त्रोदितवर्त्मना पदमिदं ध्यायन्मदङ्काङ्कितो<br>मन्मन्त्रं जप शास्त्रसम्पदमथो दास्यामि भाग्यैः सह ।<br>तत्तत्त्वान्यपि बोधयामि तदनु प्राप्यो मदङ्घ्रिर्भवे-<br>दित्याघोषयतीव यः करचयैस्तं वाजिवक्त्रं भजे ॥ 2 ॥ |
| श्रये हयमुखं श्राव्यकाव्यमार्गसमाप्तये ।<br>सरागयोगिपूगोक्तस्तोत्रतोत्रवशं महः ॥ 3 ॥ |
| सिञ्जन्नूपुरशोभिपादकमलां मन्दस्मितोद्यन्मुखीम्<br>कञ्जाक्षीं कुचभारभीरुविलसन्मध्यां क्वणत्कङ्कणाम् ।<br>शम्ब्वाद्यैः परिसेवितां सुवसनां जाम्बूनदालङ्कृतां<br>अम्बां तां प्रणतोस्मि कृष्णरमणीं लम्बालकां रुग्मिणीम्॥ 4 ॥ |
| सत्सङ्घमानससरोवरमध्यवर्ती कृष्णाङ्घ्रिचारुकमलार्पित चित्तवृत्तिः।<br>शास्त्रातिमञ्जुपदरञ्जितरम्यसंसदास्माकहृत्सरसिजेऽस्तु स मध्वहंसः ॥ 5॥ |

ताटङ्कद्वयशोभिकर्णयुगलं भ्राजद्दयावीक्षणं
पूर्णेन्दुद्युति विद्रुमाधररुचा व्यामिश्रमन्दस्मितम् ।
ईषत्कुञ्चितकुन्तलं सतिलकं नासोल्लसन्मौक्तिकं
भूयात्कूर्मसदृक्षगण्डयुगलं वाणीमुखं श्रेयसे ॥ 5 ॥

श्रीनाथकीर्त्यम्बुजसेव्यगन्धं प्राणः स सङ्गृह्य विहर्तुमीष्टे ।
सोऽहं तदीयागमविस्तृतं तं वाणीमुखं वासयितुं वृणोमि॥ 7 ॥

हयास्यनासापुटजातवातविघातधूताघपलालजातः ।
मुनीशवागीशसुतः सुरम्यां हरेः कथां शंसति वादिराजः॥8 ॥

अन्त्य

यस्मिन्मङ्गलदेवताखिलजगन्माता रमा नायिका
पद्मा पद्मभवादिसेव्यचरणस्तद्वल्लभो नायकः ।
अश्वग्रीवदयापयोब्धिफलितं प्राग्र्योक्तिरत्नोज्वलं
तद्दासानुगवादिराजरचितं काव्यं विभाव्यं बुधैः ॥ 1 ॥

कृष्णः काव्यकृते स्वहस्तकमलच्छत्रं प्रदद्यात्प्रभुः
सच्छास्त्राभिधरम्यराज्यपदवीं सुज्ञानयानं मुदा ।
स्वाज्ञाराधनकङ्कणं करयुगे कैङ्कर्यहारं गले
स्वात्मानं हृदि नित्यचिन्तनधनं सद्युक्तिरत्नान्यपि ॥ 2 ॥

हंसानां हृदयङ्गमं कविलसद्भृङ्गादृतं मौक्तिक-
प्रख्याग्र्योक्तिनवं प्रबन्धजलजं पादेऽर्पितं स्याद्धरेः ।
लक्ष्मीरम्यकरे वरामरततेः सन्मानसे शारदा -
नन्दं तत्पवनः स्वहृत्कृतगुणं विस्तारयत्वञ्जसा ॥ 3 ॥

रोम्णां हर्षणकारिणि श्रवणतः पापौघ विध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रमिमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुग्मिणीशविजये सद्वादिराजोदिते
सर्गोऽभूत्सुरमण्डलीषु सुतरामेकोनविंशोमुदाम् ॥4॥

## 21. सरसभारतीविलास

### आदि

करोतु मम कल्याणं हरिर्हयमुखाभिधः ।
गुरुश्च मध्वमनामा मे वरदोऽस्ति निरन्तरम् ॥ 1 ॥

चार्वपूर्वपदश्रेणीं दुर्वाग्गर्वापहारिणीम्।
सर्वेष्टकारिणीमुर्वीं कुर्वे सरसभारतीम् ॥ 2 ॥

### अन्त्य

यत्नसाध्यमिदं काव्यमयत्नेनैव यत् कृतम् ।
अतः कर्तुमकर्तुं च समर्थोऽभून्मम प्रभुः ॥1 ॥

अहर्निशं हयग्रीवसेवी तत्कृपया कविः ।
महाकाव्यमिदं चक्रे वादिराजो महामतिः ॥ 2 ॥

लक्ष्मीप्रियाय यश्चक्रे रुक्मिणीशजयं पुरा ।
स चक्रे भारतीप्रीत्यै भारतीशजयं त्वमुम् ॥ 3 ॥

श्रियः पत्युर्भियां हर्तुः त्रयीवेत्तुर्हयास्य ते ।
प्रियाय मे जयाय स्यादियं सरसभारती ॥ 4 ॥

नमोऽस्तु पद्मनाभाय पद्मकान्ताय विष्णवे ।
परे तत्त्वे विशुद्धाय मध्वाय च नमो नमः ॥ 5 ॥

| |
|---|
| वादिराजकृते श्राव्ये काव्ये भव्ये सुबुद्धिभिः । <br> सेव्ये सरसभारत्यां विलासोऽभूद्धरिप्रियः ॥ 6 ॥ |

## 22. तीर्थप्रबन्ध

### आदि

| |
|---|
| हरिक्षीराम्बुदेः स्वैरं भवघर्मरिपोर्मनः । <br> विहराहरहश्चित्रचारित्रचतुरोर्मिषु ॥ 1 \|\| |
| हयग्रीवदयासिन्धुरन्धूकृतभवाम्बुधिः । <br> प्रबन्धमप्रतिद्वन्द्वं करोत्वेनमनेनसं ॥ 2 \|\| |
| आजन्मभूमेरटतोऽखिलेषु तीर्थेषु तद्वर्णनभारमूढ्वा । <br> आयासमस्मन्मृदुमानसस्य वायुर्मुहुः कृन्ततु मध्वरूपी ॥ 3 \|\| |
| वागीशतीर्थमुनिवर्य भवद्दयाम्बुयोगेन पावय मनोर्गृहमन्वहं मे । <br> नागेन्द्रतल्पमधिरूपय तत्पदाब्ज रागेण रञ्जय कलिं जय तद्विविक्षुं ॥ 4\|\| |
| तीर्थक्षेत्रतदीशानां माहात्म्यानि यथामति । <br> वादिराजो यतिः स्तौति पद्यैःकतिपयैः कविः ॥ 5 \|\| |

### अन्त्य

| |
|---|
| सुरगणपरिवारः शोभमानोरुहारःकरिकरसमहस्तः काञ्चनोद्दीप्तवस्त्रः। <br> शुभजनकृतगानः शेषभोगे शयानः प्रभुरयमविनाशः प्रीयतामिन्दिरेशः॥5॥ |
| नानावृत्तं स्वयात्राक्रमपरिचितसुक्षेत्रमाहात्म्ययुक्तं <br> शब्दालङ्कारबद्धं शमलकुलहरश्लाघनीयार्थहृद्यम् । <br> श्रीनाथप्रीतिहेतोः हयवदनकृपाम्भोदिसम्भूतरत्नं <br> चक्रे तीर्थप्रबन्धं बहुगुणभरितं वादिरोजो यतीन्द्रः ॥ 1 \|\| |

| |
|---|
| पद्यानि प्रथितापगाच्युतयशो हृद्यानि तत्खण्डिता-<br>वद्येनामलवादिराजयतिना मध्वोक्ति शुद्धात्मना ।<br>बद्धान्यध्वरसिद्धसत्कृतिचयोद्रिक्तोरुपुण्यप्रदा-<br>न्यद्धा यःपठते श्रुणोति स भेवेदुद्धामधामश्रियः ॥ 2।। |

## 23. स्वाप्नवृन्दावनाख्यानम्

**आदि**

| |
|---|
| हयग्रीवं चिदानन्दविग्रहं सदनुग्रहम्।<br>दशग्रीवच्छिदं शापान्मणिग्रीव विमोचनम्॥1॥ |
| सुग्रीवाभयदं सम्यगुग्रसेनविभूतिदम्।<br>उग्रविग्रहहन्तारं भक्ताभयकरग्रहम्॥2॥ |
| स्वनामग्रहणादेव निरस्तग्रहविग्रहम्।<br>वृन्दावनगतं वन्दे ब्रह्मरुद्रेन्द्र वन्दितम्॥3॥ |

**अन्त्य**

| |
|---|
| इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।<br>मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥1॥ |
| इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।<br>समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥2॥ |
| यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।<br>भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥3॥ |

## 24. तप्तचक्रभूषणम्

**आदि**

हयग्रीवं रमानाथं सच्चिदानन्दविग्रहम्।
आधारं सर्वविद्यानां नमामि सदनुग्रहम्॥1॥

श्रीमदानन्दतीर्थार्यान्नत्वा तत्करुणाबलात्।
तप्तचक्राङ्कनं कार्यमिति मानैस्सुसाध्यते॥2॥

**अन्त्य**

गन्थेनानेन मध्वादिदेशिकश्रीहृदब्जगः।
सर्वाभीष्टप्रदो भूयात्सद्गुणाब्धिर्हयाननः॥2॥

## 25. श्री हरिवायुस्तुति पुर(न)श्चरणम्

**आदि**

यत्पादाब्जप्रसादेन विना ब्रह्मादयोऽखिलाः।
न किञ्चिदपि जानन्ति तं वन्दे हयशीर्षकम्॥1॥

नत्वा नृसिंहकमले ब्रह्मवायुसरस्वतीः।
शेषाद्यखिलदेवांश्च पूर्णप्रज्ञं जगद्गुरुम्॥2॥

वक्ष्ये लोकहितार्थाय मन्त्रसाधनमुत्तमम्।
धर्मार्थकाममोक्षाणां कारणं भवतारणम्॥3॥

नानाविद्याश्च मन्त्राश्च सन्ति ह्येव सहस्रशः।
वैदिका लौकिकाश्चैव न तैः सिद्धिः कलौ युगे॥4॥

तस्मादिदं परं गुह्यं वायुस्तोत्रं महाफलम्।
स्मरणाद्देवदेवस्य ईप्सितार्थः कलौ युगे॥5॥

ब्राह्मणैर्विष्णुभक्तैश्च गुरुभक्तैश्च सिध्यति।

विष्णुभक्तिविहीनस्य न तु सिद्धिः कदाचन॥6॥

श्रीबीजमेव निक्षिप्य जपेन्मन्त्रविशुद्धये।

यस्य यस्मिन्भवेद्भक्तिः सोऽपि मन्त्रः प्रसिध्यति॥7॥

## श्रीभूतराज स्तोत्रम्

प्रसादार्थं सदा नारायणभूताख्यमादरात्।

वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥1॥

स्मरतां नियमेनैव भूतभीत्यादिभञ्जनम्।

वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥2॥

गुरोर्दक्षिणबागस्थं भजतां भद्रदं द्रुतम्।

वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥3॥

भूत्यैः कर्णविकर्णाख्यैर्युक्तं भूतगणैस्सदा।

वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥4॥

क्रूरं वीरं तथा शूरं धनुःखड्गादिधारिणम्।

वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥5॥

प्रतापवन्तं वीराग्र्यं वीरभद्रोपमं हृदि।

वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥6॥

राजसेवारतं लोके राजमान्यं रविप्रभम्।

वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥7॥

रक्ताम्बरधरं रम्यपुष्पमालासुशोभितम्।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥8॥

रत्नौघवलयोपेतं मुक्ताहारविभूषितम्।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥9॥

अर्काभाङ्गदसंयुक्तं रत्नकुण्डलमण्डितम्।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥10॥

उत्तुङ्गतुरगारूढं छत्रचामरसेवितम्।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥11॥

दिव्यचन्दनलिप्ताङ्गं कस्तूरीतिलकाङ्कितम्।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥12॥

अचिन्त्याद्भुतसन्मूर्तिं किरीटोज्ज्वलमस्तकम्।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥13॥

कुबेरकोशादानीतदिव्यमौलीन्दुपार्षदम्।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥14॥

मस्तकार्पिततन्मौलिं वादिराजाख्यसन्मुनेः।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥15॥

मानेन गुरुणा दत्ते नूपुरे दधतं मुदा।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥16॥

तस्माद्गुरोः प्रसादस्य पूर्णपात्रं तपोनिधिम्।
वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥17॥

रक्षकं महिमासक्तं सदा सर्वत्र सर्वथा।

वादिराजगुरोर्दूतं भूतराजं नतोस्म्यहम्॥18॥

वादिराजगुरोर्दूतभूतराजस्तुतिं सदा।

यः पठेच्चिन्तितं क्षिप्रं भवेत्तस्य न संशयः॥19॥

श्रीवादिराजहृत्पद्मसंस्थितं तुरगाननम्।

भजामि सततं सर्वैर्विनतं चित्तशुद्धये॥20॥

## श्रीभूतराज स्तोत्रम्

रक्तं विचित्रवसनं मणिकुण्डलाढ्यं

बन्धूकपुष्पसदृशाधरपाणिपादम्।

उद्यद्दिनेशकिरणारुणदेहभाजं

नारायणं नमत चापशरान् दधानम्॥1॥

गणैस्स नारायणभूतनाथः

समन्वितः कर्णविकर्णसंज्ञैः।

महामणीनां बहुलैस्सुकीर्णं

मौलिं ददौ मे शिरसि स्थिरोऽभूत्॥

अलघुमहिमराजद्वादिराजार्यपादा-

म्बुजगतमधुमाद्यच्चञ्चरीकायमाणम्।

अकुटिलहरिधर्मानुष्ठितिप्राप्तभावि-

त्रिनयनपदभाजं भूतराजं नतोऽस्मि॥

## श्रीमदणुवृन्दावनाख्यानम्

हरिः ॐ॥ हयग्रीवं चिदानन्दविग्रहं सदनुग्रहम् ।
दशग्रीवच्छिदं शापान्मणिग्रीवविमोचनम्॥1॥

स्वनामग्रहणादेव निरस्तग्रहविग्रहम्।
वृन्दावनगतं वन्दे ब्रह्मरुद्रेन्द्रवन्दितम्॥2॥

यो मां देवं विजानाति ऋजुस्थं पुण्यकृन्नरः।
स याति निलयं पुण्यं यद्गत्वा न निवर्तते॥3॥

विमानं दिव्यमानं च दीप्यमानं सदायनं ।
वृन्दावनोपरिगतं पूजयन्तु सदा मम॥4॥

पञ्चवृन्दावने पुण्ये पञ्चरूपात्मको हरिः।
पञ्चीकृत्य स्वरूपाणि नित्यं सन्निहितः स्वयम्॥5॥

अहं ब्रह्मा च वायुश्च विष्णू रुद्रश्च पञ्चमः।
रमाम नित्यमेवात्र श्वेतद्वीपे यथा वयम्॥6॥

अहं सदा देव सभासुभाजितः सुभास्वरैर्दिव्य विभूषणैर्युतः।
अहंसमानैः सुरमानिमानितः समानयुक्तैः सुमनोभिरञ्जसा॥7॥

गुरुमखिलगुणज्ञं सद्गुणैकाधिवासं शमदमपरिनिष्ठं सत्वनिष्ठं वरिष्ठम्।
सकलसुजनशिष्टं नित्यनिर्धूतकष्टं हयमुखपदनिष्ठं मां भजन्तु प्रपन्नाः॥8॥

तीर्थानामुत्तमं तीर्थं वनानामुत्तमं वनम्।
क्षेत्राणामुत्तमं क्षेत्रं मम वृन्दावनं द्विज॥9॥

तस्माद्वृन्दावनमिदं सर्वाभीष्टप्रदं सताम्।
पञ्चवृन्दावने पुण्ये सुपर्वाणश्च सर्वदा॥10॥

वसन्ति पुण्यकर्माणो विशेषात्ते च पर्वसु।
पञ्चम्यां च तिथौ नित्यं पञ्चपर्वसु पूजयेत्॥11॥

धूपैर्दीपैस्तथा माल्यैर्गन्धैर्दूर्वाक्षतादिभिः।
पञ्चभक्ष्यसमायुक्तं पञ्चामृतसमन्वितम्॥12॥

पञ्चखर्जूरसंयुक्तं नैवेद्यं विनिवेदयेत्।
एवं सम्पूज्यमानोऽहं दद्यां वरमनुत्तमम्॥13॥

तस्माद्वृन्दावने पुण्ये पञ्चपर्वसु पूजनम्।
दर्शनं सुजनानान्तु सर्वाघौघविनाशनम्॥14॥

वादिराजाख्य यतिना ब्राह्मणा स्वप्नमूर्तिना।
कृतं वृन्दावनाख्यानं पठतां सम्पदाम् पदम्॥15॥

वेदनिध्याख्य यतिना वादिराजेन चोदितम्।
स्वाप्नवृन्दावनाख्यानं लिखितं प्रीतये गुरोः॥16॥

## वादिराज प्रार्थना

माता राजा मत्पिता वादिराजःभ्राता राजा मत्सखा वादिराजः।
सर्वस्वं मे वादिराजो दयालुः नान्यद्दैवं नैव जाने न जाने॥

हरिभक्तिदयाम्भोधि तरलक्रीडनोत्सुकाः।
गुरवो वादिराजार्याः करुणां वितरन्तु मे॥

## सत्यधर्मतीर्थ विरचित श्रीवादिराजस्तोत्र

कदापुण्यारण्ये शुभधवलगङ्गा परिसरे
चरन् सूरेः सेवाजनित परमानन्दभरितः।
अये संवित् स्वामिन् हयवदन वादीश वरद
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥1॥

श्रीमद्वागीश योगी शुभ विशदमनीषीय भाष्यादिजातं
जातं जातेतरञ्चागममगमद्धृतौ विस्मितः प्रेष्ययस्मिन्।
सर्वं सर्वं सहायाम सम सम इति श्रीमतां सार्वभौमे
भौमेहाहानिदर्चार्चनकरमकरोत् सम्प्रसीदेत्सवादीट्॥2॥

नानानोनोहनानोत्परिचित वचसाऽपात्त मूलेन मूलं
नानानानन्यभावं गदति जगति नोचेद्भवान्न प्रभावात्।
सत्यं सत्यं भिदादिश्रुतिरतुलमतेर्युक्ति युक्तावकाशं
शङ्काया नाद्यदद्यादिति शशपथा वादिराड् बोधयेन्माम्॥3॥

पूर्वं पूर्वं चकानां भव शिवहर हे रुद्र हेरम्ब पाहि-
इत्याहूतप्रेतनाथप्रमुखमखभुजाभूभुजां या भुजाऽन्या।
सासोदाऽगाधबोधानुचरवरतवावासतो वासुदेव-
व्यासाख्याऽऽस्येति गर्जद्विजजनमहिता तच्चरित्रं विचित्रम्॥4॥

मस्त्येन्यस्तेन्दुरेशस्सुरसरिति रतीशानुगात् सानुरागा-
दागादागारतोऽतो हरिचरणदृगिच्छाच्छलाद्याप्रयाता।
चक्रीसत्रिक्रमोऽतोऽनुमतमनुमनु श्रीमता पूजनेन
(स्वजाया) सम्बद्धा यस्य बद्धोऽवसदवतुसदादासदासंस वादीट्॥5॥

व्यानो यस्यासम श्रीर्धुरि (हरि) हरिवदनश्चोपरिष्टाद्गरिष्ठः
पिङ्गाक्षाणां सदृक्षे किलजनिविजयापश्चिमः पश्चिमेऽभूत्।
व्यासप्रेष्टोपसेव्ये सकलसकलया भासमा नोऽसमानो
मेदिन्यां वादिराजो मयिदयतु दयायादसां नायकोऽलम्॥6॥

नवरत्नान्वयोत्थेन पुमुत्तंसेन निर्मिता ।
भक्त्यैव गुरुराट् प्रीत्यै पञ्चश्लोकी भवत्वियम्॥

इति सत्यधर्मतीर्थविरचितं श्रीवादिराजस्तोत्रं सम्पूर्णम्॥

## वादिराजगुरुवरचरितामृतम्

### प्रथमबिन्दुः

श्रियः पतिं बूधरमप्रमेयं वराहमीशं ह्यनिशं नमामि।
हयास्यमप्यादरतो भजामि मद्वेशकृष्णं प्रणमामि भक्त्या॥1॥

स्तोतव्यकर्माणमिलातलेऽस्मिन् गातव्य माहात्म्य सुपात्रभूतम्।
लातव्यरूपं गुरुवादिराजं ध्यातव्यमूर्तिं प्रणतोऽस्मि भक्त्या॥2॥

श्रीवेदवेद्यं परमं गुरुं तं प्रणम्य तच्छिष्वरान्गूरून्मे।
श्रीवेदनिध्याख्ययतींस्तदाज्ञा-मालम्ब्य संवच्मि गुरोश्चरित्रम्॥3॥

| |
|---|
| सुरैः प्रवर्ण्यं गुरुवादिराज-चरित्रमावर्णयितुं समुक्तः।<br>हास्यो भवेयं विबुधैस्तथापि गुरूत्तमाज्ञाबलतः प्रवृत्तः॥4॥ |
| कुठारपाणिना सृष्टे तौलवे मण्डले पुरा।<br>कुम्भासिक्षेत्रे निकटे पुष्पकासारसंज्ञके॥5॥ |
| रामाचार्यः सामवेदी षट्कर्म निरतो द्विजः।<br>सरस्वत्याख्यया पत्न्या स्वधर्मनिरतोऽवसत्॥6॥ |
| यां गौरीमिति च प्राहुर्देवभट्टं च तं विदुः।<br>सन्तानवान्कन्यकया लिप्सु सुगुणमात्मजम्॥7॥ |
| कुम्भासिक्षेत्रमठगान् श्रीवागीशमुनीश्वरान्।<br>भक्तानुग्रहदक्षांस्तान् श्रुत्वा शरणमेयिवान्॥8॥ |
| गौरी तु सुतलाभः स्याद्यदि लक्षसुभूषणैः।<br>श्रीपतिं पूजयिष्येऽहमिति सङ्कल्पवत्यभूत्॥9॥ |
| श्री वागीशयतीशास्ते दम्पती शरणागतौ।<br>कृपादृष्ट्याऽनुगृह्णन्तो भवेतां पुत्रशालिनौ॥10॥ |
| मन्त्राक्षतान् स्वीकुरुतमित्युक्त्वा प्रददुः किल।<br>किं तु वाचं युवां पातं मदीयाज्ञातमात्रकम्॥11॥ |
| पवित्रस्वर्णपात्रस्थं स्वर्णवर्णमनोरमम्।<br>शिशुं दत्तं मदाराध्यकोलायेति वचोऽब्रुवन्॥12॥ |
| आकर्ण्य तद्वाचमिमां तु दम्पतीखिन्नौ यदाऽऽस्तां गुरवोऽवदंस्तदा।<br>यदि प्रसूयेत भवन्निकेतने तदा स बालो युवयोः परं भवेत्॥13॥ |

| |
|---|
| बहिः प्रसूयेत तदा स मह्यं देयः सुदैवं हि परीक्षणीयम्।<br>आश्वासितावेवममून्प्रणम्य गृहं गतौ सा तु बभार गर्भम्॥14॥ |
| सा गर्भीणी दोहदमद्भुतं तद् दधार तीर्थाद्यवगाहनेच्छुः।<br>तत्त्वानि शुश्रूषुरहो दिदृक्षु- र्हरेः शुभार्चाः किल सम्बभूव॥15॥ |
| रामाचार्यो गुरोर्वाचं स्फुरन्पूर्णसुगर्भिणीम्।<br>गेहान्तरेऽवरुरुधे बहिःप्रसवभीतितः॥16॥ |
| सम्प्राप्ते दशमे मासे साधनद्वादशी तिथौ।<br>आचार्ये पारणासक्ते तदा केदारसस्यकम्॥17॥ |
| गौरेका सहसाऽगत्य भोक्तुं समुपचक्रमे।<br>दारिद्र्यपीडिता साध्वी सस्यभक्षणतत्पराम्॥18॥ |
| पत्याज्ञया गां निरोद्धुं केदारं प्राप्य सत्वरम्।<br>तदा तत्रैव सुषुवे भास्करप्रभमात्मजम्॥19॥ |
| ज्ञानदृष्ट्यैव गुरुभिर्विज्ञातार्थैः पुरागतैः।<br>प्रसूतिकार्यकुशला नियुक्ता वृद्धयोषितः॥20॥ |
| गुर्वादेशाद्धर्ममयशरावेणाद्भुतं शिशुम्।<br>भूमिस्पर्शात्पुरैवाऽऽशु जगृहुः पूतदेहिनम्॥21॥ |
| साध्वी सा क्षेत्रमध्ये तु प्रतिसीरान्तरे स्थिता।<br>वृद्धा परिचरन्तीस्ताः संवीक्ष्याश्चर्यतोऽब्रवीत्॥22॥ |
| कुतो जवनिका सेयं परिचारपरायणाः।<br>कुतो भवत्यो मान्याश्च समेता दुर्गतामिति॥23॥ |

इतः समीपे वागीशयोगिभिः संप्रचोदिता।

सेवितुं भवतीं प्राप्ता इत्याहुर्गुरुसत्कृपाम्॥24॥

ततो वृद्धाभिरानीता सशिशुस्सा सरस्वती।

रामाचार्यस्तन्मुखेन श्रुत्वा सर्वं सुविस्मितः॥25॥

स्वर्णपात्रधृतं बालं गुरूणां सन्निधौ मुदा।

न्यवेदयदखिन्नः सन् गुरुवो वीक्ष्य बालकम्॥26॥

भाविवायो नमस्तुभ्यमृजुवर्य प्रसीद नः।

इति स्मरन्तश्चित्तेन पस्पृशुः शिशुमादरात्॥27॥

शिशोर्वियोगमाशङ्क्य विषण्णौ दम्पती तदा।

पञ्चाब्दमेतं पुष्णीतमेतल्लीलाविनोदितौ॥28॥

इति वागीशतीर्थोक्तिसुधासञ्जीवितौ गुरून्।

प्रणम्य शिशुमादाय गृहं विविशतुर्मुदा॥29॥

शालीवाहस्य सुशके पक्षाकाशयुगेन्दुके।

शार्वरीवत्सरे माघे शुक्लद्वादशिकातिथौ॥30॥

ऋजुदेवः स लातव्यो धरण्यामवतीर्णवान्।

एकादशेऽह्नि रामार्यो जातकर्मादिकारयन्॥31॥

वराहकृपया जातं वराहाख्यं व्यधात्ततः।

अमर्त्यलीलं बालं तं पञ्चमेऽब्धे पिता मुदा॥32॥

उपनिन्ये सुलग्ने हि पत्न्या साकं सबान्धवः।

ततो गुरुनिदेशेन पत्नीपुत्रान्वितो द्विजः॥33॥

| |
|---|
| समागतः सन्ननाम प्रोक्तश्चैवं गुरूत्तमैः।<br>वराहकरुणाजातो वराहस्यैव सन्निधौ॥34॥ |
| तिष्ठत्वितः परं हीति विषण्णो जायया द्विजः।<br>अत्रैव वसतं बालवीक्षणानन्दितौ सदा॥35॥ |
| इति गुरुवरवाचा दम्पती हृष्टचित्तौ |
| यतिवरसविधे तौ बालवक्त्रेन्दु दृष्ट्या।<br>किटवरपदसेवातत्परौ श्लाघ्यचर्यौ |
| क्षणमिव बहुकालं निन्यतुर्देवभक्तौ॥36॥ |

इति श्रीवेदनिधितीर्थान्तेवासि रामचन्द्राचार्यविरचिते श्रीवादिराजगुरुवरचचरितामृते प्रथमबिन्दुः समाप्तः॥1॥

## द्वितीय बिन्दुः

| |
|---|
| श्रीवागीशमुनीन्द्राणां सकाशेऽघविनाशके।<br>श्रीनिवासाभिदः कश्चित्पूर्वबन्धुरभूत्किल॥1॥ |
| विनष्टपुत्रस्वजनो विरक्तो वार्धकेऽभवत्।<br>काव्यतर्कविनोदी च माध्वराद्दन्त कोविदः॥2॥ |
| आत्मपावनहेतोस्तु यतित्वं प्रार्थयद्गुरून्।<br>तत्प्रार्थिताश्च वागीशास्तस्मै सन्याससद्व्रतम्॥3॥ |
| दत्वा विद्यानिधिं नाम्ना ख्यापयामासुरादृताः।<br>वराहाख्यं बालमेनं तच्छिष्यं व्यदधुः किल॥4॥ |
| जन्मतः सर्वेत्ताऽयं मानुष्यं हि विडम्बयन्।<br>सकृदुक्ताद्गुरोर्वाक्यादधिकं जगृहे स्वतः॥5॥ |

| |
|---|
| नन्वसाधारणबद्धिशक्तिर्वराहनामाऽखिलतत्ववेदी।<br>सन्यासदीक्षावहनेप्सयाऽऽज्ञां वागीशतीर्थात् जगृहे सुनम्रः॥6॥ |
| स्ववंशमुक्तामणिरेक एव सुतो यतिः स्यात्स्वकुलं विनश्येत्।<br>इत्थं विषण्णौ द्विजदम्पती तौ वागीशयोगि दयमान ऊचे॥7॥ |
| मा भैष्टमेतत्सुततुल्यरूपो द्वितीयपुत्रो भवितेति तत्र।<br>पश्चात्तयोः सूनुरभूद्वराहतुल्याकृतिस्तोषकरः स्वपित्रोः॥8॥ |
| अष्टमेऽब्धे वराहोऽसौ वागीशमुनिशेखरैः।<br>सन्यासदीक्षापात्रं स कारितस्तुष्टिमादधौ॥9॥ |
| भविताऽखिलवादीन्द्रदर्पहन्ता यतीश्वरः।<br>इत्यतो वादिराजाख्या लम्भितः सद्गुरूत्तमै॥10॥ |
| रञ्जनाद्गुरुषूच्चत्वाद्गुराडिति चेरितः।<br>विद्यानिधौ वृद्धतमेऽच्युतस्य पदं गते बालयतीश्वरोऽसौ॥11॥ |
| वागीशयोगीद्रमुखादपि स्म वेदान्ततत्त्वं जगृहेऽथ मोदात्।<br>कालेऽस्य माता सुषुवेऽथ बालं रूपादिभिः पूर्वजवन्मनोज्ञम्॥12॥ |
| स्ववंशमुक्तामणिमाधृता सा पुपोष वागीशवराप्तमेतम्।<br>स वादिराट् सद्मगतोऽनुजातं दृष्ट्वाऽनुगृह्णन्निजमातृतुष्टै॥13॥ |
| वियोगदुःखप्रशमाय नैजां मूर्तिं ददौ कांस्यमयीं स्वमात्रे।<br>मात्रा च लक्षाभरणार्पणाय संसूचितोऽङ्गीकृतवान्स योगी॥14॥ |
| वागीशयोगीश निदेशमाप्य स वादिराजोऽखिलदेशचारी।<br>क्षेत्राणि तीर्थानि निषेवमाणो वादीभसिंहो यशसा बभाजे॥15॥ |

| |
|---|
| स्वदृष्टक्षेत्रतीर्थादिमहात्मस्यावबोधकम्।<br>तीर्थप्रबन्धं कृतवान् पठतामघनाशनम्॥16॥ |
| पठनाद्यस्य तीर्थादिसेवनाल्लभ्यमञ्जसा।<br>सुकृतं जनतायाः स्यात्तं स्तोतुं कोऽनुशक्नुयात्॥17॥ |
| क्वचिद्विवाहसमारम्भे वरोष्णईषान्तरं विशन्।<br>दृष्टाहिर्वरमूर्धानं दष्टवान्कष्टमापतत्॥18॥ |
| कर्तव्यमूढः क्षेत्रेशो वधूतातः समीपगान्।<br>वादिराजगुरून् श्रुत्वा शुचा शरणमागतः॥19॥ |
| कृपया गुरुराड्तीर्थं तत्राऽऽनीतशवं प्रति।<br>सम्प्रोक्ष्य जीवयामास वरं बन्धुजनैस्सह॥20॥ |
| वधूवरशुभार्थं स लक्ष्मीशोभनगीतकम्।<br>स्वकृतं बोधयामास तदद्यापि हि गीयते॥21॥ |
| कुम्भघोणङ्गतः शार्ङ्गपाणिं नत्वा सभास्वसौ।<br>प्राज्यान्प्राज्ञान् पराजित्य स्वशिष्यानकरोत् प्रभुः॥22॥ |
| ततो वेङ्कटशैलस्य निकटं प्राप्तवान्कृती।<br>शिलासोपानरूपेण देवमावेक्ष्य दिव्यदृक्॥23॥ |
| जानुभ्यामेव शैलेन्द्रमारुरोह महाबलः।<br>श्रीनिवासं निरीक्ष्याथ सालिग्रामस्य मालिकाम्॥24॥ |
| अर्पयामास सा माला तत्कण्ठेऽद्यापि राजते।<br>क्वचिद्देशे सञ्चरन्स धनिकेन सुतेप्सुना॥25॥ |

| |
|---|
| प्रार्थितः प्रोचिवानस्मिन् जन्मन्येषः सुदुर्लभः।<br>सञ्चितं धनराशिं त्वं धर्माय विनियोजय॥26॥ |
| इति वाचा विषण्णस्स धनिकः समयान्तरे।<br>तुरुष्कमन्त्रविज्ञेन प्रदत्तफलभक्षणात्॥27॥ |
| स्वपत्न्यां लब्धजनुषा पुत्रेणानन्दभागभूत्।<br>कालान्तरे वादिराजगुरुराडागतः पुनः॥28॥ |
| धनिकोदन्तमाकर्ण्य समाह्वयत तत्त्ववित्।<br>स्वकीयमनुजद्वारा धनिकं सकुटुम्बकम्॥29॥ |
| स्वपुत्रपत्नीसहितस्स आढ्यक- |
| स्समगातः पुत्रमदर्शयद्गुरोः।<br>तस्माद्गुरोरप्यधिकं तुरुष्कजं |
| चित्ते विचिन्त्याप्तमनोरथोऽहसत्॥30॥ |
| न योग्योऽयं तवेत्युक्तो गुरुणा धनिकस्तदा।<br>कुत इत्यार्तिमांस्तर्हि पश्येति यतिपुङ्गवः॥31॥ |
| तीर्थं बालाय चिक्षेप बालो रौद्रतनुं ददौ।<br>तद्वीक्ष्य धनिको भीतो मुमोह पतितः क्षितौ॥32॥ |
| चिरादुत्थाय स गुरुं पप्रच्छादर्शनं शिशोः।<br>गुरुर्भूतं तु पप्रच्छ वद कोऽसीति सत्वरम्॥33॥ |
| भूतो भीतोऽवदन्मन्त्रवाद्यादेशादहं शिशुः।<br>भूत्वा षड्वायनो हत्वा पितरौ तन्निदेशतः॥34॥ |

| |
|---|
| गन्तुकामः कृपालुस्त्वं मन्तुं मे क्षन्तुमर्हसि।<br>इति याचन्तमूचेऽथ तव शक्तिं ददाम्यहम्॥35॥ |
| तं मन्त्रज्ञं कृतघ्नं त्वं हत्वा स्वच्छन्दतो व्रज।<br>इत्याश्वास्य श्रुतोदन्तं धनिकं च समाददौ॥36॥ |
| दशसाहस्ररूप्याणां हर्त्रे दुर्मन्त्रवेदिने।<br>क्रुध्यन्गुरोर्निदेशेन सद्धर्मपरमोऽवसत्॥37॥ |
| विठ्ठलेक्षातत्परेऽस्मिन् गुरौ भीमरथीतटे।<br>निशि केचिद्दस्युवीराः मठीयान् रुरुधुः किल॥38॥ |
| मठीयैर्मनुजैस्त्यक्तं गुरुं निर्भीतमानसम्।<br>दृष्ट्वा भीतास्तस्करास्ते तमेव शरणं ययुः॥39॥ |
| सान्त्वयित्वा गुरुर्दस्यून् यथोद्दिष्टं चचार सः।<br>विठ्ठलाधीष्ठिते देशे गुरौ निवसति क्वचित्॥40॥ |
| धनिकक्षेत्रचणकं भक्षयन्तं सितं हयम्।<br>वीक्ष्ये क्षेत्री धावयन्स ददर्श यतिमन्दिरम्॥41॥ |
| प्रविशन्तं तुरङ्गं तं क्रुद्धः क्षेत्राधिपो गुरुम्।<br>भवदश्वेन मे क्षेत्रधान्यसर्वस्वमाहृतम्॥42॥ |
| इत्युक्ते तं गुरुः प्राह पश्य मेऽश्वो न विद्यते।<br>इत्यादिष्टो मार्गमाणो नापश्यत्तं हयं सितम्॥43॥ |
| विस्मितोऽत्र प्रविष्टस्स दृष्टो नैवावलोक्यते।<br>योगीन्द्र मम संशीतिं छेत्तुमर्हसि सद्गुरो॥44॥ |

इत्यर्थयन्तं तं प्राह मदाराध्यः कृपां त्वयी।
कृतवान्सुकृती त्वं हि पश्य क्षेत्रं प्रगे पुनः॥45॥

इत्युक्तः प्रातरायातः सुवर्णचकोत्तरैः।
पूरितं क्षेत्रमालोक्य विस्मयानन्दनिर्भरः॥46॥

गुरुं शरणमापन्नः क्षेत्रं देवाय सोऽर्पयत्।
ततः क्षेत्रेशमापृच्छ्य यथेच्छं गतवान्गुरुः॥47॥

तदनु यतिवरेण्यः सम्भजन् क्षेत्रवृन्दं
विजयनगरमागात् स्वर्गभोगाभिरामम्।
अथ नरपतिराराद्योगिवर्यागतिं तां
श्रुतिपथमुपनीतां भृत्यकैर्ज्ञातवार्त्तः॥48॥

नृपतिरथ सुदोलां वाद्यपूगेन सार्धं
गुरुवरसविधं द्राक् यापयामास तोषात्।
नृपतिसचिव मुख्यैरर्थितो योगिवर्यः
त्रिभुवनगुरुरेषः प्राविशद्राजधानीम्॥49॥

इति वेदनिधितीर्थान्तेवासि रामचन्द्राचार्य विरचिते श्रीवादिराजगुरुवरचरितामृते द्वितीयबिन्दुः समाप्तः

## तृतीय बिन्दुः

अथो नृपसभामध्ये नृपतौ सदसस्पतौ।
बहुभिर्वादिभिस्सार्धं शास्त्रवादोऽभवत्किल॥1॥

प्रसक्ते बहुभिस्तत्र प्रसङ्गे वादिराट् सुधीः।
सर्वानुत्तरदानेन प्रीणयामास पण्डितान्॥2॥

| |
|---|
| श्रीवेङ्कटपतिर्वीरप्रतापस्तुष्टमानसः।<br>प्रसङ्गाभरणं नाम बिरुदं गुरवे ददौ॥3॥ |
| ततः पुण्यपुरीं प्राप्तो भेरीताडनपूर्वकम्।<br>काव्यश्रेष्ठं माघवाकाव्यं गजमूर्धनि पूज्यते4॥ |
| इत्याघोषितमाकर्ण्य सभापतिमवोचत।<br>अस्मत्पुरे महाकाव्यमेकं श्रेष्ठं प्रकाशते॥5॥ |
| दीयेत समयः कश्चिद्दर्शयिष्ये परीक्ष्यताम्।<br>अङ्गीकुर्वति विद्वौघ गुरुरेकोनविंशता॥6॥ |
| दिवसैरेकदिवसे ह्येकसर्गक्रमेण सः।<br>रुग्मिणीशवहाकाव्यं निर्ममे सुरसाकरम्॥7॥ |
| वीक्षणाय विदुषां संसदं प्रैषयत्सुधीः।<br>परिषत्सा परीक्ष्याथ विस्मितानन्दपूरिता॥8॥ |
| रुग्मिणीशमहाकाव्यमुत्तमं माघतोऽपि च।<br>इत्याघोष्य च साम्मान्य प्रार्चयत्कविसत्तमम्॥9॥ |
| कवीनां कुलमध्ये हि तिलकोऽयमिति प्रथाम्।<br>ख्यापयामास विदुषां परिषद्गुणमोदिनी॥10॥ |
| काश्यां हि गङ्गासरितस्तटे निश्यर्चनां श्रीदयितस्य कृत्वा।<br>उवास तत्रैव स्वकैर्निशीथे ग्राहास्तदाऽत्तुं परिवव्रुरारात्॥11॥ |
| स्वरक्षणाशक्तिभिया युतान् स रेखाविलेखेन निजान्ररक्ष।<br>नक्रास्तु रेखामभिलङ्घितुं ते ह्यशक्तितो हन्त निवृत्य जग्मुः॥12॥ |

| |
|---|
| इन्द्रप्रस्थे तुरुष्केन्द्रमृतपुत्रस्थलोपरि।<br>देवपेटीं न्यधाद्योगी निषिद्धो यवनैर्हसन्॥13॥ |
| जीवद्राजात्मजस्थाने न दोषोऽस्तीति सोऽब्रवीत्।<br>यवनैर्विस्मितैर्भूपो बोधितोयतिशेखरम्॥14॥ |
| श्रीमदुक्तं तथ्यमस्तु परीक्षा क्रियते मया।<br>इत्युक्त्वोत्खानयन्पुत्रं जीवन्तं वीक्ष्य विस्मितः॥15॥ |
| वन्दस्व वत्स महतस्तव जीवनदान् गुरून्।<br>इत्यानमय्य स्वसुतं धनराशिं न्यवेदयत्॥16॥ |
| निराकुर्वति हंसेन्द्रे बहूष्ट्रैः प्रेषयन्नृपः।<br>तत्प्रेषितं द्रव्यराशिं मुक्तारत्नादिकैर्युतम्॥17॥ |
| गङ्गायां क्षेपयामास विरक्तकुलदीपकः।<br>प्रयागे ब्रह्मणः सन्ध्यामठे जपपरस्य हि॥18॥ |
| मुनिवेषधरो व्यासः साक्षाद्दृष्टिपथे स्थितः।<br>मात्रोपयाचितं वत्स लक्षभूषानिवेदनम्॥19॥ |
| सुपुत्रेण त्वया कार्यं महाभारतटीकया।<br>लक्षग्रन्थिपदार्थानां विवृत्या लक्षभूषया॥20॥ |
| मदर्चनेन मात्रोक्तं साधितं स्यादितीरितः।<br>व्यासाज्ञां शिरसा धृत्वा बदरीं गतवान्मुदः॥21॥ |
| प्रणम्य मध्वहंसेन्द्रान् व्यासमध्वप्रचोदितः।<br>लक्षालङ्कारटीकां स विलिख्यार्पयते स्म हि॥22॥ |

| |
|---|
| श्रीयुक्तिमल्लिकादीनां करणे व्यासमध्वयेः।<br>अनुज्ञां प्राप्य नत्वा स नरनारायणौ मुनी॥23॥ |
| प्रत्यावृत्तो द्वारवतीमगाद्देवार्चनेच्छया।<br>षण्मासोपोषणं कुर्वन्स्तत्र तेपे तपः परम्॥24॥ |
| मध्वाष्टकं तदा तेने भक्ताभीष्टार्थसाधकम्।<br>कृष्णनामा यतिस्तत्र निवसञ्ज्वरपीडितः॥25॥ |
| श्रीवादिराजरचितमध्वाष्टकजपात् ज्वरः।<br>नश्येदिति स्वप्नदृष्ट्या वादिराजं समाश्रयत्॥26॥ |
| श्रीवादिराजयतिदत्तसुमध्वयोगिस्तोत्रेण तेन हृतसनरभाधयेषः. |
| कृष्णाख्यभिक्षरवनावटति स्म रूपी श्रीवादिराजमुनिकीर्तिजयध्वजोवा॥27॥ |
| हृदये वादिराजस्य तपस्सक्तस्य तत्र हि।<br>भासमानो हयग्रीवो गुहायामत्र मे शिला॥28॥ |
| तामानीयार्चया त्वं द्राक् मम प्रीतिं समार्जय।<br>इत्यादिशद् गुहां गत्वा हयग्रीवशिलां गुरुः॥29॥ |
| सूर्याधिकप्रकाशेन राजन्तीं वीक्ष्य भक्तितः।<br>नीत्वा नित्यं पूजयन् स तुतोष हरिसेवनैः॥30॥ |
| धनी कश्चित्सुलोभीति तल्लोभविनिवृत्तये।<br>हयास्यस्य शिलामन्यां तत्समीपे न्यधाद्गुरुः॥31॥ |
| तदारभ्य धनी लोभान्मुक्तो धर्मपरोऽभवत्।<br>कालान्तरे समागत्य वादिराजः प्रसन्नदीः॥32॥ |

| |
|---|
| वैकुण्ठदासं धनिनं हरिभक्तं चकार हि।<br>एवं चरन् घूर्जराणां देशे तद्देशगान् बहून्॥33॥ |
| स्वशिष्यानाततानाथ हरिभक्ताग्रणीर्यतिः।<br>ततः परमहंसोऽयं पम्पाक्षेत्रं समासदत्॥34॥ |
| तत्र कृष्णाच्युतौ भूपौ बहुदारिद्र्य पीडितौ।<br>शरणं प्रापतुर्भूमौ कल्पवृक्षायितं यतिम्॥35॥ |
| तयोरभयदायी स वालिगह्वरमाविशत्।<br>तत्रोपलं प्रोक्ष्यमाणं विदारितमभूत्किल॥36॥ |
| पेटिकाभशिला मध्ये मुक्तारत्नानि भूरिशः।<br>दृष्टानि वादिराडाज्ञाबलमालम्भ्य भूपती॥37॥ |
| तान्यादाय प्रार्थयतां कामितं गृह्यतामिति।<br>विरक्तो यतिराट् तत्र प्रतिमायुग्मात्रकम्॥38॥ |
| सुग्रीवपूजितं रामं विठ्ठलं वालिपूजितम्।<br>गृहीतावान् स्वपूजार्थमन्यन् माऽस्तु ममेति सः॥39॥ |
| तावावयोर्हरेस्सेवासुकृतं लप्स्यतेऽञ्जसा।<br>अनुग्राह्यौ तदेत्युक्तिः स्वपर्यये घटिष्यति॥40॥ |
| इत्यज्ञप्तौ तदाहूतौ रूप्यपीठस्थ सन्मठम्।<br>श्रीकृष्णस्यातिजीर्णं तं नवीनं तेनतुर्मठम्॥41॥ |
| ततः कालेऽच्युतो राजा वैद्यासाध्यरुजाऽर्दितः।<br>इति श्रुत्वा वादिराजः कृपया तत्पुरं गतः॥42॥ |

| |
|---|
| मन्त्रपूतजलेनैव जहारास्य रुजं गुरुः।<br>तुष्टो राजा तमारोप्य स्वसिंहासनमादरात्॥43॥ |
| छत्रासनादिबिरुदान्यार्पयद्गुरुपादयोः।<br>तान्यद्यापि सुपूज्यन्ते गुरुपुण्याहनि स्फुटम्॥44॥ |
| कदाचित्तौलवे देशे सञ्चरन्नञ्चितक्रियः।<br>पूर्ववेणुग्रामसंस्थे जैनालयसमीपगः॥45॥ |
| बङ्गवंश्यो जैनराजः स्वदेवागारमीक्ष्यताम्।<br>इति निर्बन्धयामास गुरुं प्रख्यातकीर्तिकम्॥46॥ |
| यतिराडाह मद्दृष्ट्या भवद्देवोन्यथाकृतिः।<br>स्याच्चेद्देयो भवेत् तर्हि प्रविशामीति भूपतिम्॥47॥ |
| भूपानुमोदितो देवसदनं प्राविशद् यतिः।<br>हरद्रत्नमयीं बुद्धप्रतिमां वीक्ष्य कौतुकात्॥48॥ |
| तस्यां रत्नमयार्चायां ध्यातवान् विठ्ठलात्मकम्।<br>तद्ध्यानाद्बुद्धमूर्तिस्सा विठ्ठलाकारभागभूत्॥49॥ |
| भीतोऽनृतान्नृपालोऽसौ तामर्चां गुरवे ददौ।<br>अधुनापि विभात्यद्वा विठ्ठलार्चा हरिन्मणेः॥50॥ |
| धर्मस्थलाभिधग्रामसमीपे सञ्चरन् यतिः।<br>तत् स्थलेश प्रार्थितःसन् भूतस्थलमिदं परम्॥51॥ |
| नास्मदावासयोग्यं स्यादित्युक्तेन प्रयाचितः।<br>मङ्गलापुर सप्तर्षिकुण्डतीरगशङ्करम्॥52॥ |

| |
|---|
| अंशतो लिङ्गरूपं तमानाय्यास्थापयन्मुदा।<br>तत्राराध्याराधनेन तत्स्थलेशं प्रहर्षयन्॥53॥ |
| लिङ्गोपरि नृसिंहस्य शिलां क्षेत्रप्रसिद्धये।<br>न्यवेशयत्तथा भूतराजमास्थापत् सुधीः॥54॥ |
| नित्यमन्नप्रदानेन ख्यातिरस्तु स्थलस्य हि।<br>इत्याज्ञाप्याचरद्देशे भक्तकल्पद्रुमो गुरुः॥55॥ |
| कुमारधारानद्याश्च नेत्रावत्याश्च सङ्गमः।<br>यत्र तन्निकटे चास्ति नावोरु ग्राम एककः॥56॥ |
| तत्राग्रहारे प्रथितः कटिपूर्वशिवालयः।<br>शिवलिङ्गसहस्रं तु प्रोद्भूतं तत्र दृश्यते॥57॥ |
| तदालोक्य गुरुः प्राह तद्देशाधिपतिं प्रति।<br>शिवलिङ्गाभिषेकोऽत्र कार्यतामिति सोऽब्रवीत्॥58॥ |
| तत्र तत्रोदितानां हि लिङ्गानामुच्चभूस्थितेः।<br>अभिषेको नरैः शक्यः कथं कर्तुमिति प्रभुः॥59॥ |
| गुरुः स्वदण्डकोट्यग्राद्रेखां कृत्वा जलोद्गमम्।<br>दर्शयामास सहसा प्रावहाल्लिङ्गसेचनम्॥60॥ |
| कारयामास नृपतिर्विस्मितो ग्राममज्जनात्।<br>भीतः शरणमापेदे निष्प्रवाहाय सद्गुरुम्॥61॥ |
| गुरुणा तीर्थमेकं तु कृत्वाऽदर्शनमापितः।<br>प्रवाहस्तद् दण्डतीर्थं भात्यद्यापि यशोध्वजम्॥62॥ |

राजा त्वाश्चर्यमापन्नस्तत्स्थलं गुरवे ददौ।
पुडिभैल्विति विख्यातं तन्मठेशवशं खलु॥63॥

साहित्याकाशराकेशो मीमांसाटवि केसरी।
श्वतिकासार मीनः स वादितूलतनूनपात्॥64॥

वेदान्ताब्धि महानक्रः तर्कवज्रायुधः कृती।
शब्दचापधरो धीरो वादिराजो व्यराजत॥65॥

शताधिकग्रन्थगणैः कीर्तिस्तम्भं न्यचीखनत्।
सुयुक्तिमल्लिकामुख्याः भान्ति यत्र ध्वजायिताः॥66॥

इति नरातिगकार्यकलापतः प्रथितकीर्तिचयो गुरुराण्मुदा ।
भजकमर्त्यचयं हि समुद्धरन्ननु चचार हयास्यपदार्चकः॥67॥

इति श्रीवेदनिधितीर्थान्तेवासि रामचन्द्राचार्य विरचिते श्रीवादिराजगुरुवर चरितामृते **तृतीय बिन्दुः समाप्तः**

## चतुर्थः बिन्दुः

तदात्वे व्यासराजाख्यः प्रह्लादांशो यतीश्वरः।
श्रीपद्मनाभवंशोत्थमुक्तामणिरभूद्भुवि॥1॥

न्यायामृतादिग्रन्थानां वादिमूकत्वदायिनाम्।
प्रौढानां भुवि निर्माता विजयीन्द्रादिसद्गुरुः॥2॥

स कदाचिद् रूप्यपीठं समायातः समादरात्।
श्रीकृष्णदर्शनं कृत्वा मध्यतालमठं ह्यगात्॥3॥

तत्र व्यासं ह्यष्टयोगिपूजार्हं मध्वपूजितम्।
पूजयन्नर्चनोक्तोऽसौ व्यासमुष्टिं निनाय हि॥4॥

| |
|---|
| बदर्यां मध्वमुनये साक्षाद्व्यासेन सेवितुम्।<br>व्यासस्य मुष्टयोऽष्टौ तु पुरा दत्ता इति श्रुतम्॥5॥ |
| 'प्राप्तः स नारायणतः शुद्धशिलात्मप्रतिमाः।<br>यासु स पद्मासहितो दोष्यहितः सन्निहितः'॥6॥ |
| इति मध्वजयोक्त्या तु व्यासमुष्ट्यागतिः स्फुटा।<br>'इष्ट्या व्यासाश्रमं गच्छन् मुख्यप्रेष्यो यतो मरुत्॥7॥ |
| प्रणिपत्य महान् मध्वो व्यासं निजगुरुं परम्।<br>विज्ञापयामास भूमौ स्वव्यापृतसुदुष्करम्॥8॥ |
| निशम्य तस्य वाक्यानि व्यासः सर्वान्तरात्मकः।<br>स्वाधिष्ठानान् परं चाष्टौ ग्राव्णस्तान् कृपया ददौ॥9॥ |
| इति वायुपुराणेऽपि प्रमाणं स्पष्टमीरितम्।<br>मध्वो मुष्टीः बदर्यास्तु समानीय मर्चयन्॥10॥ |
| श्रीविष्णुतीर्थमुनये षट् शिलाः प्रददौ किल।<br>अष्टशिष्ययतीनां तु कृतेऽस्थापयदेकिकाम्॥11॥ |
| व्यासमुष्टिं मध्यतालमठे मध्वगुरुस्ततः।<br>एकां पुनर्व्यासमुष्टिं श्रीकृष्णस्य तु सन्निधौ॥12॥ |
| न्यधात् पुनः स्वाञ्चनार्थं सर्वदार्चन तत्परः।<br>तदात्वे पद्मनाभार्यः प्रार्थयन्मध्वयोगिनम्॥13॥ |
| अष्टशिष्यप्राञ्चनार्थं मध्यतालमठे गुरो।<br>भवता स्थापिता मुष्टिर्व्यासस्य कृपया प्रभो॥14॥ |

| |
|---|
| पादपद्मैकभक्ताय मह्यमेका प्रदीयताम्।<br>इत्यर्थितो मद्गुरुः पद्मनाभसुयोगिने॥15॥ |
| श्रीकृष्णसन्निदौ न्यस्तां शिलामेकामदाद् गुरुः।<br>श्रीपद्मनाभवंशस्थैः सा शिलैका प्रपूज्यते॥16॥ |
| श्री विष्णुतीर्थवशगा सुब्रह्मण्यमठेऽधुना।<br>अभेद्यसम्पुटे भाति पञ्चकं बहिरेकिका॥17॥ |
| स्पष्टं प्रदर्शते व्यासशिला भद्राऽधुनाऽपि हि।<br>मध्यतालगतो विप्रस्तां शिलां न च दृष्टवान्॥18॥ |
| भीतो रूप्यालयस्थेभ्यो गुरुभ्यः स न्यवीविदत्।<br>कर्तव्यमूढा यतयः वादिराजगुरुं प्रति॥19॥ |
| शक्तस्त्वमेव कार्येस्मिन् व्यासार्चानयने द्रुतम्।<br>यद्यानेष्यसि तत्पूजां त्वमेव कुरु सन्मठे॥20॥ |
| इति देशान्तरस्थस्य बोधितो वादिराट् कृती।<br>व्यासङ्गव्याजमासाद्य व्यासार्यं समुपागतः॥21॥ |
| श्रीमान् रामो रावणादिहत्यां कृत्वाऽघवर्जितः।<br>तथापि द्विजघातेन दोषेस्तीति प्रदर्शयन्॥22, |
| लोकशिक्षार्थमेवासौ सेतौ रामेश्वराभिधम्।<br>शिवलिङ्गं प्रतिष्ठाप्य ब्रह्महत्यघसञ्चयम्॥23॥ |
| प्रतिगृह्णाति मत्तो यस्तं द्विजोत्तममञ्जसा।<br>उद्धरिष्येहमित्यूचे तदा कश्चित् तपोधनः॥24॥ |

| |
|---|
| प्रतिगृह्णाम्यहं त्वत्तः सीताजाने प्रदेहि मे।<br>लोकमोहकवाक्यस्य तात्पर्यमविदन् द्विजः।<br>स्वप्रतिष्ठाख्यापनाय गृह्णामीत्यब्रवीत् प्रभुम्॥25॥ |
| कृपाना रामभद्रस्तु प्रसीदन्निदमब्रवीत्।<br>ब्रह्मराक्षसतां प्राप्तो भाविवायुनिषेवणात्॥26॥ |
| भाविरुद्रपदं प्राप्य लोकपूज्यो भविष्यसि।<br>स ब्रह्मराक्षसो भूत्वा बदरीकाननेऽवसत्॥27॥ |
| एकांशेनाथ सञ्जज्ञे द्विजवंशे कलौ युगे।<br>नारायणाचार्यनामा नारलग्रामगो द्विजः॥28॥ |
| श्रीवादिराजभृत्यस्सन्नुवास गुरुसन्निधौ।<br>साधनद्वादशी तिथ्यां व्यासराजो निरीक्षते॥29॥ |
| भीक्षार्थमिति हि श्रुत्वा स्नातः शीघ्रं स वादिराट्।<br>भिक्षां स्वीकृत्य पश्चात्तु नद्यास्तीरे पुनस्सुधीः॥30॥ |
| यथाभुक्तं भुक्तवस्तुनिचयान्मुखतः क्षिपन्।<br>संशुद्धजठरः स्नात्वा जप्यान्मत्रान् जपन्नभूत्॥31॥ |
| नारायणार्योऽकृतनित्यकृत्यकं गुरुं सुभुक्तं कुतुकात्परीक्षितुम्।<br>नदी तटे विस्मयकारितत्क्रियां दृष्ट्वा तरोः स्कन्धगतो न्यलीयत॥32॥ |
| वादिराजः समाप्यात्मजपकर्म समुत्थितः।<br>समागच्छंस्तरोर्मध्ये निलीनं द्विजमैक्षत॥33॥ |

| |
|---|
| परीक्षामन्तुना क्रुद्धः ब्रह्मरक्षो भवेति सः।<br>शशाप गुरुराजस्तं द्विजं शरणमागतम्॥34॥ |
| आकामावैन कः स्नाता इत्याक्रोशन्वने चर।<br>यस्मात् प्राप्स्यस्युत्तरं तं मुक्तशापस्ततो भवेः॥35॥ |
| इत्याज्ञप्तस्य दुर्दैवाद्ब्रह्मरक्षा सतां गतः।<br>वनाद्वनं व्रजन् घोरो बदरीमागतस्तथाः॥36॥ |
| तत्र स्वांशं ब्रह्मरक्षोरूपं दृष्ट्वाऽथ विस्मितः।<br>तेनैक्यं सहसा प्राप्य तत्रैवाचरदादरात्॥37॥ |
| कालान्तरे गुरुर्बदरीक्षेत्रगामिनम्।<br>वादिराजं समालोक्य ब्रह्मराक्षसयोनिगः॥38॥ |
| यता प्राग् गुरुणाऽऽदिष्टं क्रूरोऽपृच्छत्तथैव हि।<br>आषाढे कार्तिके माघे वैशाखे स्नानतत्परः॥39॥ |
| ब्रह्मराक्षसपैशाचयोनेर्मुक्तो भवत् ध्रुवम्।<br>इति श्रीवादिराजस्य प्रत्युत्तरवचोऽमृतात्॥40॥ |
| ब्रह्मराक्षसतां त्यक्त्वा सुरूपोऽग्रे गुरुर्नमन्।<br>इतः परं भूतराज इति ख्यातो मदन्तिके॥41॥ |
| वसन्नग्रे वहन् दोलां मदीयां सुकृती भवेः।<br>भाविजन्मनि रुद्रस्त्वं भविता नात्र संशयः॥42॥ |
| भाविरुद्रानुग्रहस्य करणादृजुतां स्वयम्।<br>भाविवायुत्वमपि च स्वस्मिन्सूचितवान् गुरुः॥43॥ |

इति भाविरुद्रत्वपदयोग्योऽघ मोचितः।
वादिराजस्य रामस्य प्रसादादवसत्कृती॥44॥

कदाचिद् व्यासयतिना स्वर्च्यदेवस्य पूजने।
प्राभातिके नियुक्तः स वादिराडर्जनात्परम्॥45॥

व्यासमुष्टिं गृहीत्वाऽथ प्रत्यागान्मध्यवाटकम्।
व्यासराजो मठीयैस्तद्विज्ञाय प्रहसन्नवैत्॥46॥

निकृतेर्निकृतिर्नैव दोषाय भवति क्वचित्।
अलमेतावता व्यासपूजापुण्येन नस्त्विति॥47॥

तदारभ्य व्यासमुष्टिर्मध्यतालमठे पुनः।
श्रीवादिराजवशतामापाद्यापि तदीक्ष्यते॥48॥

मासाद्वितय पर्यायपूजां मध्वसुकल्पिताम्।
वर्षद्वितयपर्यन्तां कल्पयामास सन्मतिः॥49॥

कल्पयामास सञ्चारे सौकर्यं यतिनां ततः।
तथा प्रत्येकमष्टानां यतीनां निर्ममे मठम्॥50॥

ततः प्रभृति श्रीकृष्ण पर्यायामह सम्भ्रमः।
अत्यतन्तकौतुकोत्साहहेतुः सम्यग् विजृम्भते॥51॥

पुनः सञ्चरणासक्तो गतोऽयोध्यां पुरीं मुनिः।
तत्रत्य हनुमत् तार्क्ष्य प्रतिमे रूप्यपीठकम्॥52॥

आनीय कृष्णपुरतः स्थापयामास मोदतः।
वादिराजे विदेशस्थे पर्यायेऽन्ये मठेश्वराः॥53॥

| |
|---|
| अनन्तासनदेवस्य सविधे मध्वयोगिनम्।<br>अर्चितुं ह्यागतास्तत्र स्थानगेनावरोधिताः॥54॥ |
| मार्गेऽप्युच्छिष्ट विक्षेपाद् बाधिताः खिन्नमानसाः।<br>न्यवेदयन् वादिराजे क्षिप्रमागात्स योगिराट्॥55॥ |
| कृष्णगेहोत्तरे भागे श्रीमध्वं यतिशेखरम्।<br>स्थापयामास मेधावी निर्विघ्नार्चनसिद्धये॥56॥ |
| चोरान् द्रुतं जहीत्येकां भाषागीतिं चकार हि।<br>यत्पाठाद्विघ्नकर्तारस्ते चोराः नाशमाययुः॥57॥ |
| सोदाक्षेत्रे तथा मध्वप्रतिमां वादिराट् गुरुः।<br>ऐच्छत् स्थापयितुं श्रुत्वा पाजकस्थ मठेशिता॥58॥ |
| काण्वाभिदक्षेत्रगतमठाधिपतियोगिराट्।<br>प्रतिमां तां पाजकाख्ये क्षेत्रे मध्वपदाग्रतः॥59॥ |
| स्थापयित्वा स्वभक्तेषु प्रसादं कर्तुमर्हसि।<br>इत्यर्थितो वादिराजस्तां मध्वप्रतिमां शुभाम्॥60॥ |
| पाजके वासुदेवाङ्घ्रिनिकटे न्यदधात्किल।<br>यामाराध्य लभन्ते स्म भुक्तिं मुक्तिं च सेवकाः॥61॥ |
| पण्डितम्मन्यकाः केचितन्मत्सराद्वादिराजके।<br>कोलापुरे वटुं कञ्चित् सङ्गोप्याऽऽख्यापयन्प्रथाम्॥62॥ |
| मारितो वादिराजेन वटुरित्यपवादकम्।<br>श्रुत्वा मूकाम्बिका वैतज्जानातीति यतिर्वदन्॥63॥ |

| |
|---|
| स्वस्थ बुद्धिरभूत् कृष्ण महोत्सव सुसम्भ्रमे।<br>सैव देवी वटुं तं हि निर्भर्त्स्य गुरुसन्निधिम्॥64॥ |
| प्रेषयामास कृपया ह्येकान्तिकजनप्रिया।<br>धावन्नागत्य शरणं वटुराप्तोऽरिसञ्चयम्॥65॥ |
| मलिनास्यं चकारारिदुष्कृत्यं गुरवेऽब्रवीत्।<br>उण्डारुनामकग्रामे वसन् यतिवरो निशि॥66॥ |
| ग्रामेशरामकृष्णाख्यप्रभुणा स भटेन हि।<br>रुद्धस्तदग्रतो गच्छन्न दृष्टो बहिरागमत्॥67॥ |
| रुन्धन्तो दस्यवो ह्यन्धा आप्रातः परितो मठम्।<br>भीताः पलायिताः प्रातर्वादिराजतपोबलात्॥68॥ |
| स्वर्णकारश्चिकीर्षन् श्रीहेरम्बप्रतिमां शुभाम्।<br>पञ्चलोहद्रवं सिञ्चन्नश्वस्याकृतिमैक्षत॥69॥ |
| यतमानोऽन्यथाकर्तुमशक्तस्तत्विधारणे।<br>टङ्केन ताडयश्चित्रमभेद्यां विस्मितो निशि॥70॥ |
| स्वप्ने विप्रेण मूढं त्वं मा मुधा भिन्धि ताडनैः।<br>देवतासन्निधाने तां श्वो देह्यर्थयते मुदा॥71॥ |
| इति सञ्चोदितः प्रातरागताय तपस्विने।<br>स्वप्नसूचितवृत्ताय वादिराजाय तां ददौ॥72॥ |
| यतिराडश्ववदनं सादरं परिगृह्य सः।<br>अधिवासाभिषेकादिविधिभिः परिशोध्य ताम्॥73॥ |

| |
|---|
| पूजयन् स्वर्णकारं तं सानुगं शिष्यमातनोत्।<br>ततः स्वर्णकृतां वर्गस्तन्मठच्छात्रतामगात्॥ 74॥ |
| तदनु हयमुखं तु कोलमप्यादृतात्मा |
| मणिकनक मनोज्ञे विष्टरे भक्तिनम्रः।<br>विविधरुचिरभक्ष्यैर्हन्त राजोपचारैः |
| निरतमवनिपूज्यः पूजयन् राजते स्म॥ 75॥ |

इति वेदनिधितीर्थान्तेवासिरामचन्द्राचार्यविरचिते श्रीवादिराजगुरुवरचरितामृते चतुर्थबिन्दुः समाप्तः

## पञ्चमबिन्दुः

| |
|---|
| इन्द्रप्रस्थेशयवनभूपेन प्रेषितैः पुनः।<br>सुवर्णैः कृष्णमठगवलभ्याच्छादनाय सः॥ 1॥ |
| इच्छन् स्वप्ने निषिद्धः सन् मठोदीच्यामितालते।<br>तानि भर्माणि संस्थाप्य तदूर्ध्वं सर्पमूर्तिकाम्॥ 2॥ |
| स्थापयामास नागस्तु तत्राद्यापि सुपूज्यते. |
| अन्यच्च कारणं नागस्थापने श्रुमत्र हि॥ 3॥ |
| कार्कोटकस्य गोकर्णे पातालबिल्माद्दृतम्।<br>सुब्रह्मण्ये वासुकेस्तु बिलं ख्यातमिलातले॥ 4॥ |
| रूप्यपीठे तक्षकस्य बिलं प्रथितमस्ति हि।<br>क्वचित्तक्षकनिःश्वासतैक्ष्ण्येन भृशबाधिताः॥ 5॥ |
| पौराः श्रीवादिराजार्यं प्रार्थयामासुरादरात्।<br>तत्पीडा परिहारार्थं बिलास्यमुपलेन तत्॥ 6॥ |

| |
|---|
| सञ्छाद्योपरि नागस्य मूर्तिमास्थापयद्गुरुः।<br>स्वर्णरक्षां पौरपीडाहृतिं नागप्रतिष्ठया॥7॥ |
| कार्यद्वयीं वादिराजः साधयामास कौशलात्।<br>तन्महिम्ना नागराजः पूजितः कामदोऽस्ति हि॥8॥ |
| अवशिष्ट स्वर्णभारं स्वमठे भूगतं तदा।<br>कृत्षोपरिष्टात्तस्याथ भूतराजं न्यधान्मुदा॥9॥ |
| मीथ्यावादाघतप्तास्ते कोटेश्वरग भूसुराः।<br>आगताः शरणं वादिराजार्येण हि पाविताः॥10॥ |
| विष्णुदीक्षाप्रदानेन तप्तमुद्राङ्कनादिना।<br>यमावतारी कनकासनामाऽथ शूद्रजः॥11॥ |
| श्रीकृष्णमाभजन्गायन् रूप्यपीठेऽवसत्तदा।<br>तद्योग्यताविदा वादिराजसम्मानितोऽपि सः॥12॥ |
| ईर्ष्यालुभिरदत्तान्नः श्रीकृष्णं शरणं गतः।<br>एकैकभूषादानेन कृष्णेन निशि सत्कृतः॥13॥ |
| निक्षिप्य भूषां तत्प्राप्तवस्तुना वर्तयन्नभूत्।<br>भूषाधिकृद्भिरेकैकभूषाऽदर्शनदुःखितैः14॥ |
| प्रार्थितो वादिराड्योगी कनकं वणिजं च तम्।<br>पृष्टवान्विदितोदन्तो द्रव्यदानात्तभूषणः॥15॥ |
| मठीयान्भर्त्सयन् तस्मै देवार्पितमदापयत्।<br>कदाचिद्बहिरायातमन्नमण्डं प्रगृह्य सः॥16॥ |

| |
|---|
| कनकः पिष्टभक्ष्यं च कृत्वा कृष्णार्पितं व्यधात्।<br>वादिराडर्पयन्नन्नं तदर्पितममन्यत॥17॥ |
| पुनः पाकं कारयित्वा कृष्णपूजां समापयत्।<br>तत्कथास्मरणार्थं सः पिष्टभक्षं समण्डकम्॥18॥ |
| कृष्णप्रीत्यै समर्प्य तन्नियुयोज मुनीश्वरः।<br>अद्वैतपण्डितः कश्चिद्वादार्थं पत्रमालिखत्॥19॥ |
| एतद्दिने स्थले तत्र वादो निश्चयतो भवेत्।<br>इति पत्रार्थमालोक्य वादिराट् तत्स्थलं गतः॥20॥ |
| निश्चिते वासरे नाहमागन्तुं प्रभवाम्यतः।<br>इतस्तृतीये दिवसे समागन्तेति सूचितः॥21॥ |
| प्रतीक्षमाणो नापश्यद्वादिनं वादिराण्मुनिः।<br>सामीप्यात्कृष्णपर्यायपूजायाः गमनोद्यतः॥22॥ |
| पाण्डुरङ्गन्वयोद्भूतमानंदाख्यं बुधोत्तमम्।<br>न्ययूयुजत्तज्जयाय ददौ मन्त्राक्षतान्गुरुः॥23॥ |
| तदागमन पर्यन्तमत्र स्थित्वा विजित्य तम्।<br>रूप्यपीठं समागच्छ कामितं सेत्स्यतीति तम्॥24॥ |
| आनन्दभट्टः पश्चात्तमागतं वादिनं जयन्।<br>तस्माद्वादपराभूतिपत्रं प्राप्य समागतः॥25॥ |
| कृष्णपर्यायसक्तश्रीवादिराजाय पत्रकम्।<br>अर्पयामास दयया भवतां विजितो बली॥26॥ |

| |
|---|
| इत्यावेदयदानन्दभट्टः सन्तानकाङ्क्षया।<br>वादिराजं प्रार्थयन्सः पुत्रावाप्तिर्भवेदिति॥27॥ |
| गुराजाद्वरं प्राप्य तुष्टः स्वगृहमाययौ।<br>गुरूत्तमानुग्रहेण पुत्रं प्राप्य कृती मुदा॥28॥ |
| गुरुराजाभिदानं तं चकारानन्दभट्टकः।<br>पित्रोरानन्ददायी स ववृधे शुक्लचन्द्रवत्॥29॥ |
| वादिराजः स्वीयडोलां भूतराजोद्धृतां पुरः।<br>भक्तोद्धृतां पृष्ठभागे समारुह्य यदा व्रजेत्॥30॥ |
| जनः पुरो नरैः शून्यं विलोक्याऽऽश्चर्यमाददौ।<br>अथ यानागमोत्थेन वादिराड् यशसा यतिः॥31॥ |
| ईर्षयाऽन्यो मन्त्रसिद्ध्या भूतैर्यानमधारयत्।<br>वादिराजस्य यानाग्रं भूतराजोद्धृतं हि चेत्॥32॥ |
| मम यानस्य भागौ द्वौ ध्रीयते हन्त भूतकैः।<br>इत्याघोषितमाकर्ण्य वादिराट् स्फुटमेष्यति॥33॥ |
| अन्योन्यमिलने तद्वीत्याह्याथ मिलने क्वचित्।<br>भूतराजं रुद्ररूपं वीक्ष्यभूताः पलायिताः॥34॥ |
| यानं तु भूमौ पतितं तद्योगिह्वीकरं ह्यभूत्।<br>कदाचिल्लक्षदीपाख्ये महे वृष्टिनिरोधिते॥35॥ |
| यतिभिः प्रार्थितो वादिराजो वृष्टिमशामयत्।<br>स्वयं स्यन्दनरज्जुं तमाकर्षन् गान तत्परः॥36॥ |

| |
|---|
| निर्विघ्नं कृष्णदेवस्य दीपोत्सवमकारयत्।<br>वेलूरकेशवस्यापि रथं रुद्धमयापयत्॥37॥ |
| चतुष्षष्टिकलाभिज्ञो वादिराज इति प्रथा।<br>वृथेति चर्मकारस्य रटतः पुरतो यतिः॥38॥ |
| छित्वा कृष्णाजिनं चर्मकारकार्यक्रमेण हि।<br>अयश्यलाकं नासाया मूले स्विन्ने निधाय ताम्॥39॥ |
| अजिनं छिद्रयामास विस्मितश्चर्मकृन्नमन्।<br>क्षन्तव्यमग इत्युक्त्वा मानितोऽगाद्गृहं स्वकम्॥40॥ |
| यल्लूरु ग्रामदेवस्य शिवस्याराधकैर्द्विजैः।<br>प्रार्थितो वादिराट् तुष्टः श्रीनृसिंहशिलां न्यधात्॥41॥ |
| शिवान्तर्यामिनृहरेः पूजा कार्येति तत्र हि।<br>नियुज्य शिवमस्तौषीत् पूजकोद्धारहेतवे॥42॥ |
| तत्रत्य वृषभेन्द्रेण प्रार्थितोऽस्तौच्छिवध्वजम्।<br>अर्थितोऽथ ज्वरेणायं तं प्रवेश्य तनौ गुरुः॥43॥ |
| अर्चाकालं परित्यज्य मुमोचाथ स्वयं सुधीः।<br>निडम्बूरुस्थलाधीशं विनीतं सेवनोत्सुकम्॥44॥ |
| अनुगृह्य वराहार्च्यां प्रदाय त्रिस्वरूपकम्।<br>ऋजुमालालङ्कृतं तं स्थापयामास मारुतिम्॥45॥ |
| तत्पार्श्वे भूतराजं च बल्लालानुग्रहोत्सुकः।<br>केम्मुण्डलौ द्विजाग्र्याय लक्ष्मीनारायणं ददौ॥46॥ |

इत्यादि भूरिचरितैर्जनतामुदारः

प्रोद्धृत्य सान्द्रकरुणः शरणं सतां हि।

श्रीवादिराजयतिराडतुलप्रभावः

श्रीमद्वसन्मतसुवृद्धिकरो बभासे॥47॥

इति श्री वेदनिधितीर्थान्तेवासि रामचन्द्राचार्यविरचिते श्रीवादिराजगुरवरचरितामृते

पञ्चमबिन्धुः समाप्तः।

## षष्ठ बिन्दुः

सोदाराज्ये नृपालस्य लिङ्गायतगुरुस्तदा।

इन्द्राजालप्रवीणत्वादभ्रचारी स्वयं त्वहम्॥1॥

कैलासस्थशिवौ वीक्ष्य तदनुग्रहभागिति।

वञ्चयन्नञ्चितकृतिः शिवादेशाद्विजोत्करान्॥2॥

लिङ्गायतान्करोमीति नृसाहाय्यतो बलात्।

वशीकर्तुं द्विजान् प्राह न वश्यान् दन्तिपादतः॥3॥

घातयिष्येऽथवा शूले क्षेपये छिन्ननासिकान्।

इत्थं विप्रैर्भीषितैर्द्राक् प्रार्थितो गुरुराट् तदा॥4॥

सोदापुरं गतो दूरे वने तपसि तस्थिवान्।

शाल्मलीसरितस्तीरे प्रथितं यत्तमपोवनम्॥5॥

तदाऽरिभिर्जितो युधि प्रधावितो वनं विशन्।

तपस्विनः सुतेजसा प्रतप्तदेह ऐक्षत॥6॥

समन्ततोऽथ विस्मितस्तपस्विनं ददर्श सः।

सुभक्तितः प्रणम्यं तं प्रपाहि मां पराजितम्॥7॥

| |
|---|
| इति दीनं प्रार्थयन्तं कोऽसि किं भयमित्यथ।<br>पृच्छते वादिराजाय स्वनामाऽऽर्तिं च सोऽब्रवीत्॥8॥ |
| तदा गुरुवर क्रोधादपैहि द्विजबाधक ।<br>विप्रद्रोहाज्जितोऽसि त्वमरिभिः स्वगुरुं व्रज॥9॥ |
| वञ्चकं त्विति सम्प्रोक्तः शरणं पाहि मां प्रभो।<br>आगस्कृतमपीत्यद्धा पश्चात्तापिनमूचिवान्॥10॥ |
| मन्त्राक्षतान् प्रदत्तांस्त्वं गृहीत्वा स्वपुरीं विश।<br>तदानीमेव शत्रुस्ते सगणो धावति ध्रुवम्॥11॥ |
| राज्यं तव वशं याति ततः साधय मद्वचः।<br>इत्युक्तः प्रणिपत्याशु स्वपुरं गतवान् नृपः॥12॥ |
| तत्पुरस्ताद्धयाः शुभ्राश्चक्रशङ्खादिचिह्निताः।<br>धाटोभिस्तोषयन्तोऽन्यान् भियन्तोऽरिसंहतिम्॥13॥ |
| हयघातितसैन्योऽरिः पुरं त्यक्त्वा पलायत।<br>सोदाराजो राजतातनायको वशयन् पुरीम्॥15॥ |
| स्वर्णदोलां समानीय वादिराजान्तिकं गतः।<br>भक्त्या नत्वा निवेद्यारिविजयं गुरुमानयत्॥15॥ |
| आज्ञाप्यतां मया कार्यं त्वदीयोऽस्म्यनुगृह्यताम्।<br>इत्यर्थितो यतिः प्राह विद्वज्जनसां करु॥16॥ |
| गुरुणा तव वादोऽयं प्रचाल्यो मम सर्वथा।<br>इत्याज्ञया तथा कृत्वा समाह्वयत तं गुरुम्॥17॥ |

| |
|---|
| माययाऽऽकाशयानोऽसौ गुरुमन्त्रप्रवादितः।<br>पपात सदसो मध्ये लज्जाभयसमन्वितः॥18॥ |
| उत्थितस्स गुरुः पश्यन्नतितेजस्विनं मुनिम्।<br>भीतः स्विन्नः स्वकापट्यमद्य प्रकटमेष्यति॥19॥ |
| इति खिन्नोऽपि विकृतिमाच्छाद्याऽऽसनमाभजत्।<br>राजाऽथ समितः प्राह महात्मा वादमिच्छति॥20॥ |
| गुरुणा मम सार्धं च वादः प्रक्रम्यतामतः।<br>यतीश्वरो बभाषेऽथ नीतिज्ञः नृपशेखरः॥21॥ |
| विद्वद्वराः श्रृणुध्वं भोः नृपस्य गुरुरेष हि।<br>बाधते ब्राह्मणान्मायाविद्यया वञ्चयन् जनान्॥22॥ |
| साक्षात्कृताऽद्य सा माया सभ्यैरत्राग्रतो मम।<br>अधुना विप्रबाधा तु पार्वतीशस्य सम्मता॥23॥ |
| भवन्नेवेति द्रष्टव्यं वादे जयनिमित्ततः।<br>प्रथमे सप्तकेऽह्नां तु वादः कार्यो ह्यनेन हि॥24॥ |
| उत्तरे सप्तकेऽह्नां तु मया तूत्तरमुच्यते।<br>विजितश्चेदस्य मतं प्रवेक्ष्याम्यहमादरात्॥25॥ |
| पराजितो यदायं हि भवेद्वेश्याङ्घ्रिताडितः।<br>इति कृत्वा पणं तत्र चतुर्दशदिने मुनिः॥26॥ |
| पराजित्य गुरुं तत्र वेश्यापदतलाहतम्।<br>कारयामास स गुरुर्लज्जया दुद्रुवे द्रुतम्॥27॥ |

| |
|---|
| वृषभाङ्कितघण्टां तां तदीयामग्रहीद्यतिः।<br>तद्वादविजयाङ्कां स राजा तुष्टमनास्तदा॥28॥ |
| मुक्तासिंहासनं छत्रचामरे मुकुटादिकम्।<br>अष्टादश नृपाङ्कं तं यतयेऽर्पितवान्मुदा॥29॥ |
| वृषघण्टाऽधुनाप्यद्धा पूजायै गृह्यते मठे।<br>राजदत्तान्यमूल्यानि वस्तूनि स्वमठेऽधुना॥30॥ |
| दृश्यन्ते स्त्रीपदाघातो ह्यधुनाऽपि प्रचाल्यते।<br>श्रीवादिराजपूज्यश्रीपादपुण्यदिनोत्सवे॥31॥ |
| गोधूमपिष्टमाहत्य पद्मां क्रीडन्ति सस्त्रियः॥32॥ |
| राज्ञोऽस्य पुत्री मृतवल्लभाऽगाद्यतिं शरण्यं शरणं विषण्णा।<br>नारायणाष्टोत्तरकीर्तनेन तं जीवयन् भूपसुताममोदयत्॥33॥ |
| सोदाराजः श्रेष्ठ देवालयार्थं नत्वा स्तुत्वा वादिराजं ययाचे।<br>योगिश्रेष्ठो भूतराजं तदर्थं प्रोचे गत्वा व्यासमध्वौ प्रणम्य॥34॥ |
| मध्वादिष्टां मूर्तिमाश्वानयेस्त्वामित्यादिष्टो व्यासवासं जगाम।<br>यत्र व्यासो मध्वमुख्यैर्मुनीन्द्रैरासेव्याङ्घ्रिस्तत्ववादी विभाति॥35॥ |
| सुन्दरं मन्दिरं देवप्रतिष्ठायै नृपोत्तमः।<br>निदेशाद् वादिराजस्य शिलाभिः कर्तुमुद्यतः॥36॥ |
| नृपाज्ञयाश्मकुट्टकस्तदूर्ध्वमानयच्छिलाम्।<br>अधोमुखं गतां द्रुतं जनोपमर्दभीतितः॥37॥ |

| |
|---|
| गुरो पदाच्छपामीति प्रोचे तत्र न साऽपतत्।<br>तदाकर्ण्य स्वयं योगी ह्येक एव शिलां दृढाम्॥38॥ |
| बहूद्धार्यामूर्ध्वभागे निचिक्षेप महाबलः।<br>अश्मकुट्टैरभेद्यां च शिलामङ्गुष्ठतोऽभिनत्॥39॥ |
| भूतराजस्तथा देवमानेतुं बदरीं गतः।<br>यत्र व्यासो मध्वमुख्यैर्योगिभिः पर्युपास्यते॥40॥ |
| व्यासं मध्वं तथा नत्वा विनीतः सन्न्यवेदयत्।<br>वादिराजोक्तमाकर्ण्य त्रिविक्रममृजूत्तमैः॥41॥ |
| अर्चनीयं नयेत्याज्ञामदिशत्करणानिधिः।<br>त्रिविक्रमं सरथमानयन्रक्षसा पथि॥42॥ |
| रुद्रः क्रुद्धो रथगतचक्रीणैनं निहत्य हि।<br>सुमुहूर्ते निश्चितेऽथ यतयेऽर्पितवान्रथम्॥43॥ |
| राज्ञा सह यतीन्द्रोऽसौ त्रिविक्रममुदारधीः।<br>प्रातिष्ठिपद्रथे तत्र देवस्यागारमध्यगे॥44॥ |
| हयग्रीवसमुद्रस्य निकटे श्रियमादरात्।<br>सोऽयं त्रिविक्रमरथस्त्रिचक्रोऽद्यापि शोभते॥45॥ |
| त्रिविक्रमस्तस्य मध्ये सितोपलमयः शुभः।<br>भक्तानुग्रहदाताऽसौ यतिभिः पूज्यतेऽधुना॥46॥ |
| देवालयोत्तरे भागे निर्ममे स सरोवरम्।<br>योऽसौ धवलगङ्गाख्यो गङ्गासान्निध्यपात्रतः॥47॥ |

| |
|---|
| तत्तीरे वेणुगोपालं हनूमन्तं शिवं पुनः।<br>स्थापयामास भक्तानां सेवनाय यतीश्वरः॥48॥ |
| पूर्वभागे व्यासदेवं जटामण्डलभासितम्।<br>प्रतिष्ठाप्य परो हंसः कृतकृत्योऽभवन्मुदा॥49॥ |
| प्रतिवर्षं फाल्गुगनेऽथ पौर्णमास्यां महोत्सवः।<br>सप्तोत्सवक्रमात्कार्य इत्याज्ञापितवान्मुनिः॥50॥ |
| एवं श्रीकृष्णदेवस्य पर्यायार्चनमञ्जसा।<br>चतुर्वारमनुष्ठाप्य सज्जनानुद्धरन् बभौ॥51॥ |
| तच्छिष्यो वेदवेद्याख्यो वृद्धो भूत्वा त्वखिद्यत।<br>पर्यायपूजा न ममेत्यन्तरङ्गविदां वरः॥52॥ |
| वादिराजः स्वशिष्यं तं पर्याये पञ्चमेऽत्र हि।<br>त्वामाविश्याचरिष्यामि बहिस्सोदापुरे स्थितः॥53॥ |
| इत्याज्ञाप्यागतस्सोदां वेणुगोपालमर्चयन्।<br>उभयत्र स्वपर्यायपूजां स कृतवान् किल॥54॥ |
| कृष्णपर्यायोत्सवार्थं यियासुर्जनता किल।<br>स्वप्नसूचितमाहात्म्या सोदामेत्याभजद्गुरुम्॥55॥ |
| अश्वत्थचूतपनसाम्लसुनारिकेलधात्रीक्षुदण्डकदलीवनमध्यागा या।<br>वृन्दावनाष्टकपिनाकिहनमतां च मध्येस्थिता तु धवलेति सुदिव्यनाम्नी।<br>न्यधादष्टतन्नन्यांस्त इत्याख्याने प्रकीर्तिताः।<br>इति भाविसमीरोऽसौ वादिराजोऽद्भुतक्रियः॥56॥ |

लोकानुग्रहमातेने श्रीमध्वमतवर्धकः।

अमोघबहुलग्रन्थैः शताधिकसुसङ्ख्यया॥57॥

अमानुषक्रियाभिश्च लोकोपकृतिभिर्यतिः।

मध्वस्य गुरुसाम्राज्ये युवराजायितः कृती॥58॥

स्वावतारक्रियापूर्तिरासीदिति विचिन्तयन्।

पञ्चवृन्दावनं मत्स्यकूर्माद्याकृतिशोभितम्॥59॥

हनुमद्भीममध्वात्मचतुराकृतिसुन्दरम्।

उपरिष्टाद्धयग्रीवमर्तिराजितमुन्नतम्॥60॥

कारयित्वाऽगारमध्ये पश्चिमे व्याससन्मुखे।

पञ्चवृन्दावनस्याथ भूतराजं च दक्षिणे॥61॥

त्रिविक्रमस्य चैशान्यां क्षेत्रपालस्थले पुनः।

भूतराजं प्रतिष्ठाप्य त्रिविक्रमरथोत्सवम्॥62॥

कारयन् स्वेष्टवेत्त्वा तु शक्रेण प्रेषितं शुभम्।

विमानं पिप्पलास्याग्रे तिष्ठत्वान्तंन्तंन्तं महस्य हि।63॥

महोत्सवं समाप्याथ भक्तानामक्षतान् ददत्।

मध्यवृन्दावनस्यान्तः प्रविश्य जपतो मम॥64॥

यदा हस्तादक्षमाला पतेदग्रशिला शुभा।

आच्छाद्यतामिति स्वीयानाज्ञाप्य प्रातरञ्जसा॥65॥

सम्पूज्याश्वास्यमानम्य तद्वृन्दावनमध्यगः।

जपन् स्थितोऽथ तद्धस्ताज्जपमाला पपात हि॥66॥

आच्छादितेऽग्रपाषाणे गगने घण्टिकाध्वनिम्।

शृण्वन्तो ददृशुर्भक्ता विमानस्थमृजूत्तमम्॥67॥

करुणालो न मुञ्चास्मान् पदभक्ताननाथकान्।

का गतिर्न इति प्रोचैराक्रन्नपरान् स्वकान्॥68॥

आश्वासयन् स्वीयशाटीं पादुके च हिरण्मये।

अधः प्रक्षिप्य मा भैष्ट मध्वृन्दावनगस्त्वहम्॥69॥

एकांशेनेष्टदाताऽस्मीत्युक्त्वाऽगात्स सुरालयम्।

भक्ताः शाटीं पादुके च पूजयामासुरादरात्॥70॥

शेते विंशत्युत्तरे तु वत्सराणां महीतले।

वादिराजोऽवसद्दृश्यो मध्वसिद्धान्तवृद्धये॥71॥

स्वस्ति श्रीजयशालिवाहनशके सार्धात्सहस्रात्परं

द्वाविंशे शरदांगते प्रभवति श्रीशार्वरीवत्सरे।

मासे फाल्गुनिके सितेतरतृतियायां तिथौ विद्दिने

स्वातिहर्षणसंयुते हरिपदं श्रीवादिराजोऽगमत्॥72॥

इति श्रीवेदनिधितीर्थान्तेवासि श्रीरामचन्द्रार्यविरचिते श्रीवादिराजगुरुवरचरितामृते

षष्ठबिन्दुः समाप्तः॥

## सप्तमबिन्दुः

साक्षाच्छिष्यो वेदवेद्यः पश्चाद्दर्शनभाषणे।

स्वगुरो काङ्क्षमाणः सन्नित्यसेवापरोऽभवत्॥1॥

उभयं दुर्लभं त्वेकं दास्यामीति प्रबोधितः।

स्वप्ने दर्शनमैच्छत्स वृन्दावनपुरोगतः॥2॥

भूतराजापनीतायां शिलायामग्रतो गुरुम्।
ध्यानासक्तं दिव्यतेजोमूर्तिं परमुदैक्षत॥3॥

भक्त्या नमन् विवक्षुः स ददर्शाग्राश्मबन्धनम्।
वेदवेद्यगुरोः शिष्यो वेदनिध्याख्ययोगिराट्॥4॥

यं वदन्ति महाप्राज्ञा गरुडस्यांशसम्भवम्।
सुप्रपौत्रनिर्विशेषं तं वादिराट् प्रेमभाजनम्॥5॥

अभ्यङ्गपात्रहेतोर्हि सोदाभूपालकं पुरा।
कारयां वासयामास स्वयं राज्यं स्म पाति हि॥6॥

तच्छ्रुत्वा वादिराट् प्राप्तः विमोच्य नृपमादरात्।
शशास स्वप्रशिष्यं तु मौढ्याद्राज्यप्रशासनात्॥7॥

यदघं नरकावाप्तिकारणं तत्प्रशान्तये।
एकविंशद्दिने ह्यत्र नरतकायितकुण्डके॥8॥

वस्तव्यं भवतेत्यार्यशानाद्गुरुराण्मम।
उवास कुण्डके तत्र गुर्वाज्ञागौरवात् स्वयम्॥9॥

ततो गुरुपदारूढः श्रीवेदनिधियोगिराट्।
अत्युन्नतं ध्वजस्तम्भं राजमानं शिलामयम्॥10॥

श्रीवादिराजतीर्थस्य कीर्तिस्तम्भमिवावनौ।
स्थापयामास परमभक्त्या लक्ष्मीपतेः पुरः॥11॥

शिलास्तम्भोऽपतत्तत्र स्थापितोऽपि पुनः पुनः।
गुरुराट् खिन्नहृदयो वादिराजमथार्थयत्॥12॥

| |
|---|
| तन्निशि स्वप्नके वत्स हंसारूढाकृतिं मम।<br>उत्कृत्याथ शिलास्तम्भे न्यसेश्चेत्तिष्ठति स्थिरः॥13॥ |
| इति श्रीवादिराजार्यैः परमैर्गुरुभिः स्फुटम्।<br>सूचितार्थस्तथा चक्रे स्तम्भोऽतिष्ठदविघ्नतः॥14॥ |
| त्रिविक्रमाग्रे सोद्यामद्यापि परिदृश्यते।<br>हंसारूढलसद्वादिराजमूर्तिः शिलामयः॥15॥ |
| अस्मद्गुरौ वेदनिधौ प्रसादो वादिराण्मुनेः।<br>किं वक्तव्यो यतोऽस्माभिः प्रत्यक्षीकृत्य एव यत्॥16॥ |
| एडमूकं द्विजं स्वप्ने बोधयन्नात्मवृत्तकम्।<br>श्रीमद्वृन्दावनाख्यानं पठतां सर्वसिद्धिदम्॥17॥ |
| तोषयन् सज्जनमनः स्वमहात्म्यावबोधकम्।<br>मन्त्रतुल्यं महाग्रन्थं रचयामास वादिराट्॥18॥ |
| प्रातस्तद्वदनाच्चित्रं निस्सृतं गुकुराण्मम।<br>श्रीवेदनिधिराकर्ण्य लेखयामास मत्करात् ।19॥ |
| स्वप्नज्ञातं गुरुप्रोक्तं प्रभाते कीर्तयन्।<br>ततः परं मूक एव साक्षी चाहं च मे गुरुः॥20॥ |
| अणुवृन्दावनाख्यानं श्रीवेदनिधिसद्गुरुः।<br>स्वाप्नवृन्दावनाख्यानात्सङ्गृह्यालेख्य भक्तितः॥21॥ |
| लेखयित्वा शिलायां स वृन्दावनतटे बहिः।<br>स्थापयामास भक्तानां निरन्तरजपाय हि॥22॥ |

| |
|---|
| रघुनाथाचार्यनाम्ना वादिराजगुरोः पुरा।<br>शिष्येण रचितो भाति वृत्तरत्नसुसङ्ग्रहः ॥23॥ |
| यत्र रत्नाभवृत्तानि वर्णितानि सभक्तिकम्।<br>अवतारकृतान्यद्धा वादिराजमहामुनेः ॥24॥ |
| स्वाप्नवृन्दावनाख्यानं दिव्याद्भुतकथाश्रयम्।<br>पठतां शृण्वतां चैव कामितप्रदमञ्जसा॥25॥ |
| भूराजावेक्षणं प्राक् फलद्वयनिवेदनम्।<br>त्रिविक्रमावेक्षणं च गङ्गापञ्चकसेवनम्॥26॥ |
| पञ्चवृन्दावस्यात्र भजनं व्यासदर्शनम्।<br>स्वाप्नवृदन्दावनाख्यानपठनं सर्वकामदम्॥27॥ |
| ये पुत्रधनधान्यादिवृद्धिकामाः कलौयुके।<br>रूगग्रहपिशाचातिबाधानाशसमुत्सुकाः ॥28॥ |
| ते प्रातः शुद्धगङ्गायां स्नाताः सद्गुरुसेवकाः।<br>व्यासं त्रिविक्रमं चैव पञ्चवृन्दावनं गुरोः ॥29॥ |
| अश्वत्थं च हनूमन्तं वेणुगोपालकं शिवम्।<br>प्रदक्षिणीकृत्य पुनः प्रणम्य च समादरात्॥30॥ |
| अष्टोत्तरशतं वाऽपि तदर्धं वा तदर्धतः।<br>अष्टचत्वारिंशदहस्तदर्धदिनसङ्ख्यया॥31॥ |
| स्नानं प्रदक्षिणं चैव वन्दनं स्तवनं क्रमात्।<br>कुर्वन्तो गुरुरेवां हि गुर्वर्पितसुभोजिनः ॥32॥ |

| |
|---|
| इष्टार्थसूचनां लब्ध्वा गुर्वनुग्रहमाप्यच। <br> सेवाफलं लभन्तेऽद्धा कामधेनुर्यतो गुरुः॥33॥ |
| आकाशगङ्गाऽमृतगङ्गया च पातालगङ्गांऽतरगङ्गया च। <br> सार्धं चकास्तेऽत्र पवित्रपुर्यां कः शक्नुयात् स्तोतुमिमां हि सोदाम्॥34॥ |
| जयति धवलगङ्गा जाह्नवीसन्निधानादघनिचयनिहन्त्री पञ्चवृन्दावनं च। <br> भजकशुभकरं श्रीविष्णुवायुप्रतीकैःलसितमुत बत श्रीवादिराडर्चया च॥25॥ |

इति श्री वेदनिधितीर्थान्तेवासि श्रीरामचन्द्राचार्यविरचिते श्रीवादिराजगुरुवरचरितामृते सप्तमबिन्दुः समाप्तः॥

## अष्टमबिन्दुः

| |
|---|
| बिन्दावस्मिन् वादिराज ऋजुर्जीवोत्तमस्त्विति। <br> प्रमाणैस्साध्यते वेदनिध्यार्याज्ञाबलान्मया॥1॥ |
| सर्वे गुह्योपदेष्टारः सर्वेषां गुरवो हि ते' । <br> इति छान्दोग्यभाष्योक्तप्रमाणात्सिद्ध्यते गणः। <br> रुद्रादीनां तत्वबोधकारणं कीर्तितोऽञ्जसा॥2॥ |
| 'ब्रह्मत्वयोग्या ऋजवो नाम देवाः पृथग्गणाः'। <br> तैरेवाप्यं तत्पदं तु नैवान्यैः साधनैरपि॥' |
| इति निर्णयसम्प्रोक्तप्रमाणादृजुनामकाः। <br> ब्रह्मत्वयोग्या इत्येव साधिता साधुतुष्टये॥3॥ |

‘कल्की सुतेजा दासश्च धर्मश्च धर्मखण्डनः।

वर्चस्वी खषणश्चैव साधुश्चैव महीपतिः।

धर्मश्च धर्जश्चैव खर्पटश्च तथैव च ।

श्रद्धुश्चैव सद्यानो ज्ञानो विज्ञान एव च।

कीर्तनश्चैव सङ्कीर्णः कत्थनश्च तथैव च।

महाबुद्धिर्जयश्चैव तथैव च महत्तरः।

सुवीर्यश्चैव मेधावी विजयो जय एव च।

मनुर्मोदः प्रमोदश्चसन्त आनन्द् एव च।

सन्तुष्टश्चैव चार्वङ्गस्तथा चारुसुबाहुकः।

तथा चारुपदश्चापि तथैवच सुलोचनः।

सारस्वतः सुवीरश्च प्राज्ञः कपिस एव च।

लम्पटश्चैव सर्वज्ञः सर्वजिन्मित्र एव च।

तथा पापविनाशश्च एते पञ्चाशदीरिताः।

तथा धर्मोविनीतश्च शारदोजास्तथैव च।

सुतपस्क च तथैव च तथैवश्च तेजस्वी दानशीलस्तथैव च।

सुशीलश्चैव यज्ञश्च सुकर्ता च तथैव च।

यागवर्तकयज्वी च प्राणश्चापि तथैव च।

तथा त्राणश्चाम ऋषिरुपदेष्टा तथैव च।

तारकश्च तथा काल क्रीडनश्च तथैव च।

सुकार्ता च सुकालज्ञः कालसूचक एव च।

तथा च कलिसंहर्ता कलिः कालस्तथैव च।

स्वामरेतः सदारतस्ततश्च सुबलस्तथा।

सहः सदाकपिश्चैव गम्यो ज्ञानस्तथैव च।

तथैव स्याद्धशकलः श्रोतव्यश्च तथैव च।

सङ्कीर्तितव्यो मन्तव्यः कव्यो द्रष्टव्य एव च।

तथा सख्यश्च गन्तव्यः क्रव्यः स्मर्तव्य एव च।

सेव्यः सुबाव्यः स्वर्गव्यो भाव्यो ज्ञातव्य एव  च।

वक्तव्यश्चैव गव्यश्च लातव्यश्च तथैव च।

वायुश्चैव तथा ब्रह्मेत्येवं पञ्चाशदीरिताः।

इत्येतच्छतकं नाम ऋजूनां यः पठेत्सदा।

तैर्दत्तां पदवीं याति वासुदेवाभिवीक्षिताम्।'

इत्येवमृजुदेवानां शतं वामनसंज्ञकात्।

पुराणाच्च प्रसिद्धं तत् लातव्यो भाविमारुतः॥4॥

मारुतो ब्रह्मतामेति ह्येवं सिद्धं न संशयः।

'अनादिकालतः सर्वदोषहीना गुणादिकाः।

ऋजूनामेक एवास्ति परमोत्सहवर्जनम्।'

इति सत्तत्वमालायामुक्तवाक्याददोषता॥5॥

'दुर्विज्ञेयमतः सर्वैर्भारतं तु सुरैरपि।

स्वयं व्यासो हि तद्वेद ब्रह्मा वा तत्प्रसादतः।'

तात्पर्यनिर्णयोक्तिश्चेत्थं  भारततत्वकम्।

व्यासब्रह्मोभयाज्ञेयं प्राह तन्मरुदब्रवीत्॥6॥

| |
|---|
| भारतार्थस्य तात्पर्यनिर्णयं मध्वरूपभाक्।<br>लक्षालङ्कारतो वादिराजोऽप्यूचे तदर्थकम्॥7॥ |
| वादिराजस्ततो भाविब्रह्मा वायुरितीर्यते।<br>‘यावज्ज्ञानं चास्ति मे वासुदेवे<br>तावज्ज्ञानं वायुदेवस्य चास्ति!<br>यावज्ज्ञानं चास्ति वै तदृजूनाम्।’<br>इति गारुडवाक्यात्तु ऋजूनां ज्ञानसाम्यकम्॥8॥ |
| सिद्ध्येत्येव तथा स्वाप्नवृन्दावनवसस्त्विदम्।<br>लक्षालङ्कारकरणे व्यासाज्ञां साधयत्यलम्॥9॥ |

'प्रयागे ब्रह्मणः सन्ध्यामठे जपपरायणः।

अहमासं ततो लक्षालङ्कारं कुर्विति प्रभुः।'

दुर्वादिनः प्रमथ्याशु मत्पदं यातुमर्हति।

स्थापयिष्यति मच्छास्त्रं तेन मोक्षो भवेद्धि वः।'

इत्यूचे ब्रह्मवैवर्तपुराणे स्पष्टवाक्यतः।

'तं मध्वं मारुतं सर्वे परिवारतया सदा।

संसेवितुं सुरा भूमाववतेरुरिति श्रुतम्।

ते तु तच्छिष्यतामाप्य तन्मतं तु व्यघोषयन्।

तेषु मुख्यौ विष्णुतीर्थपद्मनाभाख्ययोगिनौ।

अत्यक्तदेहस्तत्राद्यो वर्तयिष्यति तन्मतम्।

तत्पूर्वमस्य वंशे च ऋजुस्थो हि सुरेश्वरः।

वादिराजो यतिर्भूत्वा चैतद्विस्तारयिष्यति।'

इति पाद्मपुराणोक्तरूप्यपीठसुवर्णने।

वादिराजऋजुत्वं हि साधितं स्फुटवाक्यतः॥10॥

'अपरोक्ष विशेषेण संयुता ब्रह्म पूर्वकाः।

कल्पयन्ता ऋजवः प्रोक्ता प्रारब्दफलभोगिनः।

ब्रह्मणो नावतारोऽस्ति शतमद्ये पराज्ञया।

वायुमारभ्य कल्पयन्ता जनिमन्तोऽत्र भारते।

हनुमद्भीममध्वाख्यरूपो वायुर्भविष्यति।

स्वयंवरसमुद्यगे रुक्मिणी पत्रमादरात्।

कृष्णायादाद्गृहीत्वा यो ह्यन्तःपुरगतो द्विजः।

सर्वादृष्टस्तदैवायमृजुर्लातव्यनामकः।

वायुस्थानसमारोहयोग्योऽयं यतिरूपवान्।

आकल्पं ब्रह्मणः कृष्णप्रसादश्चैकभाजनम्।

कृष्णार्चको यतिर्भूत्वा वादिराजो वदिष्यति।

श्रीरुक्मिणीशविजयं कलौ कृष्णप्रसादभाक्।'

वामनादिपुराणोक्त्या प्रसिद्धं वादिराण्मुनेः।

ऋजुत्वमवतारेषु कृष्णसेवाफलं स्फुटम्॥11॥

'सहोरूपस्य देवस्य लातव्यस्य बलात्मकम्।

मूलरूपं ज्ञानततं जगद्धरणकं यतः।

जातं तदात्मकं सर्वचेष्टकेन महात्मना।

रूपत्रयावताराय निहितं हरिणा स्वयम्।

अण्डाद्बहिः स्थितं मूलं सत्यलोकस्थितं महत्।

गृहीत्वा रुक्मिणीपत्रं कृष्णान्तिकमुपगतम्।

वादिराजाभिधं चेति मूलभेदविवर्जितम्।

तत्र प्रथमकं रूपं विश्वरूपान्तिके स्थितम्।

अमृतस्राविणीर्वाचः पञ्चरात्रादिनामिकाः।

ऋतरूपस्य विष्णोर्हि औत्कर्ष्यप्रतिपादिकाः।

अनयन्त स्वशिष्येषु द्वितीयं पृक्षनामकम्।

मागधादिमहासेनादुर्मानक्षयकारकम्।

कृष्णदत्तविचित्रान्न भोक्तुः तत्प्रियमुत्तमम्॥'

इत्थं बृहन्नारदीयप्रमाणाद्वायुसूक्तकम्।

बळिथ्येत्यादिकं भाविवायुत्रितनु साधकम्॥12॥

---

लातव्यस्यावतारश्च श्रुतिसिद्धा इति स्फुटम्।

श्रुतेः त्र्यर्थपरत्वात्तु सूक्ते वर्ण्यास्त्रयोऽपि हि।

हरिर्वायुश्च लातव्यो इति स्मृतिरियं जगौ॥13॥

'ऋगाद्या इतिहासाश्च पुराणं पञ्चरात्रकम्।

प्रोक्ताः सप्तशिवास्ताश्च मातरस्तत्र संस्थितम्।

तद्विचारपरं प्रोक्तं ज्ञानदोग्धृ तृतीयकम्।

लातव्यस्य ऋजोस्तस्य दशप्रमतिनामकम्।

वादिनां ज्ञानदानैकशीलानां राजनं यतः।

वेति ज्ञानं समुद्दिष्टं देति दानमुदाहृतम्।

प्रोक्तं शीलमिकारेण राजनं राजशब्दितम्।

वादिराजाभिधं रूपं दशप्रमतिसंज्ञितम्।

योषणोऽजनयन्तैतद् वादिराजाभिधं वपुः।

तस्मादेव ज्ञानरूपान्महिषस्य हरेर्गुणान्।

पालनाद्वरणीयत्वाद्वर्पा इत्यभिशब्दितान्।

रुद्राद्याः सूरयश्चान्ये ज्ञानवन्तः सुखेन तु।

प्रकृष्टज्ञानरूपो यो भाविमध्वः प्रकीर्तितः।

मधुशास्त्रं मध्वशास्त्रं सम्यग् वेत्ता गुरुस्तदा।

प्रमाणरूपवेदादौ गतिमान् गूहितं हरिम्।

आसमन्तात्पतित्वेतु मश्चात्याम्नायशास्त्रतः।

रूपत्रयं प्रेर्यते यत् पित्रा स्वस्य परात्मना।

प्रश्नरूपांस्तृणादीन् स दन्तेष्वारोप्य जक्षति।

लातव्याचार्यवर्यस्य यस्य रूपत्रिकं ह्युभौ।

रमानारायणौ प्रोक्तस्तयोराज्ञानुसारतः।

विशेषेणाभिवृद्धोऽभूदृगाद्यास्वारुहत्क्रमात्।

सनातनासु वाचासु नूनतास्ववरासु च।
पञ्चरात्रपुराणेतिहासाख्यविविधासु च।
इति सूक्तगतं रूपत्रयमेतन्महात्मनः।
यो वेद वेदवित्सस्यात्तत्त्ववित्तत्प्रसादतः।
इति ऋक् संहितावाक्याद् बळित्थासूक्तमेव तते।
लातव्यस्यावताराणां वर्णयन्त्यञ्जसा त्रयम्॥14॥

---

कृशं कृतघ्नमित्याद्यं श्रीभागवतनामके।
ब्रह्मणा वर्णितं दोषं वादिराट् स ऋजूत्तमः॥15॥

---

कृतौ सरसभारत्यामेवं वर्णितवान् यथा।
'इति स्वपितरि श्रीशे भक्त्या यस्तु पितामहः।
आदर्शयस्त्व दोषान्नः कुलवृद्धो गुरुर्मम।'
इति ब्रह्माणमात्मीयकुलवृद्धं प्रकीर्तयन्॥16॥

---

आत्मानमृजुवंशस्थं प्राब्रवीत् करुणानिधिः।
मूकाम्बिकां तथा देवीमेकान्तिकजनप्रियाम्॥17॥

---

तीर्थप्रबन्धे प्रावोचस्त्वयमेकान्तिकं त्विति।
कश्चिद् द्विजवरश्रेष्ठ इति भागवतोक्तितः॥18॥

---

रुक्मिणीपत्रनेतारं किमब्रह्मेति सञ्जगौ।
कशब्दो ब्रह्मवाचीति भावीब्रह्माऽत्र कीर्तितः॥19॥

---

'रुद्रेन्द्रवरुणाद्यास्तु देवाः सर्वे ह्युपासते।
पंञ्चवृन्दावनेऽश्वास्य'मिति स्ववचनाद्गुरुः॥20॥

आश्वास्यप्रतिमाभूतमात्मानं सुरपूजितम्।

पञ्चवृन्दावनाख्याने स्वयमूचे द्विजास्यतः॥21॥

'यो मामेवं विजानाति ऋजुस्थं पुण्यकृन्नरः।

स याति चालयं (निलयं) पुण्यं यद्गत्वा न निवर्तते।

'ब्रह्मणो दक्षिणे कर्णे वायोः कर्णे तु वामके।

संविन्दं तु करोम्यद्य विष्णोस्तत्वस्य निर्णये।'

'तव श्वासप्रणीताहं भविष्यामि न संशयः।

ममापि जीवोत्तमत्वं श्रुत्वा सर्वे मम प्रियाः।'

'गर्वं हित्वा प्रदास्यन्तु गुर्वन्तर्यामिणः करम्।

हयग्रीवाज्ञया वातविरञ्चौ स्वं च वैभवम्।

विना वाणीपतित्वं मे दत्तवन्तौ च किं वद।

अहेमेकेन रूपेण शोकं परिहरन् सदा।

श्लोकान् वक्तुं प्रविष्टोऽहं काकबुद्धौ द्विजोत्तमे।

तथैकेनैव रूपेण मत्तोके च प्रविश्यतु।

लोकस्य दर्शनात्सद्यः शोकं परिहाराम्यहम्।

देववृन्द समायुक्तो मद्वृन्दावनसंस्थितः।

सद्वृन्दानां प्रयच्छामि चेष्टवृन्दानि सर्वदा'।

इत्याद्याख्यानवाक्यानि वादिराजे गुरूत्तमे।

ऋजूत्तमत्वं देवैश्च पूज्यत्वं साधयन्ति हि॥22॥

ब्रह्मवायू इवाहं च हर्यनुग्रहभाजनम्।

इति प्रमेयं गुरुणा ह्याख्याने सूचितं स्वयम्॥23॥

| |
|---|
| अतो मध्वार्यगुरुणा यथानुष्ठितमञ्जसा।<br>हंसानां सार्वभौमेन ज्ञानसाम्राज्यपालने॥24॥ |
| तथैव वादिराजेन युवराजायितेन तत्।<br>सज्जनोद्धारकं कर्म कृतमच्युततुष्टये॥25॥ |
| अवतारे भूतलेऽस्मिन्नतिमानुष कर्मभिः।<br>वादिराजार्यवर्येण कृतं लोकहितं यथा॥26॥ |
| ततोप्यधिकृतः पञ्चवृन्दावनगतेन हि।<br>तथैवेष्टाप्तये नृणां महिमाऽत्र प्रदर्शते॥27॥ |
| सेव्यमानो वादिराजः ऋजुराजः प्रसन्नधीः।<br>वृन्दावने सन्निहितो भक्तानुग्रहतत्परः॥28॥ |
| सोऽयं चिन्तामणिर्वाथ कामधेनुः सुरद्रुमः।<br>चकास्तीत्यत्र भक्तानां वृन्दं साक्ष्यं वदत्यलम्॥29॥ |
| अतो भक्तैरेकदाऽपि शाल्मली मज्जनं तथा।<br>तपोवनाभिगमनं पञ्चवृन्दावस्य हि॥30॥ |
| त्रिविक्रमस्य व्यासस्य वेणुकृष्णस्य मारुतेः।<br>श्रीमद्धवलगङ्गादेः सेवनं सर्वकामदम्॥31॥ |
| स्वाप्नवृन्दावनाख्यानपठनं मध्वसद्गुरोः।<br>भाष्यादिसर्वमूलानां कृतीनां पठनं तथा॥32॥ |
| रघुनाथार्यभक्ताग्र्यरचितस्य शुभाप्तये।<br>वादिराड् वृत्तरत्नानां सङ्ग्रहस्य च कीर्तनम्॥33॥ |

धर्मार्थकाममोक्ष्याख्यपुरुषार्थैकसाधनम्।

इत्यादिनियमोपेताः भक्ताः प्राप्स्यन्त्यभीप्सितम्॥34॥

ऋजुगणवरता श्रीवादिराजस्य मोदात्

श्रुतिमुखवचनौघैः साधितेऽस्मद्गुरूक्त्या॥34॥

ऋजुवरपदभक्तैः स्मर्यतां सर्वदेयं।

हरिगुरुकरुणायाः पात्रतां नीयतां स्वम्॥36॥

इति श्रीवेदनिधितीर्थान्तेवासि श्रीरामचन्द्राचार्यविरचिते श्रीवादिराजगुरुवर चरितामृते अष्टमबिन्दुः समाप्तः।

## नवमः बिन्दुः

देवक्या बाललीलायाः  सन्दर्शनसमुत्कया।

प्रार्थितो बालरूपस्सन् मन्थानं मातृहस्तगम्॥1॥

हरन् रहसि भैष्म्या प्राग्दृष्टस्तुष्टहृदा तदा।

सम्प्रार्थितो देवशिल्पिकरात्स्वप्रतिमां शुभाम्॥2॥

सूत्रमन्थानहस्तां श्रीदिव्यगोपार्भकाकृतिम्।

प्रयायै कारयित्वा यां ददौ सा पूजिता तया॥3॥

नौकाद्वारा समायाता श्रीमध्वमुनिना ततः।

रूप्यपीठनगर्यां हि स्थापिता पूजिता यथा॥4॥

श्रीकृष्णबालमूर्तिस्सा जयत्यखिलकामदा।

रूप्यपीठपुरी रम्या कृष्णेन प्रथिता यथा॥5॥

तथा त्रिविक्रमश्चापि ब्रह्मणा पूजितः पुरा।

सोदाराज प्रार्थनया सोदां सम्प्रापितः शुभः॥6॥

| |
|---|
| जयत्यतिरां देवः सर्वाभीष्टार्थदायकः।<br>तथा त्रिविक्रमेण श्रीसोदाऽपि प्रथिता भुवि॥7॥ |
| हरेर्लीलातनुः कोलः श्रीमद्वकरपूजितः।<br>विष्णुतीर्थेष्टदः पायादपायाद्भक्तवृन्दकम्॥8॥ |
| श्रीवादिराजहस्ताब्जपूजितौ कामितान् नः।<br>व्यासास्ववदनौ देवौ साधयेतां निरन्तरम्॥9॥ |
| श्रीरामविठ्ठलौ वालिसुग्रीवाभ्यां पुरार्चितौ।<br>पापहानिं ज्ञानवृद्धिं क्रियास्तामस्तदोषकौ॥10॥ |
| मध्वाख्यभास्करो नित्यं मम हृत्कमलस्थितः।<br>तमश्चयं परिहरेद्राजमानगवां गणैः॥11॥ |
| श्रीविष्णुतीर्थो यतिराड्विरक्तानां शिरोमणिः।<br>लोकानुग्रहकामोऽन्यदुष्करे तपसि स्थितः॥12॥ |
| सह्याद्रिभागविलसद्धरिश्चन्द्रमहीधरे।<br>दीर्घजीवी स योगीन्द्रो भवताच्चित्त शुद्धये॥13॥ |
| श्रीवागीशमुनीशोऽपि श्रीशानुग्रहभासुरः।<br>दोषशान्त्यै पदाम्भोजं भक्तानां भवताच्चिरम्॥14॥ |
| कोलव्यासहयग्रीवपदाब्जपरिसेवकः।<br>भाविवायुर्वादिराजः कल्पद्रुः कामदोऽस्तु नः॥15॥ |
| वेदवेद्यानवद्यात्महयग्रीवार्चकः सदा।<br>वेदवेद्याख्ययोगीन्द्रः प्रीयतां यतिराड्ज्जुः॥16॥ |

| |
|---|
| श्रीमद्वेदान्तसिद्धान्तबोधनोत्कः सदा भुवि।<br>श्रीमद्वेदनिधिर्ज्ञानं दद्याद्विद्यागुरुर्मम॥17॥ |
| इति ऋजुवरराजद्वादिराजस्य भव्यं |
| चरितममृतमेतत्सेव्यतां मोक्षदायि।<br>इह च दुरितहारि स्वेष्टसर्वार्थदं द्राग् |
| जयतु रुचितमेद्रामचन्द्रेण भूमौ॥18॥ |
| श्रीवादिराजः शिवशक्रमुख्यदेवाभिवन्द्याङ्घ्रिसरोजयुग्मः।<br>भीतां कृपावृष्ट्यभिवर्षणेन चिन्तां दुरन्तां मम मानसोत्थाम्॥19॥ |
| श्रीमध्ववादिराङ्हंसौ गुरूत्तंसौ गतांहसौ।<br>हृद्यानवद्यविद्यां मे दद्यास्तां करुणानिधी॥20॥ |
| श्रीवेदनिधिहृद्ब श्रीवादिराजहृदब्जगः।<br>हयास्यरूपी श्रीकृष्णो ग्रन्थेनानेन तृप्यतु॥21॥ |

इति परमहंसपरिव्राजकाचार्यभाविसमीर श्रीवादिराज पूज्य चरण प्रशिष्य श्रीश्रीमद्वेदनिधितीर्थान्तेऽवासि

रामचन्द्राचार्य प्रणीते

श्रीवादिराजगुरुवरचरितामृते नवमबिन्दुः समाप्तः॥22॥